CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

एतत्पुस्तक विषय संपादने उपयुक्तानि पुस्तकानि

1. श्रीसूक्तम्। (याजुषमन्त्र रत्नाकरम्) (वेदे)
2. पूजाऋक्समूहः। (पूजोपयुक्त वेदमन्त्राः) (वेदे)
3. उपनिषद सङ्ग्रहः। (उपनिषदः)
4. अथर्वशीर्षकम्। (उपनिषदः)
5. अजितागमः। (शैवागम ग्रन्थः)
6. कारणागमः । (शैवागम ग्रन्थः)
7. मरीचि संहिता । (वैखानसागमः)
8. वैखानस ध्यानमुक्तावली (संप्रदाय ग्रन्थः)
9. आम्नाय मन्त्रकोशः (वैदिके)
10. लक्ष्मी तन्त्रम् (पाञ्चरात्रागमः)
11. विश्वसार तन्त्रे (शाक्ततन्त्रे)
12. रुद्रयामल तन्त्रे (महातन्त्रम्)
13. कमलात्मिका पञ्चकम् (पटलादिकम्)
14. क्रियाक्रम द्योतिका (शैवागम पद्धतिः)
15. शैवागम ध्यान रत्नावली (शैवागम पद्धतिः)
16. पाञ्चरात्र भगवतराधनम् (वैष्णव पूजा पद्धतिः)
17. प्रपञ्चसार सार सङ्ग्रहम् (तान्त्रिक मन्त्र शास्त्रम्)
18. मन्त्र महोदधिः (मन्त्रशास्त्रेम्)
19. शारदातिलकम् (मन्त्रशास्त्रेम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

20. विष्णुधर्मोत्तरम् (तान्त्रिकम्)
21. श्रीतत्वनिधिः (सम्प्रदाय ग्रन्थः)
22. श्रीसूक्त प्रयोगविधानम् (आचार्य ग्रन्थः)
23. महोत्सव विधिः (शैवागम पूजा ग्रन्थः)
24. विष्णुपुराणम् & (भागवतम्)
25. विष्णु सहस्रनाम स्तोत्रम् । (सम्प्रदाय ग्रन्थः)
26. लक्ष्मी सहस्रनाम स्तोत्रम्। (1923 कुम्भकोणे मुद्रितम्।)
27. महालक्ष्मी स्तोत्रमाला। (1954 श्रीरङ्गे मुद्रितम्)
28. ध्यानार्चना कदम्बम् । (शैवार्चना पद्धतिः)
29. लक्ष्मी प्रतिष्ठाविधिः।। (ग्रामदेवता प्रतिष्ठा) - करलिखित कोशः)
30. वरलक्ष्मीव्रत पूजाकल्पम्। (व्रतपूजा मञ्जरी)
31. कुबेरलक्ष्मी पूजा कल्पम् (कल्पोक्तम्)
32. नवरात्रि पूजा कल्पम् (तान्त्रिकम्)

(पुस्तकेभ्यो विषयलेखक: संशोधकश्च
वि - सोमशेखाशिवाचार्य:
चेन्नैपुरी।



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

लक्ष्मी आराधन चन्द्रिका

विषयानुक्रमणिका

संख्या	विषयः शीर्षकं	पत्रसंख्या
	श्रीनिधिः - 1 - पारायण विभागः	
1.	श्री विष्णु वन्दनम् (श्री हरिपाद प्रपत्ति)	39
2.	श्री विष्णु नामकवचम् (हरिनाम कवचम्)	50
3.	आपतोद्धारण स्तोत्रम्	51
4.	श्री हरि द्वादशनाम पञ्जरम्	53
5.	विष्णु पञ्चायुध स्तोत्रम्	54
6.	श्री सुदर्शन चक्रराज स्तुतिः	56
7.	श्री सुदर्शन षट्कम् (चक्र षडक्षर स्तोत्रम्)	57
8.	विश्वरूप-विराट् पुरुष ध्यानम् (भागवते विश्वेश्वर विग्रहः)	58
9.	श्री नारायणहृदयम् (अथर्वरहस्यान्तर्गतम्)	61
10.	श्रीलक्ष्मी हृदयम् (मालामन्त्रजपक्रमः)	65
11.	कमलात्मिका कवचम् (तान्त्रिकम्)	81
12.	लक्ष्मीनाम पञ्जरम् । (कवचस्तोत्रम्)	85
13.	श्री हृदयम् (सद्यःफलदा लक्ष्मीस्तव हृदयम्)	86
14.	कमलात्मिकोपनिषत्	88
15.	श्री सूक्तम्	89
16.	सिद्धलक्ष्मी मन्त्रस्तोत्रम् (ईश्वर प्रोक्तम्)	91
17.	कमला अष्टोत्तरशत नामस्तोत्रम् (108)	94

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

संख्या	विषय: शीर्षकं	पत्रसंख्या
18.	लक्ष्म्यष्टोत्तरशत नामस्तोत्रम् (108)	96
19.	लक्ष्मी अष्टोत्तर सहस्रनाम स्तोत्रम् (1008)	100
20.	लक्ष्मी अष्टोत्तरशताधिक सहस्रनाम स्तोत्रम्। (1108)	112
	श्रीनिधिः - 2 - जप्यमन्त्र विभागः	
21.	श्रीसूक्त जपविधिः (मन्त्रकोशोक्तः)	137
22.	श्रीसूक्त मन्त्राः ॥ (संपूर्णाः)	140
23.	श्रीदेवी मूलमन्त्र जपक्रम: (महालक्ष्मी मन्त्रभेद जपक्रम:)	143
24.	महालक्ष्मी मूलमन्त्र जपक्रमः (21 अर्णः)	144
25.	कमलामन्त्र जपक्रमः (27 अर्णाः)	146
26.	कमलात्मिका मन्त्रजपक्रम: (12 अर्णाः)	147
27.	कमलवासिनी मन्त्रजपक्रम: (प्रपञ्चसारे)	148
28.	साम्राज्यलक्ष्मी मन्त्रजपक्रम: (रुद्रयामळे)	149
29.	जगन्माताश्रीमन्त्र जपक्रम: (द्वादशाक्षरीविद्या) (12 वर्णाः)	150
30.	लक्ष्मीमन्त्र जपक्रम: (नवाक्षरीविद्या)	151
31.	गृह महालक्ष्मी मन्त्र जपक्रम: (२३वर्णाः)	152
32.	रमामन्त्र जपक्रम: (२८ वर्णः)	153
33.	सिद्धलक्ष्मीमन्त्र जपक्रम: (१०अर्णविद्या)	154
34.	धनलक्ष्मीमन्त्र जपक्रम: (48 वर्णाः)	155
35.	कमलवासिनीमन्त्र जपक्रम: (१४ वर्णाः)	156
36.	कमलालक्ष्मीमन्त्र जपक्रम: (प्रपञ्चसारं) (३०वर्णाः)	157
37.	सौभाग्यलक्ष्मीमन्त्र जपक्रम: (२४ वर्णाः) (प्रपञ्चसारे)	158

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

संख्या	विषय: शीर्षकं	पत्रसंख्या
38.	वसुदा लक्ष्मीमन्त्र जपक्रमः (२७ वर्णाः)	159
39.	पद्महस्तामन्त्र जपक्रमः (10 अर्णोः) (महालक्ष्मीरत्नकोशे)	160
40.	कमलाम्बामन्त्र जपक्रमः (27 अर्णाः शारदायाम्)	161
41.	कुबेरलक्ष्मीमन्त्र जपक्रमः (27 अर्णमन्त्रः)	162
42.	ज्योष्ठालक्ष्मीमन्त्र जपक्रमः (17 अर्णाः)	163
43.	वसुधा श्रीमन्त्र जपक्रमः (भूमिश्रियौ) (28 वर्णविद्या)	165
44.	वसुधारा महालक्ष्मी मन्त्र जपक्रमः (प्रपञ्चसारसंग्रहे)	167
45.	महालक्ष्मी षडक्षरमन्त्र जपक्रमः	168
46.	महाविष्णुः षडक्षरमन्त्र जपक्रमः	169
47.	हरिमन्त्र जपक्रमः (षडक्षर मन्त्रः)	170
	श्रीनिधिः - 3 - उपासन पुरश्चरण विभागः	
48.	विष्णोः परव्यूहादि भेद विवरणम्	171
49.	लक्ष्म्याः पर व्यूह विभव शक्तयः	175
50.	विष्णुमूर्तीनां लक्ष्मीमूर्तयः	178
51.	महालक्ष्मी मानस पूजा विधिः (पाञ्चरात्रागमे)	181
52.	पुरुषसूक्तेन नारायण पूजा	183
	श्रीनिधिः - 4 - लक्ष्मी आराधन विभागः	
53.	लक्ष्मी भेदविवरणम् आम्नायोक्ताः अष्टलक्ष्म्यः	187
54.	अष्टलक्ष्मी ध्यानानि (सचित्रानि)	188
55.	महालक्ष्म्याः मूलमन्त्र भेदाः (५०)	196
56.	लक्ष्मीरूप ध्यान संग्रहः (54 ध्यानानि)	203

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

संख्या	विषय: शीर्षकं	पत्रसंख्या
57.	विष्णुशक्तीनां वर्णस्थिति विवरणम् (मातृकान्यास मूलकारिका)	221
58.	महालक्ष्मी न्यासप्रयोगः (18)	222
59.	श्रीसूक्तऋचां श्रीपूजाकर्मणि विनियोग विधिः (लक्ष्मीतन्त्रे)	242
60.	लक्ष्मीपूजायाः विशेष सङ्कल्प प्रकार:	244
61.	लक्ष्मी आराधनक्रमः (श्रीसूक्तैः षोडशोपचारयुक्तः)	245
62.	महालक्ष्म्याः चतुष्षष्टि उपचारपूजा	254
63.	श्री सुक्तेन लक्ष्मीपूजा प्रयोग: (संक्षिप्तक्रमः)	259
64.	भगवति लक्ष्मी आराधन क्रमः	261
65.	मूलबेर महाविष्णोः पूजनम्	264
66.	देव्यालये लक्ष्म्याः आराधन क्रमः	265
67.	महालक्ष्मीसंक्षेपार्चनम् (लघुपूजा)	272
68.	श्रियः क्षीर तर्पणविधिः प्रयोग:	277
69.	लक्ष्म्याः पञ्चावरण देवता नामार्चनम्	278
70.	वरलक्ष्मी पूजा कल्पः	290
71.	श्रीयन्त्र श्रीसूक्तपूजा (लघुक्रमः)	303
	श्रीनिधिः - 5 - यन्त्र आराधन विभागः	
72.	लक्ष्मी यजन यन्त्रम् (7 आवरणपूजा)	305
73.	श्री पूजनयन्त्रम् (5 आवरणपूजा)	306
74.	श्रीसूक्तार्चन पूजनयन्त्रम्(9 आवरणपूजा)	307
75.	श्रीसूक्त पूजनयन्त्रम् (15 आवरणपूजा)	308
76.	मङ्गळार्चन पूजनयन्त्रम् (15 ऋग्विभागदलार्चनम्)	309

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

संख्या	विषय: शीर्षकं	पत्रसंख्या
77.	गजलक्ष्मी यजनयन्त्रम् (5आवरणदेवता:)	311
78.	महालक्ष्मी पूजनयन्त्रम् (5आवरणदेवता:)	312
79.	कमलवासिनी पूजनयन्त्रम् (5आवरणदेवता:)	313
80.	मूकाम्बिका पूजायन्त्रम्	314
81.	द्वादशाक्षर महालक्ष्मीमन्त्र पूजनयन्त्रम्	315
82.	लक्ष्मी दशाक्षरमन्त्र यन्त्रम्	315
83.	लक्ष्म्येकाक्षर बीजमन्त्र पूजनयन्त्रम्	316
84.	ज्येष्ठालक्ष्मी मन्त्र पूजनयन्त्रम्	316
85.	लक्ष्मी सप्तविंशत्यक्षर मन्त्र पूजनयन्त्रम्	317
86.	वसुधालक्ष्मी पूजनयन्त्रम्	317
87.	चक्राब्जमण्डलम् (पाञ्चरात्रागमे)	318
88.	नवकमल मण्डलम् (लक्ष्मी पूजन नवाब्ज मण्डलम्)	319
89.	सर्वतोभद्रमंडलम् (19 रेखात्मकम्) & चन्द्रमण्डलम्	319
90.	नवकलश स्नपन पूजाविधि: (9 कलशप्रकार)	320
91.	द्वादशकलश स्नपन पूजाविधि: (12 कलशप्रकार)	321
92.	षोडशकलश स्नपन पूजाविधि: (16 कलशप्रकार)	322
	श्रीनिधिः - 6 - लक्ष्मी होम विभागः	
93.	ऋग्विधानोक्त श्रीसूक्तहोम विधिः	323
94.	श्रीसूक्त होमविधिः (विष्णुधर्मोत्तरोक्तः)	325
95.	लक्ष्मीहोमे श्रीसूक्तमन्त्र विभागक्रमः (षोडशधा हुनेत्)	327

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

संख्या	विषयः शीर्षकं	पत्रसंख्या
96.	श्रीसूक्त दुर्गास्तव संपुटीकरण क्रमः (रुद्रयामळ तन्त्रोक्तः)	329
97.	लक्ष्मी मन्त्रमाला पञ्जरम् (जप होम योग्यम्)	335
98.	लक्ष्मीहोमे विशेषद्रव्यानां सहस्राहुतौ फलानि (मधु घृत शर्करा त्रिमधुः)	338
	श्रीनिधिः - 7 - लक्ष्मी स्तोत्र विभागः	
99.	अच्युताष्टकम् (शङ्कराचार्यविरचितम्)	342
100.	लक्ष्मी द्वादशनाम स्तोत्रम् (तान्त्रिकम्)	344
101.	महालक्ष्मी मातृका स्तोत्रम् (अकारादि क्षकारान्त स्तोत्रम्)	345
102.	प्रसन्नलक्ष्मी स्तोत्रम् (तान्त्रिकम्)(श्री आपदुद्धारण स्तोत्रम्)	353
103.	श्री माहात्म्य स्तुतिः(इन्द्रकृता) (विष्णुपुराणान्तर्गता)	357
104.	सिद्धलक्ष्मी स्तोत्रम् (ब्रह्मणाकृतं)(ब्रह्मपुराणान्तर्गतम)	361
105.	महालक्ष्म्यष्टकम् (इन्द्र प्रोक्तम्)	364
106.	लक्ष्मीस्तोत्र दशकम् (सर्वदेवकृतम्)	365
107.	कमलवासिनी स्तोत्रम् (देवेन्द्रकृतम्)	367
108.	प्रसन्नवरदा लक्ष्मीस्तोत्रम् (अगस्त्य कृतम्)	370
109.	श्रीस्तवः (श्रीवत्साङ्कमिश्रविरचितः)	374
110.	श्रीगुणरत्नकोश स्तवः (श्रीपराशरभट्टार्यै रनुगृहीतः)	377
111.	श्रीस्तुतिः(श्रीमद्वेदान्ताचार्यै रनुगृहीता)	388
112.	लक्ष्मी आर्यावृत्त स्तुतिः (वादिराज कृता)	393
113.	श्री कनकधारा स्तोत्रम् (श्री शङ्कराचार्य विरचितम्)	395

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

संख्या	विषयः शीर्षकं	पत्रसंख्या
114.	अष्टलक्ष्मी स्तोत्र अष्टकम् (भागवतकृतम्)	399
115.	वरदवल्लभा स्तोत्रम् (चतुश्लोकी) (यामुनाचार्यकृतिः)	402
116.	वरदवल्लभा गद्यम् (यामुनाचार्यकृतं)	403
117.	लक्ष्मी चूर्णिका (लक्ष्मीस्तुति वचनम्)	403
118.	लक्ष्म्याः प्रणतिः (महेन्द्रकृतं श्रीमहिम्नस्तुतिः)	404
	श्रीनिधिः - 8 - कुबेरलक्ष्मी पूजा विभागः	
119.	कुबेरलक्ष्मी पूजा प्रयोगः	406
120.	कुबेरलक्ष्मी पूजायाः क्रियाक्रमः	407
121.	ब्राह्म्यादि लोकमातृदेवीनां ध्यानानि (लक्ष्म्याः परिवारदेवताः)	409
122.	दशदिक् पालक रूपध्यानानि	415
123.	कुबेर रूपध्यानानि	417
124.	कुबेर परिवार देवताध्यानम् (द्वारपालादि चत्वारः)	418
125.	कुबेर मन्त्रविशेषाः (मन्त्रभोदाः)	419
126.	कुबेर यन्त्र पूजाविधिः	421
127.	कुबेरपूजा प्रयोगः	424
128.	कुबेर आवाहनमन्त्रः	425
129.	कुबेरगण देवताह्वानम् (यक्षेशपरिवारः)	429
130.	कुबेर अष्टोत्तरशत नामावलिः	431
131.	कुबेरगद्यपद्य स्तोत्राणि (शैवागम पद्धतौ)	434

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

संख्या	विषयः शीर्षकं	पत्रसंख्या
	श्रीनिधिः - 9 - श्रीनामावळिः विभागः	
132.	केशवादि द्वादशशक्ति नामावळिः (12नामानि)	436
133.	लक्ष्मी द्वादशनामानि (12नामानि)	437
134.	लक्ष्म्याः षोडश नामानि (16नामानि)	438
135.	लक्ष्मी चतुर्विंशति विभवशक्ति नामानिः (24नामानि)	439
136.	श्रीसूक्तप्रयोग नामावळिः (53 श्रीसूक्त नामानि)	441
137.	लक्ष्मी अष्टोत्तरशत नामावलिः (108)	444
138.	कमला अष्टोत्तरशत नामावलिः (108)	447
139.	लक्ष्म्याः विशेषार्चन नामावलिः (126)	450
140.	लक्ष्मी मन्त्राक्षरादिकत्रिशति नामावळिः	456
141.	श्री मातृका चतुर्विंशत्युत्तर त्रिशति नामावलिः (324)	470
142.	महालक्ष्मी अष्टोत्तरशताधिक सहस्र नामावळिः (1108)	478
143.	श्रीलक्ष्मी अष्टोत्तर सहस्र नामावलिः (1008)	502

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

श्री विष्णु वन्दनम् (श्री हरिपाद प्रपत्ति)

1. विष्णु स्मरणम् - ओं ह्रीं विष्णवे नमः।

शुक्लाम्बर धरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥



2. विष्वक्सेनाय नमः

यस्य द्विरद वक्त्राद्याः पारिषद्याः परश्शतम् ।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये ॥

3. प्रभविष्णु प्रणतिः

यस्य स्मरण मात्रेण जन्म संसार बन्धनात् ।
विमुच्यते नम स्तस्मै विष्णवे प्रभविष्णवे ॥

4. वासुदेव नतिः

वासनाद् वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूत निवासोऽसि वासुदेव नमोऽस्तु ते ॥ (व्यास ऋषिः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

5. गोविन्द वन्दनं

विष्णुं नारायणं कृष्णं माधवं मधुमूदनम् ।
हरिं नरहरिं वन्दे गोविन्दं दधि वामनम् ।।

6. विष्णु नमस्कारः

सशङ्ख चक्रं सकिरीट कुण्डलं -
सपीत वस्त्रं सरसीरु हेक्षणम् ।
सहार वक्ष स्थल शोभि कौस्तुभं -
नमामि विष्णुं शिरसा चतुर्भुजम् ॥

7. लोकनाथ प्रणतिः

मेघ श्यामं पीत कौशेय वासं -
श्रीवत्साङ्कं कौस्तुभो द्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षं -
विष्णुं वन्दे सर्व लोकैक नाथम् ॥

8. महाविष्णवे नमः (भोग स्थानक विष्णुः)

चतुर्बाहु श्श्यामद्युति रभयभृद्द् दक्षिणकरे –
दधत् चक्रं शङ्खं कनकमय भूषोज्वलवपुः।
करं वामं कुर्वन् तुलितहरिकर्णं कटितटे –
हृदि ध्येयो देव स्समतल निविष्ठाङ्घ्रियुगळः।।

9. सिंहासनस्थहरये नमः (भोग आसीन विष्णुः)

श्यामं सिंहासनस्थं दधतं अतिनतं दक्षिणाङ्घ्रिं तदन्यं
बिभ्राणं कुञ्चितं स्वं कटिकृत मृगराट् कर्णवद्द् वामहस्तम् ।
शङ्खं चक्रं दधानं भयहति वरकृत् दक्षहस्तं चतुर्दोः -
युक्तं केयूर हार प्रभृति बहुविधा कल्प मीडे मुकुन्दम्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

10. अनन्तशयन हरये नमः (भुजगशयनमूर्तिः/शेषशायी)



शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं -
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिहृत् ध्यानगम्यं -
वन्दे विष्णुं भवभयहरं सर्व लोकैक नाथम् ॥

11. भोगशयन विष्णवे नमः

श्यामं चाप समाङ्ग मर्धशयना विष्टं करं दक्षिणं -
कोटीरा भिमृशं प्रसुप्त मथवा न्यस्योपधानोपरि।
वामं साक्थिन निधाय वाम पद माकुञ्च्य प्रसार्यापरं -
ध्यायामि द्विभुजं चतु र्भुजयुतं प्रेक्ष्यं सु पुष्टाङ्गकम्।।

12. श्रीरङ्गनाथ शेषशायिने नमः (रङ्गराजाय नमः)

सप्त प्राकार मध्ये सरसिज मुकुळोद् भासमाने विमाने –
कावेरी मध्यदेशे मृदुतर फणिराट् भोग पर्यङ्ग भागे।
निद्रा मुद्राभिरामं कटि निकट शिरः पार्श्व विन्यस्त हस्तं-
पद्मा धात्री कराभ्यां परिचित चरणं रङ्गराजं भजे ऽहम्।।

13. श्रीभूमीयुत विष्णवे नमः (श्रीवत्साङ्काय नमः)

उद्यत्कोटि दिवाकराभ मनिशं शंखं गदां पंकजम् -
चक्रं बिभ्रत मिन्दिरा वसुमती संशोभि पार्श्व द्वयम् ।
कोटीराङ्गद हार कुण्डलधरं पीताम्बरं कौस्तुभोद् -
दीप्तं विश्वधरं स्ववक्ष विलसत् श्रीवत्सचिन्हं भजे ।।

14. रङ्गराजाय नमः

आनन्द रूपे निजबोध रूपे -
ब्रह्मस्व रूपे श्रुतिमूर्ति रूपे ।
शशाङ्क रूपे रमणीय रूपे -
श्रीरङ्ग रूपे रमतां मनो मे ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



15. श्री रङ्गशायिने नमः

सचित्र शायी भुजगेन्द्र शायी -
नन्दाङ्ग शायी कमलाङ्ग शायी ।
क्षीराब्धि शायी वटपत्र शायी -
श्रीरङ्ग शायी रमतां मनो मे ॥

16. श्री वेङ्कटाचलपतये श्रीनिवासाय नमः। श्रीवेङ्कटेशाय नमः

ध्यायेत् श्री वेङ्कटेशं कलिमल हरणं काञ्चनाऽराधिताङ्घ्रिं -
शेषाद्रौ सन्निविष्टं चिरमणि रमया भूमि वैकुण्ठ नाथम्।
सुब्रह्मण्यं सुरेशं सकल मुनिगणै स्सेवितं मन्त्रमूर्तिं -
भक्तेष्टार्थ प्रदान प्रविथत यशसं विष्णु मर्चावतारम्।।

17. श्रीनिवासाय नमः श्रीमद् वेङ्कटनाथाय नमः

श्रियःकान्ताय कल्याण निधये निधयेऽर्थिनाम् ।
श्रीवेङ्कट निवासाय श्रीनिवासाय मङ्गलम् ॥ 1

कल्याणाद्भुत गात्राय कामितार्थ प्रदायिने ।
श्रीमद् वेङ्कटनाथाय श्रीनिवासाय ते नमः ।। 2

18 वैकुण्ठनाथाय नमः

सव्यं पादं प्रसार्य श्रित दुरितहरं दक्षिणं कुञ्चयित्वा -
जानुन्याधार्य सव्येतर मितरभुजं नाग भोगे निधाय ।
पश्चाद् बाहुद्वयेन प्रतिभट शमने धारयन् शङ्ख चक्रे -
देवी भूषादि जुष्टो जनयति जगती शर्म वैकुण्ठनाथः।।

19. हयग्रीवाय नमः (हयाननाय हरयेनमः)

व्याख्यामुद्रां करसरसिजैः पुस्तकं शङ्ख चक्रे -
बिभ्रत् भिन्नस्स्फटिकरुचिरे पुण्डरीके निषण्णः ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अम्लानश्री अमृतविशदैः अंशुभिः प्लावयन् मां -
आविर्भूयाद् अनघ महिमा मानसे वागधीशः ॥

20. हयग्रीवः

ज्ञानानन्दमयं देवं निर्मल स्फटिकाकृतिम्।
आधारं सर्वविद्यानां हयग्रीव मुपास्महे ॥

21. धन्वन्तरये नमः

अरि जलज जलूका रत्न पीयूष कुम्भ -
प्रकटित कर कान्तः कान्त पीताम्बराढ्यः।
सितवसन विराजन् मौळि रारोग्यदायी -
शतमख मणिवर्णः पातु धन्वन्तरि र्नः॥

22. अच्युताय गदाधराय नमः (चक्रपाणये नमः)



नमो मत्स्य कूर्मादि नाना स्वरूपैः -
सदा भक्त कार्यो द्यतायार्ति हन्त्रे ।
विधात्रादि सर्ग स्थिति ध्वंस कर्त्रे -
गदा शङ्ख पद्मारि हस्ताय ते ऽस्तु।।

23. अमृतधन्वन्तरये नमः।

अच्युतानन्द गोविन्द विष्णो नारायणा ऽमृत।
रोगान् मे नाशया ऽशेषान् आशु धन्वन्तरे हरे।।

24. परमपुरुषाय नमः विश्वरूपाय नमः।

नमो ऽस्त्व नन्ताय सहस्र मूर्तये -
सहस्र पादाक्षि शिरोरु बाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते -
सहस्रकोटी युगधारिणे नमः।। (ब्रह्मणस्स्तवः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

25. दशावतारमूर्तिभ्यो नमः

मत्स्यः कूर्मो वराहश्च नारसिंहो ऽथ वामनः ।
रामो रामश्च रामश्च कृष्णः कल्की च रक्षतु।।

26. श्रीभामारुक्मिणीसहित कृष्णाय नमः

छायायां पारिजातस्य हेमसिंहासनोपरि -
आसीन मम्बुदश्याम मायताक्ष मलङ्कृतम् ।
चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कित वक्षसं -
रुक्मिणी सत्यभामाभ्यां सहितं कृष्ण माश्रये ॥

27 भूवराह मूर्तये नमः ।

श्याम स्सुदर्शन दराऽभय सद्वरेढ्यो -
भूम्या युतो ऽखिल निजोक्त परिग्रहैश्च ।
ध्येयो निजैश्च तनुभि स्सकलै रूपेतः -
कोलो हरि स्सकल वाञ्चित सिद्धये नः।।

28 श्री महीवराहाय नमः ।

श्यामाभ मुज्वल विभूषण भूषिताङ्गं -
दोर्भि श्चतुर्भि रभयं पर शङ्ख चक्रे।
सव्यं कटी मति भृशन्त मुदार भूषं -
श्री भूमि सेवित वराह हरिं नमामि।

29. नृसिंह गुरवे नमः।

उपास्महे नृसिंहार्यं ब्रह्म वेदान्त गोचरम् ।
भूयो लालित संसार छेद हेतुं जगद्गुरुम् ।।

30. उग्रनृसिंह विष्णवे नमः।

उग्रं वीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम् ।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

31 नरहरि विष्णवे नमः । उग्रविष्णवे नमः

वृत्तोत्फुल्ल विशालाक्षं विपक्ष क्षय दीक्षितम् ।
निनाद त्रस्त विश्वाण्डं विष्णुं उग्रं नमाम्यहम् ।।

32. लक्ष्मीनृसिंह हरये नमः

सत्य ज्ञान सुख स्वरूप ममलं क्षीराब्धि मध्ये स्थितं -
स्वाङ्का रूढ रमा प्रसन्न वदनं भूषा सहस्रो ज्वलम् ।
त्र्यक्षं चक्र पिनाक सायक करं बिभ्राण मर्क च्छविं -
छत्रीभूत फणीन्द्र मिन्दु धवळं लक्ष्मीनृसिंहं भजे ।।

33 राघव रामाय नमः-

श्रीराघवं दशरथात्मज मप्रमेयं -
सीतापतिं रघुकुलान्वय रत्नदीपम् ।
आजानुबाहु मरविन्द दलायताक्षं-
रामं निशाचर विनाशकरं नमामि ।।

34 सीतापतये रामाय नमः

रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः।।

35. परमात्मने नमः ।

ओंनमः परमार्थाय पुरुषाय महात्मने।
अरूप बहु रूपाय व्यापिने परमात्मने ।।

36. आदिभूताय हरये नमः ।

नम स्समस्त भूतानां आदिभूताय भूभृते।
अनेकरूप रूपाय विष्णवे प्रभ विष्णवे।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

37. श्रीरामचन्द्राय नमः।

श्री राम राम रामेति रमे रामे मनोरमे।
सहस्रनाम तत्तुल्यं रामनाम वरानने ।।

38 परात्परविष्णवे नमः

पारं परं विष्णु रपार पारः -
परेभ्य पारः परमात्म रूपीं।
स ब्रह्म पारः पर पारभूतः -
परः पराणां अपपारभूतः।।

39 ओं नारायणाय नमः

आर्ता विषण्णाः शिथिलाश्च भीताः -
घोरेषु च व्याधिषु वर्तमानाः ।
सङ्कीर्त्य नारायण शब्दमात्रं -
विमुक्त दुःखाः सुखिनो भवन्तु।।

40 पद्माक्षाय नमः

विश्वेश्वर मजं देवं जगतः प्रभु मव्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ।।



41. बालकृष्णाय नमः।

तमद्भुतं बालक मम्बुजेक्षणं -
चतुर्भुजं शङ्ख गदा द्युधोद्युतम् ।
श्रीवत्स लक्ष्मीं गळशोभि कौस्तुभं -
पीताम्बरं सान्द्र पयोद सौभगम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

42. गोपालकृष्णाय नमः।



नौमीड्य तेऽभ्र वपुषे तटिदम्बराय -
गुञ्जावतंस शिखिपिञ्छ लसन्मुखाय।
वन्यस्रजे कबल वेत्र विषाण वेणु-
लक्ष्मश्रिये मृदुपदे पशुपाङ्गजाय ॥

43. वासुदेव कृष्णाय नमः।

वसुदेवसुतं देवं कम्स चाणूर मर्दनम् ।
देवकी परमानन्दं कृष्णं वन्दे जगद्गुरुम् ।।

44. जगन्नाथ कृष्णमूर्तये नमः ।



कृष्ण कृष्ण कृपासिन्धो भक्ति सिन्धु सुधाकर।
मां उद्धर जगन्नाथ माया मोह महार्णवात्।।

45. मुकुन्दकृष्णमूर्तये नमः।

क्षीरोदन्वत्प्रदेशे शुचिमणि विलसत्सैकतेमौंक्तिकानां -
मालाक्लृप्तासनस्थः स्फटिकमणिनिभै मौंक्तिकैर्मण्डिताङ्गः।
शुभ्रै रभ्रै रदभ्रै रुपरि विरचितै र्मुक्त पीयूष वर्षैः -
अनन्दी नः पुनीयाद् अरि नळिन गदा शङ्खपाणि र्मुकुन्दः।।

46. कृष्णाय परमात्मने नमः।

अविकाराय शुद्धाय नित्याय परमात्मने ।
सदैकरूप रूपाय विष्णवे सर्व जिष्णवे ।।

47. श्री कृष्ण चक्रराजाय नमः।

कनक रजत चक्रं भासुरा रम्य चक्रं -
गिरिवर गुरु चक्रं केशव स्वामि चक्रम्।
असुर निधन चक्रं कालदण्डाग्नि चक्रं -
भवतु भुवन चक्रं बान्धवो विष्णुचक्रम्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



48. श्रीपति विष्णवे नमः।

ओं नमश्श्रीपते विष्णो जगन्नाथ वरप्रभो।
भक्तवत्सल भक्तानां अभिप्रेतार्थ साधक।।

49. कार्येषु हरिस्मरणम् (षोडशनामानि)

औषधे चिन्तयेद् विष्णुं भोजने च जनार्दनम्।
शयने पद्मनाभं च विवाहे च प्रजापतिम्।।
युद्धे चक्रधरं देवं प्रवासे च त्रिविक्रमम्।
नारायणं तनुत्यागे श्रीधरं प्रियसङ्गमे।।
दुस्स्वप्ने स्मर गोविन्दं सङ्कटे मधुसूदनम्।
कानने नारसिंहं च पावके जलशायिनम्।।
जलमध्ये वराहं च पर्वते रघुनन्दनम्।
गमने वामनं चैव सर्वकार्येषु माधवम्।। (पुराणे)

50. महाविष्णोः आवाहनध्यानम्। (लक्ष्मीनारायणध्यानम्)

ध्यायेत् चतुर्भुजं देवं शङ्ख चक्र गदाधरम्।
पीताम्बर युगोपेतं लक्ष्मीयुक्तं विभूषितम्।
लसत् कौस्तुभ शोभाढ्यं मेघश्यामं सुलोचनम्।
श्रीवत्सं पुण्डरीकाक्षं परमं पुरुषोत्तमम्।
ध्यात्वैवं कुम्भमध्ये तु विष्णुं सं पूजयेत् गुरुः।

51. विष्णुसान्निध्य प्रार्थना।

आगच्छ देवदेवेश जगद्योने रमापते।
कलशेऽस्मिन् प्रतिष्ठाने सन्निधेहि कृपां कुरु।।
ग्रामस्य राज्ञो राष्ट्रस्य प्रजानां इन्दिरावर।
देहि पुष्टिं च तुष्टिं च गतिं च परमां तथा।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

52. विष्णुविज्ञापनम्



औं नमश्श्रीपते विष्णो जगन्नाथ वरप्रभो ।
भक्तवत्सल भक्तानां अभिप्रेतार्थ साधक ॥

सन्निधत्स्व चिरं स्थाने कल्पिते श्रद्धया मया ।
प्रसीद देव देवेश पूजा मपि गृहाण मे ॥

ग्रामस्य राज्ञो राष्ट्रस्य प्रजाना मिन्दिरा वर ।
देहि पुष्टिं च तुष्टिं च गतिं च परमां तथा ॥

इति विज्ञाप्य देवाय देशिक स्तन्त्रपारगः ।
सर्वोपचारै स्संपूज्य तोषये त्पुरुषोत्तमम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री:

श्री विष्णु नामकवचम् (हरिनामकवचम्)

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेक रूपं दैत्यान्तं नमामि पुरुषोत्तमम् ॥ 1

केशवः पातु मे पादौ जङ्घे नारायणो मम ।
माधवो मे कटिं पातु गोविन्दो गुह्य मेव च ॥ 2

नाभिं विष्णुस्तु मे पातु जठरं मधु सूदनः ।
उरस् त्रिविक्रमः पातु हृदयं पातु वामनः ॥ 3

श्रीधरः पातु मे कण्ठं हृषीकेशो मुखं मम ।
पद्मनाभस्तु नयने शिरो दामोदरो मम ॥ 4

एव मेतानि नामानि जपकाले विशेषतः ।
विन्यसेद् आत्मरक्षार्थं सर्व मङ्गळ सिद्धये।। 5



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री:

आपतोद्धारण स्तोत्रम्

आपदां अपहर्तारं दातारं सर्व संपदाम् ।
लोकाभिरामं श्रीरामं भूयोभूयो नमाम्यहम् ॥ 1

आर्तानां आर्तिं हन्तारं भीतानां भीति नाशनम् ।
द्विषतां काल दण्डं तं रामचन्द्रं नमाम्यहम् ॥ 2

नमः कोदण्ड हस्ताय सन्धीकृत शराय च ।
खण्डिता खिल दैत्याय रामाया ऽपन्निवारिणे ॥ 3

अग्रतः पृष्ठतचैव पार्श्वतश्च महाबलौ ।
आकर्ण पूर्ण धन्वानौ रक्षेतां राम लक्ष्मणौ ॥ 4

सन्नद्धः कवची खड्गी चाप बाण धरो युवा ।
गच्छन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥ 5

अच्युता ऽनन्त गोविन्द नामो च्चारण भेषजात् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ 6

सत्यं सत्यं पुन स्सत्यं उद्धृत्य भुज मुच्यते ।
वेदाच्छास्त्रं परं नास्ति न दैवं केशवात् परम् ॥ 7

शरीरे जर्झरीभूते व्याधिग्रस्ते कळेबरे ।
औषधं जाह्नवी तोयं वैद्यो नारायणो हरिः ॥ 8

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इद मेकं सुनिष्पन्नं ध्येयो नारायणो हरिः ॥ 9

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कायेन वाचा मनसेन्द्रियै र्वा -
बुद्ध्या ऽऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै -
नारायणा येति समर्प यामि ॥ 10

यदक्षर पद भ्रष्टं मात्रा हीनं तु यद् भवेत् ।
तत् सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥ 11

विसर्ग बिन्दु मात्राणि पद पादाक्षराणि च ।
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम ॥ 12

कुङ्कुमङ्कित वर्णाय कुन्देन्दु धवळाय च ।
विष्णुवाह नमस्तुभ्यं वैनतेय नमोऽस्तु ते ॥ (वैनतेयाय नमः) 13

गरुडाय नम स्तस्मै नमस्ते पक्षिणां पते ।
नमो गमाय राजाय सुपर्णाय नमो नमः ॥ (गरुडाय नमः) 14

विनतानन्द रूपाय कश्यपस्य सुताय च ।
अहीनां वैरिणे तुभ्यं विष्णुभद्राय ते नमः॥ (विष्णुवाहाय नमः) 15

रामदूत महाधीर रुद्रवीर्य समुद्भव।
अञ्जना गर्भ सम्भूत वायुपुत्र नमोऽस्तु ते ॥ (आञ्जनेयाय नमः) 16

अञ्जना गर्भसम्भूतं कुमारं ब्रह्मचारिणम्।
दुष्टग्रह विनाशाय हनूमन्त मुपास्महे ॥ (हनुमते नमः) 17

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

श्री हरि द्वादशनाम पञ्जरम्

पुरस्तात् केशवः पातु चक्री जाम्बूनद प्रभः ।
पश्चान् नारायण श्शङ्खी नील जीमूत सन्निभः ॥ 1

इन्दीवर दळश्यामो माधवो (ऊ)र्ध्वं गदाधरः।
गोविन्दो दक्षिणे पार्श्वे धन्वी चन्द्रप्रभो महान् ॥ 2

उत्तरे हलभृद् विष्णुः पद्म किञ्जल्क सन्निभः ।
आग्नेय्यां अरविन्द्राभो मुसली मधुसूदनः॥ 3

त्रिविक्रमः खड्गपाणिः निरृत्यां ज्वलन प्रभः ।
वायव्यां वामनो वज्री तरुणादित्य दीप्तिमान् ॥ 4

ऐशान्यां पुण्डरीकाभः श्रीधरः पट्टसायुधः।
विद्युत्प्रभो हृषीकेशः स बाह्यां दिशि मुद्गरी ॥ 5

हृत्पद्मे पद्मनाभो मे सहस्रार्क समप्रभः।
सर्वायुध स्सर्वशक्तिः सर्वज्ञ स्सर्वतोमुखः॥ 6

इन्द्रकोपल सङ्काशः पाशहस्तो ऽपराजितः ।
स बाह्याभ्यन्तरं देहं व्याप्य दामोदरः स्थितः ॥

एवं सर्वत्र मच्छिद्रं नाम द्वादश पञ्जरम् ।
प्रविष्टो ऽहं न मे किञ्चित् भय मस्ति कदाचन ॥

(श्रीराम राम - भयं नास्ति कदाचन ओं नम इति हरिः ओम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

विष्णु पञ्चायुध स्तोत्रम्

स्फुरत् सहस्रार शिखाति तीव्रं -
सुदर्शनं भास्कर कोटि तुल्यम् ।
सुरद्विषां प्राण विनाशि विष्णोः -
चक्रं सदा ऽहं शरणं प्रपद्ये ॥ 1



चक्रायुधं

विष्णो र्मुखस्था ऽनिल पूरितस्य -
यस्य ध्वनि र्दानव दर्प हन्ता ।
तं पाञ्चजन्यं शशिकोटि शुभ्रं -
शङ्खं सदा ऽहं शरणं प्रपद्ये ॥ 2

शङ्खं

हिरण्मयीं मेरु समान सारां -
कौमोदकीं दैत्य कुलैक हन्त्रीम् ।
वैकुण्ठ वामाग्र करा ऽभि मृष्टां -
गढां सदा ऽहं शरणं प्रपद्ये ॥ 3

गदायुधं

रक्षो ऽसुराणां कठिनोग्र कण्ठ -
च्छेद क्षर श्शोणित दिग्धतारम् ।
तं नन्दकं नाम हरेः प्रदीप्तं-
खड्गं सदा ऽहं शरणं प्रपद्ये ॥ 4

खड्गं

यद् ज्या निनाद श्रवणात् सुराणां -
चेतांसि निर्मुक्त भयानि सद्यः ।
भवन्ति दैत्या ऽशनि बाण वर्षि-
शार्ङ्गं सदा ऽहं शरणं प्रपद्ये ॥ 5



धनुर्बाणम्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

इमं हरेः पञ्च महायुधानां -
स्तवं पठेद् यो ऽनुदिनं प्रभाते।
समस्त दुःखानि भयानि सद्यः-
पापानि नश्यन्ति सुखानि सन्ति ॥ 6



पद्मपुष्पम्

वने रणे शत्रु जला ऽग्नि मध्ये -
यदृच्छया ऽऽपत्सु महा भयेषु ।
इदं पठन् स्तोत्रं अनाकुलात्मा-
सुखी भवेत् तत्कृत सर्व रक्षः ॥ 7

मुसलम्

(इति श्रीहरि पञ्चायुध स्तोत्रं संपूर्णम)



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

श्री सुदर्शन चक्रराज स्तुतिः

कल्पान्तार्क प्रकाशं त्रिभुवन मखिलं तेजसा पूरयन्तं -
रक्ताक्षं पिङ्गकेशं रिपुकुल भयदं भीम दंष्ट्रा ऽट्टहासम् ।
शङ्खं चक्रं गदाब्जं प्रथुतर मुसलं चाप पाशाङ्कुशादीन् -
विभ्राणं दोर्भिराद्यं मनसि मुररिपोः भावयेत् चक्रराजम् ॥ 1

(सुदर्शननृसिंहमन्त्रः - ओं सहस्रार क्ष्रौं हन हन हुं फट् स्वाहा । "14वर्णाः)

शङ्खं चक्रं च चापं परशु मसि मिषुं शूल पाशां कुशाग्नीन् -
विभ्राणं वज्र खेटौ हल मुसल गदा कुन्त मत्युग्र दंष्ट्रम् ।
ज्वालाकेशं त्रिणेत्रं ज्वल दनल निभं हार केयूर भूषं -
ध्यायेत् षट्कोण संस्थं सकल रिपुजन प्राण संहारचक्रम् ॥ 2

(सुदर्शनमहाविष्णुमन्त्रः ओं श्रीं ह्रीं सहस्रार हुं फट् स्वाहा।(6वर्णाः)

चक्रं नश्चक्र पाणे र्युत जनित गळ द्रक्त धाराक्त धारा -
शश्वन् यो विश्ववन्द्यं वितरति विपूलं सर्व कर्मासु शोभम् ।
आसूर्यस्य स्वरूपं खगमुख मखिलं सूर्यकाला वतारं-
तस्यैकान्त मतं यदपि च परमं सर्वधाम्नां च धामम् ॥ 3

(हरिसुदर्शन चक्रमन्त्रः-"ओं ह्रां ह्रीं ह्रूं सहस्रार हुं फट् । (6वर्णाः)

तिर्यक् ज्वालाग्निरूपं ज्वलितशिखि शिखोत्तुङ्ग केयूर बाहुं -
पिङ्गाक्षं दीप्तजिह्वं दशशत विलसत् तीक्ष्णधाराति रौद्रम् ।
शार्ङ्ग चक्राब्ज शङ्खान् शरमुसलधरं सर्व शत्रून् दहन्तं -
षट्कोणाभ्यन्तरस्थं रवि नियुत निभं चक्रराजं प्रसन्नम् ॥ 4

(ओं नमो भगवते - महा सुदर्शनाय -महाचक्राय-महाज्वालाय -
दीप्तरूपाय - सर्वतो रक्ष रक्ष मां-महाबलाय स्वाहा ॥44 वर्णाः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

श्री सुदर्शन षट्कम् (चक्र षडक्षर स्तोत्रम्)

सहस्रादित्य सङ्काशं सहस्रवदनं प्रभुम् ।
सहस्रदं सहस्रारं प्रपद्ये ऽहं सुदर्शनम् ॥ 1

हसन्तं हार केयूर मुकुटाङ्गद भूषणैः।
शोभनै र्भूषिततनुं प्रपद्ये ऽहं सुदर्शनम् ॥ 2

स्राकार सहितं मन्त्रं वदतां शत्रु निग्रहम् ।
सर्व रोग प्रशमनं प्रपद्ये ऽहं सुदर्शनम् ॥ 3

रणत् किङ्किणि जालेन राक्षसघ्नं महाद्भुतम् ।
व्याप्तकेशं विरूपाक्षं प्रपद्ये ऽहं सुदर्शनम् ॥ 4

हुंकार भैरवं भीमं प्रणतार्ति हरं प्रभुम् ।
सर्व दुष्ट प्रशमनं प्रपद्ये ऽहं सुदर्शनम् ॥ 5

फट् कारान्त मनिर्देश्यं दिव्य मन्त्रेण संयुतम् ।
शुभं प्रसन्न वदनं प्रपद्ये ऽहं सुदर्शनम् ॥ 6

एतैष्षड्भिस्स्तुतो देवः प्रसन्नः श्रीसुदर्शनः ।
रक्षां करोतु सर्वात्मा सर्वत्र विजयी भवेत् ॥



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

विश्वरूप-विराट् पुरुष ध्यानम्

(भागवते विश्वेश्वर विग्रहः)

भूः पादौ यस्य नाभि र्विय दसु रनिल श्चन्द्र सूर्यौ च नेत्रे -
कर्णावासा श्शिरो द्यौ र्मुख मपि दहनो यस्य वास्तेय मब्धिः।
अन्त स्स्थं यस्य विश्वं सुर नर खगको भोगि गन्धर्व दैत्यैः-
चित्रं रं रम्यते तं त्रिभुवन वपुषं विष्णु मीशं नमामि।।

(ओं विश्वरूप विष्णवे नमः)



पाताळ मेतस्य हि पादमूलं -
पठन्ति पार्ष्णिं प्रपदे रसातलम् ।
महातलं विश्वसृजः सु गुल्फौ -
तलातलं वै पुरुषस्य जङ्घे ॥ 1

द्वे जानुनी सुतलं विश्व मूर्तेः -
ऊरू द्वयं वितलं चातलं च ।
मही तलं तद् जघनं महीपतेः -
नमस्स्थलं नाभि सरो गृणन्ति ॥ 2

उर स्थलं ज्योति रनीक मस्य -
ग्रीवा मह र्वदनं वै जनो ऽस्य ।
तपो ललाटं विदु रादि पुम्सः-
सत्यं च शीर्षाणि सहस्र शीर्ष्णः ॥ 3

इन्द्रादयो बाहव आहु रुस्राः -
कर्णौ दिशः श्रोत्र ममुष्य शब्दः ।
नासत्य दस्रौ परमस्य नासे -
घ्राणं च गन्धो मुख मग्नि रिद्धः ॥ 4

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

द्युरक्षिणी चक्षु रभूत् पतङ्गः -
पक्षाणि विष्णो रुहनी उभे च ।
तद् भ्रू विजृम्भः परमेष्ठि धिष्ण्यं -
आपो ऽस्य तालू रस एव जिह्वा ॥ 5

छन्दां स्यनन्तस्य वचो गृणन्ति -
दंष्ट्रा ऽर्यमे न्दूडुगणा द्विजानि ।
हासो जनो न्माद करी च माया -
दुरन्त सर्गो यद पाङ्ग मोक्षः ॥ 6

व्रीडो त्तरो ष्ठाधर एव लोभो -
धर्म स्तनो धर्म पथ श्च पृष्ठः ।
कस्तस्य मेढ्रं वृषणौ च मित्रः -
कुक्षि स्समुद्रा गिरयो ऽस्थि सङ्घाः ॥ 7

नद्यो ऽस्य नाड्यो ऽथ तनूरुहाणि -
महीरुहा विश्वतनोः नृपेन्द्र।
अन्नं च वीर्यं श्वसितं मातरिश्वा -
गति र्वयः कर्म गुण प्रवाहः ॥ 8

ईशस्य केशान् विदु रम्बु वाहान् -
वास स्तु सन्ध्ये कुरु चर्य भूम्नः।
अव्यक्त माहु र्हृदयं मनश्च -
स चन्द्रमा स्सर्व विकार कोशः ॥ 9

विज्ञान शक्तिं मतिं आमनन्ति -
सर्वात्मनो ऽन्तःकरणं गिरित्रः ।
अश्वा श्वतु र्युष्ट्र गजो नखानि -
सर्वे मृगाः पशवः श्रोणि देशः ॥ 10

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



वचांसि तद् व्याकरणं विचित्रं -
मनु र्मनीषा मुनयो निवासः।
गन्धर्व विद्याधर चारणाप्सराः -
स्वराः स्मृति र्ह्यसुरा नीक वर्यः ॥ 11

ब्रह्माननं क्षत्रभुजो महात्मा -
विडूरु रङ्घ्रि श्रित कृष्ण वर्णः।
स्वाहा स्वधा वीर्य गुणोपपन्नो -
हव्यात्मकः कर्मविधान योगः॥ 12

इया नसा वीश्वर विग्रहस्य -
यस्सन्निवेशः कथितो मया ते।
सन्धार्यते ऽस्मिन् वपुषि स्थविष्ठे -
मनस् स्वबुध्या नयतो ऽस्ति किञ्चित्।। 13

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः
श्रीमते नारायणाय नमः।

श्री नारायणहृदयम् (अथर्वरहस्यान्तर्गतम्)

हरिः ओं ॥ अस्य श्री नारायणहृदय स्तोत्रमहामन्त्रस्य-भार्गव ऋषिः, अनुष्टुप्छन्दः, लक्ष्मीनारायणो देवता, नारायण प्रीत्यर्थे जपे विनियोगः ॥

करन्यासः

नारायणः परं ज्योतिः इति अङ्गुष्ठाभ्यां नमः ।
नारायणः परं ब्रह्म इति तर्जनीभ्यां नमः ।
नारायणः परो देव इति मध्यमाभ्यां नमः।
नारायणः परं धाम इति अनामिकाभ्यां नमः ।
नारायणः परो धर्म इति कनिष्ठिकाभ्यां नमः ।
विश्वं नारायणः इति करतलकरपृष्ठाभ्यां नमः ।

अङ्गन्यासः

नारायणः परं ज्योतिः इति हृदयाय नमः।
नारायणः परं ब्रह्म इति शिरसे स्वाहा ।
नारायणः परो देव इति शिखायै वौषट् ।
नारायणः परं धाम इति कवचाय हुम्।
नारायणः परो धर्म इति नेत्राभ्यां वौषट् ।
विश्वं नारायण : इति अस्त्राय फट् ।

।।ध्यानम्।।

उद्य दादित्य सङ्काशं पीत वासं चतुर्भुजम् ।
शङ्ख चक्र गदा पाणिं ध्याये लक्ष्मी पतिं हरिम्॥1॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

त्रैलोक्या धार चक्रं तदुपरि कमठं तत्र चानन्त भोगी -
तन्मध्ये भूमि पद्माङ्कुश शिखरदळं कर्णिकाभूत मेरुम् ।
तत्रत्यं शान्तमूर्तिं मणिमय मकुटं कुण्डलोद्भासिताङ्गं -
लक्ष्मीनारायणाख्यं सरसिज नयनं सन्ततं चिन्तयामः ॥ 2

अस्य श्री नारायण हृदयस्तोत्र महामन्त्रस्य - ब्रह्मा ऋषिः।

अनुष्टुप् छन्दः - नारायणो देवता - नारायण प्रीत्यर्थे जपे विनियोगः।।

नारायणः परं ज्योति रात्मा नारायणः परः ।
नारायणः परं ब्रह्म नारायण नमोऽस्तु ते ॥ 1

नारायणः परो देवो धाता नारायणः परः ।
नारायणः परो धाता नारायण नमोऽस्तु ते ॥ 2

नारायणः परं धाम ध्यानं नारायणः परः ।
नारायणः परो धर्मो नारायण नमोऽस्तु ते ॥ 3

नारायणः परो देवो विद्या नारायणः परः।
विश्वं नारायणः साक्षात् नारायण नमोऽस्तु ते ॥ 4

नारायणाद् विधिर्जातो जातो नारायणाद् भवः ।
जातो नारायणा दिन्द्रो नारायण नमोऽस्तु ते ॥ 5

रवि र्नारायणस्तेजः चन्द्रो नारायणो महः ।
वह्नि र्नारायणः साक्षात् नारायण नमोऽस्तु ते ॥ 6

नारायण उपास्यः स्याद् गुरु र्नारायणः परः।
नारायणः परो बोधो नारायण नमोऽस्तु ते ॥ 7

नारायणः फलं मुख्यं सिद्धि र्नारायणः सुखम् ।
हरि र्नारायणः शुद्धि र्नारायण नमोऽस्तु ते ॥ 8

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अथ प्रार्थना

नारायण त्वमेवासि दहराख्ये हृदि स्थितः ।
प्रेरिता प्रेर्यमाणानां त्वया प्रेरित मानसः ॥ 9

त्वदाज्ञां शिरसा कृत्वा भजामि जनपावनम् ।
नानोपासन मार्गाणां भवकृद् भावबोधकः ॥ 10

भावार्थकृद् भवातीतो भव सौख्यप्रदो मम ।
त्वन्माया मोहितं विश्वं त्वयैव परिकल्पितम् ॥ 11

त्वदधिष्ठान मात्रेण सा वै सर्वार्थ कारिणी ।
त्वमेव तां पुरस्कृत्य मम कामान् समर्थय ॥ 12

न मे त्वदन्य स्त्राताऽस्ति त्वदन्यं न हि दैवतम् ।
त्वदन्यं न हि जानामि पालकं पुण्यवर्धनम् ॥ 13

यावत् सांसारिको भावो मनस्स्थो भावनात्मकः ।
तावत्सिद्धि र्भवेत् साध्या सर्वदा सर्वदा विभो ॥ 14

पापिना मह मेकाग्रो दयाळूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत् त्रये ॥ 15

त्वयाऽहं नैव सृष्टश्चेत् न स्यात्तव दयाळुता ।
आमयो वा न सृष्टश्चेत् औषधस्य वृथोदयः ॥ 16

पापसङ्घ परिश्रान्तः पापात्मा पापरूपधृक्।
त्वदन्यः कोऽत्र पापेभ्यः त्रातास्ति जगतीतले ॥ 17

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव सेव्यश्च गुरुस्त्वमेव त्वमेव सर्वं मम देवदेव ॥ 18

प्रार्थना दशकं चैव मूलाष्टक मतः परम् ।
यः पठेच्छृणुयान्नित्यं तस्य लक्ष्मीः स्थिरा भवेत् ॥ 19

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नारायणस्य हृदयं सर्वाभीष्ट फलप्रदम्।
लक्ष्मीहृदयकं स्तोत्रं यदि चैत द्विना कृतम्॥ 20

तत्सर्वं निष्फलं प्रोक्तं लक्ष्मीः क्रुध्यति सर्वदा ।
एतत्सङ्कलितं स्तोत्रं सर्वाभीष्ट फलप्रदम् ॥ 21

जपेत् सङ्कलितं कृत्वा सर्वाभीष्ट मवाप्नुयात् ।
नारायणस्य हृदयं आदौ जप्त्वा ततः परम् ॥ 22

लक्ष्मीहृदयकं स्तोत्रं जपेन्नारायणं पुनः ।
पुनर्नारायणं जप्त्वा पुनर्लक्ष्मीनुतिं जपेत्॥ 23

तद्वत् होमादिकं कुर्यात् एतत् संकलितं शुभम् ।
एवं मध्ये द्विवारेण जपेत् सङ्कलितं शुभम् ॥ 24

लक्ष्मीहृदयके स्तोत्रे सर्वमन्यत् प्रकाशितम् ।
सर्वान् कामानवाप्नोति आधिव्याधिभयं हरेत् ॥ 25

गोप्य मेतत् सदा कुर्यात् न सर्वत्र प्रकाशयेत् ।
इति गुह्यतमं शास्त्रं प्रोक्तं ब्रह्मादिभिः पुरा ॥ 26

लक्ष्मीहृदय प्रोक्तेन विधिना साधयेत् सुधीः।
तस्मात् सर्वप्रयत्नेन साधयेत् गोपयेत् सुधीः ॥ 27

यत्रैतत्पुस्तकं तिष्ठेत् लक्ष्मीनारायणात्मकम् ।
भूतपैशाचवेताळ भयं नैव तु सर्वदा ॥ 28

भृगुवारे तथा रात्रौ पूजयेत् पुस्तकद्वयम् ।
सर्वदा सर्वदा स्तुत्यं गोपयेत् साधयेत् सुधीः ॥ 29

गोपनात् साधनाल्लोके धन्यो भवति तत्त्वतः॥ 30

इत्यथर्वरहस्ये उत्तरभागे नारायणहृदयम्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीहरेः दशावतार मूर्तयः

मत्स्यः कूर्मो वराहश्च नारसिंहो ऽथ वामनः ।
रामो रामश्च रामश्च कृष्णः कल्की च रक्षतु ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री भुवनलक्ष्मी

अरुण कमल संस्था तद्रजः पुञ्जवर्णा-
करकमल धृतेष्टा अभीति युग्मांबुजा च ।
मणिमकुट विचित्रा लङ्कृता कल्पजालैः-
भवतु भुवन माता सन्ततं श्रीः श्रियै नः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

श्रीलक्ष्मी हृदयम् (मालामन्त्रजपक्रमः)

हरिः ओं।। अस्य श्री आद्यादि श्रीमहालक्ष्मीहृदय मालामन्त्रस्य भार्गव ऋषिः-अनुष्टुबादीनि नाना छन्दांसि - आद्यादि श्रीमहालक्ष्मी सहित नारायणो देवता ॥ श्रीं बीजम्-ह्रीं शक्तिः - ऐं कीलकम् आद्यादि श्रीमहालक्ष्मी प्रसादसिद्ध्यर्थे जपे विनियोगः।।

ओं ।। आद्यादि श्रीमहालक्ष्मी देवतायै नमः हृदये। श्रीं बीजायै नमः गुह्ये। ह्रीं शक्त्यै नमः – पादयोः। ऐं बलायै नमः - मूर्धादिपादपर्यन्तं विन्यसेत् ॥ ओं श्रीं ह्रीं ऐं करतलकरपार्श्वयोः

करन्यासः	अङ्गन्यासः
ओं श्रीं अङ्गुष्ठाभ्यां नमः।	ओं श्रीं हृदयाय नमः।
ओं ह्रीं तर्जनीभ्यां नमः।	ओं ह्रीं शिरसे स्वाहा।
ओं ऐं मध्यमाभ्यां नमः।	ओं ऐं शिखायै वौषट्।
ओं श्रीं अनामिकाभ्यां नमः।	ओं श्रीं कवचाय हुम्
ओं ह्रीं कनिष्ठिकाभ्यां नमः।	ओं ह्रीं नेत्रत्रयाय वौषट्।
ओं ऐं करतलकरपृष्ठाभ्यां नमः ॥	ओं ऐं अस्त्राय फट् ।

भूर्भुवस्सुवरोम् इति दिग्बन्धः।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ध्यानम्

हस्तद्वयेन कमले धारयन्तीं स्वलीलया ।
हार नूपुर संयुक्तां लक्ष्मीं देवीं विचिन्तये ॥

इति ध्यात्वा संपूज्य -

कौशेय पीतवसनां अरविन्दनेत्रां –
पद्मद्वयाभय वरोद्यत पद्महस्ताम्।
उद्यच्छतार्क सदृशां परमाङ्कसंस्थां –
ध्यायेद् विधीश नत पादयुगां जनित्रीम् ॥

इति ध्यात्वा संपूज्य -

शङ्खचक्र गदाहस्ते शुभ्रवर्णे सुवासिनि ।
मम देहि वरं लक्ष्मि सर्वसिद्धि प्रदायिनि॥ इति संप्रार्थ्य -

ओं, श्रीं, ह्रीं, ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा ॥

इति मन्त्रं जपित्वा-पुनः पूर्ववत् हृदयादिषडंगन्यासं - कृत्वा स्तोत्रं पठेत्।। तद्यथा

वन्दे लक्ष्मीं परशिवमयीं शुद्धजाम्बूनदाभां -
तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलाङ्गीम्।
बीजापूरं कनककलशं हेमपद्मं दधानां -
आद्यां शक्तिं सकलजननीं विष्णु वामाङ्क संस्थाम्॥ 1 ॥

श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम् ।
सर्वकाम फलावाप्ति साधनैक सुखावहाम् ॥ 2 ॥

स्मरामि नित्यं देवेशि त्वया प्रेरित मानसः।
त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ॥ 3 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

समस्त सम्पत्सुखदां महाश्रियं –
समस्तकल्याणकरी महाश्रियम् ।
समस्तसौभाग्यकरीं महाश्रियं –
भजाम्यहं ज्ञानकरीं महाश्रियम् ॥ 4 ॥

विज्ञान संपत्सुखदां सनातनीं –
विचित्र वाग्भूतिकरीं मनोरमाम् ।
अनन्त सौभाग्य सुखप्रदायिनीं –
नमाम्यहं भूतिकरीं हरिप्रियाम् ॥ 5 ॥

समस्त भूतान्तर संस्थिता त्वं –
समस्त भक्तेश्वरि विश्वरूपे ।
तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु –
त्वत्पादपद्मं प्रणमाम्यहं श्रीः ॥ 6 ॥

दारिद्र्य दुःखौघ तमोनिहन्त्रि –
त्वत्पादपद्मं मयि सन्निधत्स्व ।
दीनार्ति विच्छेदन हेतुभूतैः –
कृपाकटाक्षै रभिषिञ्च मां श्रीः ॥ 7 ॥

विष्णुस्तुतिपरां लक्ष्मीं स्वर्णवर्ण स्तुतिप्रियाम् ।
वरदा भयदां देवीं वन्दे त्वां कमलेक्षणे ॥ 8 ॥

अंब प्रसीद करुणापरिपूर्णदृष्ट्या -
मां त्वत्कृपा द्रविणगेह मिमं कुरुष्व ।
आलोकय प्रणत हृद्गत शोकहन्त्रि –
त्वत्पादपद्म युगळं प्रणमाम्यहं श्रीः ॥ 9 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शान्त्यै नमोऽस्तु शरणागत रक्षणायै -
कान्त्यै नमोऽस्तु कमनीय गुणाश्रयायै।
क्षान्त्यै नमोऽस्तु दुरितक्षय कारणायै -
धात्र्यै नमोऽस्तु धनधान्य समृद्धिदायै॥ 10॥

शक्त्यै नमोऽस्तु शशिशेखर संस्थितायै -
रत्यै नमोऽस्तु रजनीकर सोदरायै ।
भक्त्यै नमोऽस्तु भवसागर तारकायै -
मत्यै नमोऽस्तु मधुसूदन वल्लभायै॥ 11 ॥

लक्ष्म्यै नमोऽस्तु शुभलक्षण लक्षितायै -
सिद्ध्यै नमोऽस्तु शिवसिद्ध सुपूजितायै ।
धृत्यै नमोऽस्तु मम दुर्गति भञ्जनायै -
गत्यै नमोऽस्तु वरसद्गति दायकायै ॥ 12 ॥

देव्यै नमोऽस्तु दिवि देवगणार्चितायै -
भूत्यै नमोऽस्तु भुवनार्तिविनाशकायै ।
शान्त्यै नमोऽस्तु धरणीधरवल्लभायै -
पुष्ट्यै नमोऽस्तु पुरुषोत्तम वत्सलायै॥ 13॥

सुतीव्र दारिद्य तमोपहन्त्र्यै -
नमोऽस्तु ते सर्व भयापहन्त्र्यै ।
श्रीविष्णु वक्षस्स्थल संस्थितायै -
नमो नमः सर्वविभूतिदायै ॥ 14 ॥

जयतु जयतु लक्ष्मी र्लक्षणा लङ्कृताङ्गी -
जयतु जयतु पद्मा पद्मसद्माभिवन्द्या।
जयतु जयतु विद्या विष्णुवामाङ्कसंस्था -
जयतु जयतु सम्यक् सर्वसंपत्करा श्रीः ॥ 15 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

जयतु जयतु देवी देवसङ्घाभिपूज्या -
जयतु जयतु भद्रा भार्गवी भाग्यरूपा।
जयतु जयतु नित्या निर्मल ज्ञानवेद्या -
जयतु जयतु सत्या सर्वभूतान्तरस्था॥16॥

जयतु जयतु रम्या रत्नगर्भान्तरस्था -
जयतु जयतु शुद्धा शुद्धजाम्बूनदाभा ।
जयतु जयतु कान्ता कान्तिमद्भासिताङ्गी -
जयतु जयतु शान्ता शीघ्रमागच्छ सौम्ये ॥17॥

यस्याः कलायाः कमलोद्भवाद्याः -
रुद्राश्च शक्र प्रमुखा श्च देवाः ।
जीवन्ति सर्वेऽपि सशक्तय स्ते –
प्रभुत्व माप्ताः परमायुषस्ते ॥ 18 ॥

(मुखबीजम्॥ ओं - ह्रां ह्रीं अं आं -यं -दुं -लं -वं)

लिलेख निटिले विधि र्मम लिपिं विसृज्यान्तरं -
त्वया विलिखितव्य मेत दिति तत्फल प्राप्तये ।
तदन्तिक फलस्फुटं कमल वासिनि श्री रिमां -
समर्पय समुद्रिकां सकलभाग्य संसूचिकाम् ॥ 19 ॥

(पादबीजम् ॥ ओं - अं - आं - ईं - एं - ऐं - कं - लं - रं)

कलया ते यथा देवि जीवन्ति सचराचराः।
तथा संपत्करे लक्ष्मि सर्वदा संप्रसीद मे ॥ 20 ॥

यथा विष्णुर्ध्रुवं नित्यं स्वकलां सन्यवेशयत्।
तथैव स्वकलां लक्ष्मि मयि सम्यक्समर्पय ॥ 21 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सत्व सौख्य प्रदे देवि भक्तानामभय प्रदे ।
अचलां कुरु यत्नेन कलां मयि निवेशिताम् ॥ 22 ॥

मुदास्तां मत्फाले परमपदलक्ष्मीः स्फुटकला -
सदा वैकुण्ठश्री र्निवसतु कला मे नयनयोः ।
वसेत्सत्ये लोके मम वचसि लक्ष्मीर्वरकला -
श्रियश्वेतद्वीपे निवसतु कला मे स्वकरयोः ॥ 23 ॥

(नेत्रबीजम् ॥ ओं - घ्रां - घ्रीं – घ्रें – घ्रैं – घ्रों - घ्रौं - घ्रं - घ्रः)-

तावन्नित्यं ममाङ्गेषु क्षीराब्धौ श्रीकला वसेत् ।
सूर्याचन्द्रमसौ यावत् तावल्लक्ष्मीपतिश्रियौ ॥ 24 ॥

सर्वमङ्गळसम्पूर्णा सर्वैश्वर्यसमन्विता ।
आद्यादिश्रीमहालक्ष्मीः त्वत्कला मयि तिष्ठतु ॥ 25 ॥

अज्ञानतिमिरं हन्तुं शुद्धज्ञानप्रकाशिका ।
सर्वैश्वर्यप्रदा मेऽस्तु त्वत्कला मयि संस्थिता ॥ 26 ॥

अलक्ष्मीं हरतु क्षिप्रं तमस्सूर्यप्रभा यथा ।
वितनोतु मम श्रेयस्त्वत्कला मयि संस्थिता ॥ 27 ॥

ऐश्वर्यमङ्गळोत्पत्तिः त्वत्कलायां निधीयते ।
मयि तस्मात्कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव ॥ 28 ॥

भवदावेशभाग्यार्हो भाग्यवानस्मि भार्गवि।
त्वत्प्रसादात्पवित्रोहं लोकमातर्नमोऽस्तु ते ॥ 29 ॥

पुनासि मां त्वत्कलयैव यस्मात् -
अत स्समागच्छ ममाग्रतस्त्वम्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

परं पदं श्री र्भव सुप्रसन्ना -
मय्यच्युतेन प्रविशा ऽदिलक्ष्मी ॥ 30 ॥

श्रीवैकुण्ठस्थिते लक्ष्मि समागच्छ ममाग्रतः ।
नारायणेन सह मां कृपादृष्ट्याऽवलोकय ॥ 31 ॥

सत्यलोकस्थिते लक्ष्मि त्वं ममागच्छ सन्निधिम्।
वासुदेवेन सहिता प्रसीद वरदा भव ॥32॥

श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते ।
विष्णुना सहिता देवि जगन्मातः प्रसीद मे ॥ 33 ॥

क्षीरांबुधि स्थिते लक्ष्मि समागच्छ समाधवे ।
त्वत्कृपा दृष्टि सुधया सततं मां विलोकय ॥ 34 ॥

रत्न गर्भे स्थिते लक्ष्मि परिपूर्ण हिरण्मयि ।
समागच्छ समागच्छ स्थित्वाऽऽशु पुरतो मम ॥ 35 ॥

स्थिरा भव महालक्ष्मि निश्चला भव निर्मले।
प्रसन्न कमले देवि प्रसन्न हृदया भव॥36॥

श्रीधरे श्री महालक्ष्मि त्वदन्तस्स्थं महानिधिम् ।
शीघ्र मुद्धृत्य पुरतः प्रदर्शय समर्पय ॥37॥

वसुन्धरे श्रीवसुदे वसुदोग्घ्रि कृपामयि ।
त्वत्कुक्षिगत सर्वस्वं शीघ्रं मे संप्रदर्शय ॥ 38 ॥

विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे ।
त्वद्गर्भगत हेमादीन् संप्रदर्शय दर्शय ॥ 39 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रसातलगते लक्ष्मि शीघ्रमागच्छ मे पुरः ।
न जाने परमं रूपं मात मे संप्रदर्शय ॥ 40 ॥

आविर्भव मनोवेगात् शीघ्र मागच्छ मे पुरः ।
मा वत्स भै रिहेत्युक्ता कामङ्गौरिव रक्ष माम् ॥ 41 ॥

देवि शीघ्रं ममागच्छ धरणीगर्भ संस्थिते।
मातस्त्वद्भृत्यभृत्योऽहं मृगये त्वां कुतूहलात् ॥ 42 ॥

उत्तिष्ठ जागृहि मयि समुत्तिष्ठ सृजागृहि ।
अक्षय्यान् हेमकलशान् सुवर्णेन सुपूरितान् ॥ 43 ॥

निक्षेपान्मे समाकृष्य समुद्धृत्य ममाग्रतः।
समुन्नताननना भूत्वा सम्यग्देहि धरातलात्॥ 44॥

मत्सन्निधिं समागच्छ मदाहितकृपा रसा ।
प्रसीद श्रेयसां दोग्ध्री लक्ष्मी मे नयनाग्रतः ॥ 45 ॥

अत्रोपविश्य लक्ष्मि त्वं स्थिरा भव हिरण्मयी ।
सुस्थिरा भव संप्रीत्या प्रसन्ना वरदा भव ॥ 46॥

आनीतांस्तु त्वया देवि निधीन्वै संप्रदर्शय ।
अद्य क्षणेन सहसा दत्वा संरक्ष मां सदा ॥ 47 ॥

मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि ।
अभयङ्कुरु मे देवि महालक्ष्मि नमोऽस्तु ते ॥ 48 ॥

समागच्छ महालक्ष्मि शुद्ध जांबूनद स्थिते।
प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ॥ 49 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी र्भुवङ्गता भासि यत्र यत्र हिरण्मयी ।
तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ॥ 50 ॥

क्रीडन्ती बहुधा भूमौ परिपूर्णकृपा मयि ।
मम मूर्धनि ते हस्तं अविलंबित मर्पय ॥ 51 ॥

फलभाग्योदये लक्ष्मि समस्त पुरवासिनि ।
प्रसीद मे महालक्ष्मि परिपूर्ण मनोरथे ॥ 52 ॥

अयोध्यादिषु सर्वेषु नगरेषु समास्थिते ।
वैभवै र्विविधै र्युक्तैः समागच्छ मुदान्विते ॥ 53 ॥

समागच्छ समागच्छ ममाग्रे भव सुस्थिरा ।
करुणारस निष्यन्द नेत्रद्वय विलासिनि ॥ 54 ॥

सन्निधत्स्व महालक्ष्मि त्वत्पाणिं मम मस्तके।
करुणासुधया मां त्वमभिषिच्य स्थिरं कुरु ॥ 55 ॥

सर्वराजगृहे लक्ष्मि समागच्छ बलान्विते ।
स्थित्वाऽऽशु पुरतो मेऽद्य प्रसादेनाभयं कुरु ॥ 56 ॥

सादरं मस्तके हस्तं मम त्वं कृपयाऽर्पय।
सर्वराजस्थिते लक्ष्मि त्वत्कला मयि तिष्ठतु ॥ 57 ॥

आद्यादि श्रीमहालक्ष्मि विष्णुवामाङ्क संस्थिते।
प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ॥ 58 ॥

प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे ।
अचला भव सुप्रीता सुस्थिरा भव मद्गृहे ॥ 59 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यावत्तिष्ठन्ति वेदाश्च यावच्चन्द्र दिवाकरौ।
यावद्विष्णुश्च यावत्त्वं तावत्कुरु कृपां मयि ॥ 60 ॥

चान्द्री कला यथा शुक्ले वर्धते सा दिने दिने ।
तथा दया ते मय्येव वर्धता मभिवर्धताम् ॥ 61 ।

यथा वैकुण्ठनगरे यथा वै क्षीरसागरे ।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥ 62 ॥

योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना ।
तथा मद्भवने तिष्ठ स्थिरं श्रीविष्णुना सह ॥ 63 ॥

नारायणस्य हृदये भवती यथास्ते
नारायणोऽपि तव हृत्कमले यथास्ते ।
नारायणस्त्वमपि नित्यविभू तथैव
तौ तिष्ठतां हृदि ममापि दयान्वितौ श्रीः ॥ 64 ॥

विज्ञानवृद्धिं हृदये कुरु श्रीः
सौभाग्यवृद्धिं कुरु मे गृहे श्रीः ।
दयासुवृष्टिं कुरुतां मयि श्रीः
सुवर्णवृष्टिं कुरु मे करे श्रीः ॥ 65 ॥

न मां त्यजेथाः श्रितकल्पवल्लि
सद्भक्ति चिन्तामणि कामधेनो ।
न मां त्यजेथा भव सुप्रसन्ने
गृहे कळत्रेषु च पुत्रवर्गे ॥ 66 ॥

(कुक्षिबीजम् ॥ ओं -अं -आं -ईं -एं -ऐं)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आद्यादिमाये त्वमजाण्डबीजं –
त्वमेव साकार निराकृती त्वम् ।
त्वया धृताश्चाब्ज भवाण्ड सङ्घाः –
चित्रं चरित्रं तव देवि विष्णोः ॥ 67 ॥

ब्रह्म रुद्रादयो देवा वेदा श्चापि न शक्नुयुः ।
महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम् ॥ 68 ॥

अंब त्वद्वत्स वाक्यानि सूक्तासूक्तानि यानि च ।
तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम् ॥ 69

भवन्तं शरणं गत्वा कृतार्थास्स्युः पुरातनाः ।
इति सञ्चिन्त्य मनसा त्वामहं शरणं व्रजे ॥ 70 ॥

अनन्ता नित्यसुखिन स्त्वद्भक्ता स्त्वत्परायणाः ।
इति वेदप्रमाणाद्धि देवि त्वां शरणं व्रजे ॥ 71 ॥

तव प्रतिज्ञा मद्भक्ता न नश्यन्तीत्यपि क्वचित् ।
इति सञ्चिन्त्य सञ्चिन्त्य प्राणान् सन्धारयाम्यहम् ॥ 72 ॥

त्वदधीनस्त्वहं मातः त्वत्कृपा मयि विद्यते ।
यावत्सम्पूर्णकामः स्यां तावद्देहि दयानिधे ॥ 73 ॥

क्षणमात्रं न शक्नोमि जीवितुं त्वत्कृपां विना ।
न हि जीवन्ति जलजा जलं त्यक्त्वा जलाश्रयाः ॥ 74 ॥

यथा हि पुत्रवात्सल्यात् जननी प्रस्तुतस्तनी ।
वत्सं त्वरित मागत्य संप्रीणयति वत्सला ॥ 75 ॥

यदि स्यात्तव पुत्रोऽहं माता त्वं यदि मामकी ।
दया पयोधर स्तन्य सुधाभि रभिषिञ्च माम् ॥ 76 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मृग्यो न गुणलेशोऽपि मयि दोषैकमन्दिरे ।
पांसूनां वृष्टिबिन्दूनां दोषाणाञ्च न मे मतिः ॥77॥

पापिना मह मेकाग्रो दयालूनां त्वमग्रणीः ।
दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ 78 ॥

विधिनाहं न सृष्टश्चेत् न स्यात्तव दयालुता ।
आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ॥ 79 ॥

कृपा मदग्रजा किं ते अहं किं वा तदग्रजः ।
विचार्य देहि मे वित्तं तव देवि दयानिधे ॥ 80 ॥

माता पिता त्वं गुरु सद्गति श्रीः -
त्व मेव सञ्जीवन हेतु भूता ।
अन्यं न मन्ये जगदेक नाथे -
त्वमेव सर्वं मम देवि सत्यम्॥81॥

॥ हृदयबीजम् ॥

(ओं - घ्रां - घ्रीं - घ्रूं - घ्रैं – घ्रौं - घ्रः - हुं फट् कुरु कुरु स्वाहा॥)

आद्यादिलक्ष्मी र्भव सुप्रसन्ना –
विशुद्ध विज्ञान सुखैक दोग्घ्रि ।
अज्ञानहन्त्री त्रिगुणातिरिक्ता
प्रज्ञान नेत्री भव सुप्रसन्ना ॥ 82 ॥

अवेषवाग्जाड्य मलापहन्त्री
नवं नवं सुष्ठु सुवाक्य दायिनी ।
ममैव जिह्वाग्र सुरङ्ग वर्तिनी –
भव प्रसन्ना वदने च मे श्रीः ॥ 83॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

समस्त संपत्सु विराज माना -
समस्त तेजस्सु विभास माना ।
विष्णुप्रिये त्वं भव दीप्य माना -
वाग्देवता मे वदने प्रसन्ना ॥ 84 ॥

सर्वप्रदर्शे सकलार्थदे त्वं -
प्रभासु लावण्य दयाप्रदोग्घ्रि ।
सुवर्णदे त्वं सुमुखी भव श्रीः -
हिरण्मयी मे नयने प्रसन्ना ॥ 85॥

सर्वार्थदा सर्व जगत्प्रसूतिः -
सर्वेश्वरी सर्व भयापहन्त्री ।
सर्वोन्नता त्वं सुमुखी च नः श्रीः-
हिरण्मयी मे भव सुप्रसन्ना ॥ 86 ॥

समस्त विघ्नौघ विनाश कारिणी -
समस्त भक्तो द्धरणे विचक्षणा ।
अनन्त संमोद सुख प्रदायिनी -
हिरण्मयी मे नयने प्रसन्ना ॥ 87 ॥

देवि प्रसीद दयनीय तमाय मह्यं -
देवाधिनाथ भव देवगणादि वन्द्ये ।
मात स्तथैव भव सन्निहिता दृशो र्मे
पत्या समं मम मुखे भव सुप्रसन्ना ॥ 88॥

मा वत्स भैरभय दान करोर्पित स्ते -
मौळौ ममेति मयि दीन जनानुकम्पे ।
मातः समर्पय मुदा करुणाकटाक्षं -
माङ्गल्यबीज मिह नः सृज जन्म मातः ॥ 89 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

(कण्ठबीजम् ॥ ओं - श्रां - श्रीं - श्रूं - श्रैं - श्रौं - श्रं - श्राः)

कटाक्ष इह कामधुक् तव मनस्तु चिन्तामणिः -
कर स्सुरतरुः सदा नवनिधि स्त्वमे वेन्दिरे ।
भवे त्तव दया रसो रस रसायन चान्वहं -
मुखं तव कलानिधि र्विविध वाञ्छितार्थप्रदम् ॥ 90 ॥

यथा रस स्पर्शनतो ऽयसोऽपि -
सुवर्णता स्यात् कमले तथा ते।
कटाक्ष सं स्पर्शनतो जनानां -
अमङ्गळाना मपि मङ्गळत्वम्॥ 91 ॥

देही ति नास्ती ति वचः प्रवेशात् -
भीतो रमे त्वां शरणं प्रपद्ये ।
अतः सदा स्मिन्न भयप्रदा त्वं -
सहैव पत्या मम सन्निधेहि ॥ 92 ॥

कल्पद्रुमेण मणिना सहिता सुरम्या -
श्रीस्ते कलामयि रसेन रसायनेन ।
आस्तामतो मम च दृक्करपाणिपाद -
स्पृष्ट्या सुवर्णवपुषः स्थिरजङ्गमाः स्युः ॥93॥

(आद्यादि विष्णोः स्थिर धर्मपत्नि -
त्व मंब पत्या मम सन्निधेहि ।
आद्यादि लक्ष्मित्व दनुग्रहेण -
पदे पदे मे निधि दर्शनं स्यात् ॥ 94 ॥

आद्यादिलक्ष्मीहृदयं पठेद्यः -
स राज्यलक्ष्मी मचलां तनोति ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महादरिद्रोऽपि भवेद्धनाढ्यः -
तदन्वये श्रीः स्थिरतां प्रयाति ॥ 95 ॥

यस्य स्मरणमात्रेण तुष्टा स्या द्विष्णुवल्लभा ।
तस्या भीष्टं ददात्याशु तं पालयति पुत्रवत् ॥ 96॥

इदं रहस्यं हृदयं सर्व काम फलप्रदम्।
जपः पञ्च सहस्त्रं तु पुरश्चरण मुच्यते ॥ 97॥

त्रिकाल मेक कालं वा नरो भक्ति समन्वितः ।
यः पठेत् श्रुणुयाद् वा ऽपि स याति परमां श्रियम् ॥ 98 ॥

महालक्ष्मीं समुद्दिश्य निशि भार्गव वासरे।
इदं श्रीहृदयं जप्त्वा पञ्चवारं धनी भवेत् ॥ 99 ॥

अनेन हृदये नान्नं गर्भिण्या अभिमन्त्रितम्।
ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयम् ॥ 100 ।

नरेणा प्यथवा नार्या लक्ष्मीहृदय मन्त्रिते।
जले पीते च तद्वंशे मन्दभाग्यो न जायते ॥ 101 ॥

य आश्वयुङ् मासि च शुक्लपक्षे -
रमोत्सवे सन्निहिते च भक्त्या ।
पठेत् तथै कोत्तर वार वृध्या -
लभेत सौवर्ण मयीं सु वृष्टिम् ॥ 102 ॥

य एक भक्त्या ऽन्वह मेक वर्ष -
विशुद्ध धीः सप्तति वार जापी ।
स मन्द भाग्यो ऽपि रमा कटाक्षाद् -
भवेत् सहस्राक्ष शताधिक श्रीः ॥ 103 ॥

श्रीशाङ्गि भक्तिं हरिदास दास्यं -
प्रसन्न मन्त्रार्थ दृढैक निष्ठाम् ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गुरो स्स्मृतिं निर्मल बोध बुद्धिं -
प्रदेहि मातः परमं पदं श्रीः ॥ 104 ॥

पृथ्वी पतित्वं पुरुषोत्तमत्वं
विभूतिवासं विविधार्थ सिद्धिम्।
सम्पूर्ण कीर्तिं बहुवर्ष भोगं
प्रदेहि मे लक्ष्मि पुनः पुन स्त्वम्॥105॥

वादार्थ सिद्धिं बहुलोक वश्यं -
वयःस्थिरत्वं ललनासु भोगम् ।
पौत्रादि लब्धिं सकलार्थ सिद्धिं -
प्रदेहि मे भार्गवि जन्म जन्मनि ॥ 106 ॥

सुवर्ण वृद्धिं कुरु मे गृहे श्रीः -
सुधान्य वृद्धिं कुरु मे गृहे श्रीः ।
कल्याण वृद्धिं कुरु मे गृहे श्रीः -
विभूति वृद्धिं कुरु मे गृहे श्रीः ॥ 107 ॥

(शिरोबीजम् ॥ ओं - यं - हं - कं - लं - प्रं - श्रीं)

ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासां -
विद्युद्वर्णा म्बर वर धरां भूषणाढ्यां सुशोभाम् ।
बीजापूरं सरसिज युगं बिभ्रतीं स्वर्णपात्रं -
भर्त्रा युक्तां मुहु रभयदा मह्यम प्यच्युत श्रीः ॥ 108॥

गुह्याति गुह्य गोप्त्रीत्वं गृहाणास्मत्कृतं जपम्।
सिद्धि र्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा।।

इति जपं श्रियै समर्पयेत्।।

इति अथर्वणहस्ये उत्तरखण्डे लक्ष्मीहृदयं सम्पूर्णम्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलात्मिका कवचम् (तान्त्रिकम्)

अस्याःचतुरक्षरा विष्णुवनितायाः कवचस्य श्रीभगवान् शिव ऋषिः अनुष्टुप छन्दः- वाग्भवा देवता-वाग्भवं (ऐं) बीजं। (ह्रीं) लज्जा शक्तिः। (श्रीं) रमा कीलकं क्लीं कामबीजात्मकं कवचं मम सुकवित्व सुपाण्डित्य सर्वसिद्धिसमृद्धये च जपे विनियोगः ॥

अथ वक्ष्ये महेशानि कवचं सर्वकामदम्।
यस्य विज्ञान मात्रेण भवेत्साक्षात् सदाशिवः ॥ १ ॥

नार्चनं तस्य देवेशि मन्त्रमात्रं जपन्नरः।
स भवेत्पार्वतीपुत्रः सर्व शास्त्र पुरस्कृतः ॥ २ ॥

विद्यार्थिनां सदा सेव्या धनदात्री विशेषतः।
धनार्थिभि स्सदा सेव्या कमला विष्णुवल्लभा ।। ३ ।।

ऐंङ्कारा मस्तके पातु वाग्भवा सर्वसिद्धिदा।
ह्रीं पातु चक्षुषो र्मध्ये चक्षुर्युग्मे च शाङ्करी ॥ ४ ॥

जिह्वायां मुखवृत्ते च कर्णयो र्गण्डयो र्नसि।
ओष्ठाधारे दन्तपंक्तौ तालुमूले हनौ पुनः ॥ ५ ॥

पातु मां विष्णुवनिता लक्ष्मीः श्री वर्ण रूपिणी।
कर्णयुग्मे भुजद्वन्द्वे स्तनद्वन्द्वे च पार्वती ॥ ६ ॥

हृदये मणिबन्धे च ग्रीवायां पार्श्वयोर्द्वयोः।
पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा ॥ ७ ॥

उपस्थे च नितम्बे च नाभौ जङ्घाद्वये पुनः।
जानुचक्रे पदद्वन्द्वे घुटिके ऽङ्गुलि मूलके ॥ ८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

स्वधा तु प्राणशक्त्यात्म सीमन्ते मस्तके पुनः ।
विजया पातु भवने जया पातु सदा मम ॥ ९

सर्वाङ्गे पातु कामेशी महादेवी सरस्वती ।
तुष्टिः पातु महामाया उत्कृष्टिः सर्वदा ऽवतु ॥ १० ॥

ऋद्धिः पातु महादेवि सर्वत्र शम्भुवल्लभा ।
वाग्भवी सर्वदा पातु पातु मां हरिगेहिनी ॥ ११ ॥

रमा पातु महादेवी पातु माया स्वराट् स्वयम् ।
सर्वाङ्गे पातु मां लक्ष्मी विष्णुमाया सुरेश्वरी । 12

शिवदूती सदा पातु सुन्दरी पातु सर्वदा ।
भैरवी पातु सर्वत्र भेरुण्डा सर्वदा ऽवतु ॥ १३ ॥

त्वरिता पातु मां नित्यं उग्रतारा सदा ऽवतु ।
पातु मां कालिका नित्यं कालरात्रिः सदा ऽवतु ॥ १४ ॥

नवदुर्गा सदा पातु कामाख्या सर्वदा ऽवतु ।
योगिन्यः सर्वदा पान्तु मुद्राः पान्तु सदा मम ॥ १५॥

मात्राः पान्तु सदा देव्यः चक्रस्था योगिनी गणाः ।
सर्वत्र सर्व कार्येषु सर्व कर्मसु सर्वदा ॥ १६ ॥

पातु मां देवदेवी च लक्ष्मीः सर्व समृद्धिदा ।
इति ते कथितं दिव्यं कवचं सर्व सिद्धये ॥ १७ ॥

यत्र तत्र न वक्तव्यं यदीच्छे दात्मनो हितम् ।
शठाय भक्तिहीनाय निन्दकाय महेश्वरि ॥ १८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

न्यूनाङ्गं ह्यतिरिक्ताङ्गं दर्शयेन्न कदाचन ।
न स्तवं दर्शये द्दिव्यं दर्शनात् शिवहा भवेत् ॥ १९ ॥

कुलीनाय महेच्छाय दुर्गाभक्ति पराय च ।
वैष्णवाय विशुद्धाय दद्यात् कवच मुत्तमम् ॥ २० ॥

निज शिष्याय शान्ताय धनिने ज्ञानिने तथा ।
दद्यात् कवच मित्युक्तं सर्वतन्त्र समन्वितम् ॥ २१ ॥

शनौ मंगळवारे च रक्तचंदनकै स्तथा ।
यावकेन लिखेन्मन्त्रं सर्वतन्त्र समन्वितम् ॥ २२ ॥

विलिख्य कवचं दिव्यं स्वयम्भु कुसुमैः शुभैः ।
स्वशुक्रः परशुक्रैर्वा नाना गन्ध समन्वितैः ॥ २३ ॥

गोरोचना कुंकुमेन रक्तचंदनकेन वा ।
सुतिथौ सुभयोगे वा श्रवणायां रवे र्दिने ॥ २४ ॥

अश्विन्यां कृत्तिकायां वा फल्गुन्यां वा मघासु च ।
पूर्वभाद्रपदायोगे स्वात्यां मंगलवासरे ॥ २५ ॥

विलिखेत् पठेत् स्तोत्रं शुभयोगे सुरालये ।
आयुष्मत् प्रीतियोगे च ब्रह्मयोगे विशेषतः ॥ २६ ॥

इन्द्रयोगे शुभे योगे शुक्रयोगे तथैव च ।
कौलके बालके चैव वणिजे चैव सत्तमः ॥ २७ ॥

शून्यागारे श्मशाने वा विजने च विशेषतः ।
कुमारीं पूजयित्वा च यजेद्द देवीं सनातनीम् ॥ २८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मत्स्यै मांसैः शाकसूपैः पूजयेत् परदेवताम् ।
घृताद्यैः सोपकरणैः पुष्पधूपै र्विशेषतः ॥ २९ ॥

ब्राह्मणान् भोजयित्वा च पूजये त्परमेश्वरीम् ।
आखेटक मुपाख्यानं तत्र कुर्याद् दिन त्रयम् ॥ ३० ॥

तदा धरेन्महाविद्यां शङ्करेण प्रभाषिताम् । (तदा कुर्यान्महारक्षां)
मारण द्वेषणादीनि लभते नात्र संशयः ॥ ३१ ॥

स भवेत् पार्वतीपुत्रः सर्वशास्त्र पुरस्कृतः ।
गुरु र्देवो हरः साक्षात् पत्नी तस्य हरप्रिया ॥ ३२ ॥

अभेदन भजेद् यस्तु तस्य सिद्धि रदूरतः ॥ ३३ ॥

पठति य इह मर्त्यो नित्य मार्द्रान्तरात्मा -
जपफल मनुमेवं लक्ष्यते सद्विधेयम्।
स भवति पद मुच्चैः सम्पदां पादनम्र –
क्षितिप मुकुट लक्ष्मीं लक्षणानां चिराय ॥

।। इति विश्वसारतन्त्रे कमलात्मिका लक्ष्मी कवचं सम्पूर्णम्॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मीनाम पञ्जरम् । (कवचस्तोत्रम्)

ओं श्रीं श्रियै नमः - ओं

शिरो मे रक्षताद् देवी पद्मा पङ्कज धारिणी ।
फालं पातु जगन्माता लक्ष्मी पद्मालया च मे ॥ १ ॥

मुखं पायान् महामाया दृशौ मे भृगु कन्यका ।
घ्राणं सिन्धु सुता पायान् नेत्रे मे विष्णु वल्लभा ॥ २ ॥

कण्ठं रक्षतु कौमारी स्कन्धौ पातु हरि प्रिया ।
हृदयं मे सदा रक्षेत् सर्वशक्ति विधायिनी ॥ ३ ॥

नाभिं सर्वेश्वरी पायात् सर्वभूतालया च मे ।
कटिं च कमला पातु ऊरू ब्रह्मादि देवता ॥ ४ ॥

जङ्घे जगन्मयी रक्षेत् पादौ सर्व सुखा वहा ।
श्रीबीज वास निरता सर्वाङ्गे जनकात्मजा ॥ ५ ॥

सर्वतोभद्र रूपा मां अव्याद् दिक्षु विदिक्षु च ।
विषमे सङ्कटे दुर्गे पातु मां व्योम वासिनी ॥ ६ ॥

इतीदं पञ्जरं लक्ष्म्याः गुह्याद् गुह्यतरं महत् ।
गोपनीयं प्रयत्नेन न दद्याद् यस्य कस्य च ॥ ७ ॥

यः पठेत् प्रयतो नित्यं फलाहारी जितेन्द्रियः ।
ध्याये ल्लक्ष्मीपदं प्रीत्या तस्य किञ्चिन् न दुर्लभम् ॥ ८ ॥

विष्णो र्नाम्नां सहस्रेण संपुटीकृत्य यः पठेत् ।
पञ्चायुत प्रयत्नेन स सिद्ध स्स्यात् यथा हरिः ॥ ९ ॥

बिल्वपीठे लिखेत् यन्त्रं षट्कोणं मन्त्र संयुतं ।
तत्र सम्पूजयन् देवीं तदग्रे पाठ माचरेत् ॥ १० ॥

हरिद्रा मालया सङ्ख्यां कुर्वन् नित्यं अतमतन्द्रितः ।
सर्व सिद्धि मवाप्नोति यद्यद् वाञ्छति सत्वरम् ॥ ११ ॥

॥ इति श्री अथर्वण रहस्ये लक्ष्मी पञ्जरं स्तोत्रं समाप्तम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री हृदयम्
(सद्य:फलदा लक्ष्मीस्तव हृदयम्)

श्रीमत् सौभाग्य जननीं स्तौमि लक्ष्मीं सनातनीम् ।
सर्वं काम फला वाप्ति साधनैक सुखा वहाम् ॥ 1

श्रीवैकुण्ठ स्थिते लक्ष्मि समागच्छ ममा ग्रतः ।
नारायणेन सह मां कृपा दृष्ट्या ऽवलोकय ॥ 2

सत्यलोक स्थिते लक्ष्मि त्वं समागच्छ सन्निधिम् ।
वासुदेवेन सहिता प्रसीद वरदा भव ॥ 3

श्वेतद्वीप स्थितेलक्ष्मि शीघ्र मागच्छ सुव्रते ।
विष्णुना सहिते देवि जगन्मातः प्रसीद मे ॥ 4

क्षीराब्धि संस्थिते लक्ष्मि समागच्छ समाधवे ।
त्वत्कृपा दृष्टि सुधया सततं मां विलोकय ॥ 5

रत्नगर्भे स्थिते लक्ष्मि परिपूर्णे हिरण्मयि ।
समागच्छ समागच्छ स्थित्वा सुपुरतो मम ॥ 6

स्थिरा भव महालक्ष्मि निश्चला भव निर्मले ।
प्रसन्ने कमले देवि प्रसन्ना वरदा भव ॥ 7

श्रीधरे श्री महा भूते त्वदन्तस्थ महानिधिम् ।
शीघ्र मुद्धृत्य पुरतः प्रदर्शय समर्पय ॥ 8

वसुन्धरे श्री वसुधे वसुदोग्धे कृपामयि ।
त्वत् कुक्षिगतं सर्वस्वं शीघ्रं मे त्वं प्रदर्शय ॥ 9

विष्णुप्रिये रत्नगर्भे समस्त फलदे शिवे ।
त्वद्गर्भ गत हेमादीन् सम्प्रदर्शय दर्शय ॥ 10

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अत्रोपविश्य लक्ष्मि त्वं स्थिरा भव हिरण्मयि ।
सुस्थिरा भव सुप्रीत्या प्रसन्ना वरदा भव ॥ 11

सादरे मस्तकं हस्तं मम ते कृपया(अ)र्पय ।
सर्व राजगृहे लक्ष्मि त्वत्कला मयि तिष्ठतु ॥ 12

यथा वैकुण्ठ नगरे यथैव क्षीर सागरे ।
तथा मद्भवने तिष्ठ स्थिरं श्री विष्णुना सह ॥ 13

आद्यालक्ष्मि महालक्ष्मि विष्णु वामाङ्क संस्थिते ।
प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ॥ 14

समागच्छ महालक्ष्मि धन धान्य समन्विते ।
प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ॥ 15

कल्याणवृद्धिं कुरु में गृहे श्रीः -
सुधान्यवृद्धिं कुरु में गृहे श्रीः।
विभूति वृद्धिं कुरु में गृहे श्रीः -
सुवर्णदृष्टिं कुरु में गृहे श्रीः ।। 16

महालक्ष्मीं समुद्दिश्य निशि भार्गव वासरे।
इदं श्री हृदयं जप्त्वा शतवारं धनी भवेत् ॥

।। इति श्री सद्यःफलदालक्ष्मी श्रीहृदयं समाप्तम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलात्मिकोपनिषत्

अथ लोकान् पर्यटन् सनत्कुमारो ह वैदेहः। पुण्यचिताल्लौका नतीत्य वैष्णवं धाम दिव्य गणोपेतम्। विद्रुम वेदिका मणि मुक्ता गणार्चितं प्राप। तत्रापश्यन् महामायां पराद्धर्य वस्त्राभरणोत्तरीयां पर्यङ्कस्थां पारे चरन्ती मादिदेवं भगवन्तं परमेश्वरं दृष्ट्वा च तां गद्गदवाक् प्रफुल्लरोमा स्तोतु मुपचक्रमे।।

वाचं मे दिशतु श्रीर्देवी मनो मे दिशतु वैष्णवी। ओजस्तेजो बलं दाक्ष्यं बुद्धे वैंभव मस्तु मे।। त्वत्प्रसादाद् भगवति प्रज्ञानं मे ध्रुवं भवेत्। शन्नो दिशतु श्रीदेवी महामाया। वैष्णवी शक्तिराद्या यामा साद्य स्वय मादिदेवो भगवान् परवरज्ञ स्त्रिधा सम्भिन्नो लोकांस्त्रीन् सृजत्यवत्यति च। यद् भ्रूविक्षेप बलमापन्नो ह्यब्जयोनि स्तदितरे चामरा मुख्याः सृष्टिचक्र प्रणेतारः सम्बभूवुः या वे वरदा स्वोपायां सुप्रसन्ना सुखयति सहस्त्रपुरुषान् ये लोकाः सन्तत मानमन्ति शिरसा हृदयेन च ता मेकां लोकपूज्यां न ते दुर्गतिं यान्ति भूताः।।

अथ महत्या सम्वृघ्या साम्राज्येन पुत्रैः पौत्रै रन्वितो भूमिपृष्ठे शतं समास्त इज्याभि रिष्ट्वा देवान् पितृन् मनुष्यानथ भूरि दक्षिणाभि स्त्वत्प्रसादा न्महान्तो गच्छन्ति वैष्णवं लोक मपुनर्भवाय ये राजर्षयो ब्रह्मर्षय स्तेऽपि चासकृत् त्वां प्रागसन्त एव सुख मामनन्ति नान्यः पन्था विद्यते ऽयनाय किं पुनरिहादिदेवो भगवान् नारायण स्त्वा माधिदेवाखिलं करोति। किं वर्णये त्वां सहस्त्रकृत्वो नमस्ते।।

य इमा ऋचः पठन्ति प्रातरुत्थाय भूरि दान तेषां किञ्चिदिह यावशिष्टत्यदैश्वर्यं दुर्लभं प्राणिनां हि।।

।। इति कमलात्मिकोपनिषत् सम्पूर्णा।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री सूक्तम्

हिरण्यवर्णां हरिणीं सुवर्ण रजत स्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥१॥

ताम्म आवह जातवेदो लक्ष्मी मनप गामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वै पुरुषानहम् ॥२॥

अश्व पूर्णां रथ मध्यां हस्ति नाद प्रमोदिनीम् ।
श्रियन्देवी मुपह्वये श्री र्मां देवी जुंषताम् ॥३॥

कां सोस्मि तां हिरण्य प्राकारा मार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामि होपह्वये श्रियम् ॥४॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टा मुदाराम् ।
तां पद्मनेमिं शरण महं प्रपद्ये अलक्ष्मी र्मे नश्यतां त्वां वृणे ॥५॥

आदित्यवर्णे तपसोधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तु मायान्त रायाश्च बाह्या अलक्ष्मीः ॥६॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रे ऽस्मिन् कीर्तिं वृद्धिं ददातु मे ॥७॥

क्षुत्पिपासा ऽमलां ज्येष्ठां अलक्ष्मी र्नाशयाम्यहम् ।
अभूति मसमृद्धिं च सर्वा न् निर्णुद मे गृहात् ॥८॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९॥

मनसः काम माकूतिं वाचः सत्य मशीमहि ।
पशूनां रूप मन्नस्य मयि श्रीः श्रयतां यशः ॥१०॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्म मालिनीम् ॥ ११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १३ ॥

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्म मालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह।। ॥ १४ ॥

ताम्म आवह जातवेदो लक्ष्मी मनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पूरुषा नहम् ॥ १५ ॥

यः शुचिः प्रयतो भूत्वा जुहुया दाज्य मन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥

।।इति श्री सूक्तं।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सिद्धलक्ष्मी मन्त्रस्तोत्रम् (ईश्वर प्रोक्तम्)

ओं अस्य श्री सिद्धलक्ष्मी स्तोत्रमन्त्रस्य हिरण्यगर्भ ऋषिः। अनुष्टुप् छन्दः। श्री महाकाली महालक्ष्मी महा सरस्वत्यो देवताः। श्रीं बीजं ह्रीं शक्तिः - क्लीं कीलकम् – मम – सर्वक्लेश-पीडा परिहारार्थं – सर्वदुःख दारिद्र्य नाशनार्थं सर्वकार्य सिद्ध्यर्थं च श्री सिद्धलक्ष्मी स्तोत्रपाठे विनियोगः।

ऋष्यादि न्यासः

ओं हिरण्यगर्भ ऋषये नमः - शिरसि।

ओं अनुष्टुप् छन्दसे नमः - मुखे।

ओं श्री महाकाली महालक्ष्मी महासरस्वती देवताभ्यो नमः - हृदये।

ओं श्रीं बीजाय नमः - गुह्ये (लिङ्गे)।

ओं ह्रीं शक्तये नमः - पादयोः।

ओं क्लीं कीलकाय नमः - नाभौ।

ओं श्रीमन्त्र विनियोगाय नमः - सर्वाङ्गे।

करन्यासः	अङ्गन्यासः
ओं – श्रीं सिद्धलक्ष्म्यै –अङ्गुष्ठाभ्यां नमः।	ओं श्रीं सिद्धलक्ष्म्यै हृदयाय नमः
ओं ह्रीं विष्णुतेजसे तर्जनीभ्यां नमः।	ओं ह्रीं विष्णुतेजसे शिरसे स्वाहा
ओं क्लीं अमृतानन्दायै मध्यमाभ्यां नमः।	ओं क्लीं अमृतानन्दायै शिखायै वषट्।
ओं श्रीं दैत्यमारिन्यै –अनामिकाभ्यां नमः।	ओं श्रीं दैत्यमारिण्यै – कवचाय हुम्।
ओं ह्रीं तेजःप्रकाशिन्यै – कनिष्ठिकाभ्यां नमः।	ओं ह्रीं तेजःप्रकाशिन्यै नेत्रत्रयाय वौषट्।
ओं क्लीं ब्राह्म्यै वैष्णव्यैरुद्राण्यै – करतलकरपृष्ठाभ्यां नमः।	ओं क्लीं ब्राह्म्यै वैष्णव्यै रुद्राण्यै – अस्त्राय फट्

ओं श्रीं ह्रीं क्लीं श्रीं सिद्धलक्ष्म्यै नमः - इति मन्त्रेण तालत्रयं दिग्बन्धनं च कुर्यात्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सिद्धलक्ष्मी ध्यानम्।

ब्राह्मीं च वैष्णवीं भद्रां षड्भुजां च चतुर्मुखीम् ।
त्रिनेत्रां खड्ग शूलाभी पद्म चक्र गदा धराम् ।
पीताम्बरधरां देवीं नानालङ्कार भूषिताम् ।
तेजःपुञ्जधरीं श्रेष्ठां ध्यायेत् बाल कुमारिकाम् ।।

इति ध्यात्वा – स्तोत्रं पठेत्। तथाच-

ओंकारं लक्ष्मीरूपं तु विष्णुं हृदय मव्ययम्।
विष्णु मानन्द मव्यक्तं ह्रींकारं बीजरूपिणीम्।
क्लींअमृतानन्दिनीं भद्रां सदात्यानन्द दायिनीम्।
श्रीं दैत्यशमनीं शक्तिं मालिनीं शत्रुमर्दिनीम्।।
तेजः प्रकाशिनीं देवीं वरदां शुभकारिणीम्।
ब्राह्मीं च वैष्णवीं रौद्रीं कालिकारूप शोभिनीम्।
अकारे लक्ष्मी रूपं तु उकारे विष्णु मव्ययम्।। (ध्यायेत)
मकारः पुरुषोऽव्यक्तो देवी प्रणव उच्यते।
सूर्यकोटि प्रतीकाशं चन्द्रकोटि समप्रभम्।।
तन्मध्ये निष्कलं सूक्ष्मं ब्रह्मरूपं व्यवस्थितम्।
ओंकारं परमानन्दं सदैव सुखसुन्दरीम्।।
सिद्धलक्ष्मि मोक्षलक्ष्मि आद्यलक्ष्मि नमोऽस्तुते।
सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके।।
शरण्ये त्र्यम्बके गौरि नारायणि नमाऽस्तुते।
प्रथमं त्र्यम्बका गौरी द्वितीयं वैष्णवी तथा।।
तृतीयं कमला प्रोक्ता चतुर्थं सुन्दरी तथा।
पञ्चमं विष्णुशक्तिश्च षष्ठं कात्यायनी तथा।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वाराही सप्तमं चैव ह्यष्टमं हरिवल्लभा।
नवमं खड्गिनी प्रोक्ता दशमं चैव देविका।।
एकादशं सिद्धलक्ष्मीः द्वादशं हंसवाहिनी।
एतत् स्तोत्रवरं देव्याः ये पठन्ति सदा नरः।।
सर्वापद्भ्यो विमुच्यन्ते नात्र कार्या विचारणा।
एकमासं द्विमासं च त्रिमासं माश्चतुष्टयम्।।
पञ्चमासं च षण्मासं त्रिकालं यः सदा पठेत्।
ब्राह्मणः क्लेशितो दुःखी दारिद्र्यायमयपीडितः।।
जन्तान्तर सहस्रोत्थैः मुच्यते सर्व किल्बिषैः।
दरिद्रो लभते लक्ष्मीं अपुत्रःपुत्रवान् भवेत्।।
धन्यो यशस्वी शत्रुघ्नो वह्नि चौर भयेषु च।
शाकिनी भूत वेताल सर्प व्याघ्र निपातने।।
राजद्वारे सभास्थाने कारागृह निबन्धने।
ईश्वरेण कृतं स्तोत्रं प्राणिनां हितकारकम्।।
स्तुवन्तु ब्राह्मणा नित्यं दारिद्र्यं न च बाधते।
सर्वपापहरा लक्ष्मी सर्वसिद्धि प्रदायिनी।।

(इति ब्रह्मपुराणे ईश्वरविष्णुसंवादे
श्री सिद्धलक्ष्मी मन्त्रस्तोत्रविधानं समाप्तम्)



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमला अष्टोत्तरशत नामस्तोत्रम्

शिव उवाच-

शतमष्टोत्तरं नाम्नां कमलायाः वरानने ।
प्रवक्ष्या म्यतिगुह्यं हि न कदापि प्रकाशयेत् ॥ १॥

महामाया महालक्ष्मी महावाणी महेश्वरी ।
महादेवी महारात्रि र्महिषासुर मर्दिनी ॥ २॥

कालरात्रिः कुहूः पूर्णा नन्दाऽऽद्या भद्रिका निशा ।
जया रिक्ता महाशक्ति र्देवमाता कृशोदरी ॥ ३॥

शचीन्द्राणी शक्रनुता शङ्कर प्रिय वल्लभा ।
महावराह जननी मदनोन्मथिनी मही ॥ ४॥

वैकुण्ठनाथ रमणी विष्णुवक्षः स्थल स्थिता ।
विश्वेश्वरी विश्वमाता वरदा ऽभयदा शिवा ॥ ५॥

शूलिनी चक्रिणी मा च पाशिनी शङ्ख धारिणी ।
गदिनी मुण्डमाला च कमला करुणालया ॥ ६॥

पद्माक्ष धारिणी ह्यम्बा महाविष्णु प्रियङ्करी ।
गोलोक नाथ रमणी गोलोकेश्वर पूजिता ॥ ७॥

गया गङ्गा च यमुना गोमती गरुडासना ।
गण्डकी सरयू स्तापी रेवा चैव पयस्विनी ॥ ८॥

नर्मदा चैव कावेरी केदार स्थल वासिनी ।
किशोरी केशव नुता महेन्द्र परिवन्दिता ॥ ९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ब्रह्मादि देव निर्माण कारिणी देव पूजिता ।
कोटि ब्रह्माण्ड मध्यस्था कोटि ब्रह्माण्ड कारिणी ॥ १०॥

श्रुतिरूपा श्रुतिकरी श्रुति स्मृति परायणा ।
इन्दिरा सिन्धु तनया मातङ्गी लोक मातृका ॥ ११॥

त्रिलोक जननी तन्त्रा तन्त्र मन्त्र स्वरूपिणी ।
तरुणी च तमोहन्त्री मङ्गला मङ्गलायना ॥ १२॥

मधुकैटभ मथनी शुम्भासुर विनाशिनी ।
निशुम्भादि हरा माता हरि शङ्कर पूजिता ॥ १३॥

सर्वदेवमयी सर्वा शरणागत पालिनी ।
शरण्या शम्भु वनिता सिन्धु तीर निवासिनी ॥ १४॥

गन्धर्वगान रसिका गीता गोविन्द वल्लभा ।
त्रैलोक्य पालिनी तत्त्व रूप तारुण्य पूरिता ॥ १५॥

चन्द्रावली चन्द्रमुखी चन्द्रिका चन्द्रपूजिता ।
चन्द्रा शशाङ्क भगिनी गीतवाद्य परायणा ॥ १६॥

सृष्टिरूपा सृष्टिकरी सृष्टि संहार कारिणी ।
इति ते कथितं देवि रमानाम शताष्टकम् ॥ १७॥

त्रिसन्ध्यं प्रयतो भूत्वा पठे देतत्समाहितः ।
यं यं कामयते कामं तं तं प्राप्नो त्यसंशयम् ॥ १८॥

इमं स्तवं यः पठतीह मर्त्यो –
वैकुण्ठ पत्न्याः पर मादरेण ।
धनाधिपाद्यैः परिवन्दितः स्यात् -
प्रयास्यति श्रीपद मन्तकाले॥ १९॥

।।इति श्री कमलायाः अष्टोत्तर शतनाम स्तोत्रं समाप्तम्॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

लक्ष्म्यष्टोत्तरशत नामस्तोत्रम्

देव्युवाच -

देवदेव महादेव त्रिकालज्ञ महेश्वर ।
करुणाकर देवेश भक्तानुग्रह कारक ॥ १॥
अष्टोत्तरशतं लक्ष्म्याः श्रोतु मिच्छामि तत्त्वतः ।

ईश्वर उवाच -

देवि साधु महाभागे महाभाग्य प्रदायकम् ।
सर्वैश्वर्य करं पुण्यं सर्व पाप प्रणाशनम् ॥ २॥

सर्व दारिद्र्य शमनं श्रवणा द्भुक्ति मुक्तिदम् ।
राजवश्य करं दिव्यं गुह्या द्गुह्यतमं परम् ॥ ३॥

दुर्लभं सर्वदेवानां चतुःषष्टि कलास्पदम् ।
पद्मादीनां वरान्तानां निधीनां नित्यदायकम् ॥ ४॥

समस्तदेव संसेव्यम् अणिमाद्यष्ट सिद्धिदम् ।
किमत्र बहुनोक्तेन देवीप्रत्यक्ष दायकम् ॥ ५॥

तव प्रीत्या ऽद्य वक्ष्यामि समाहितमनाः श्रृणु ।
अष्टोत्तरशत स्यास्य महालक्ष्मी स्तु देवता ॥ ६॥

क्लीं बीजं पदमित्युक्तं शक्तिस्तु भुवनेश्वरी ।
अङ्गन्यासः करन्यासः श्रां इत्यादि प्रकीर्तितः ॥ ७॥

ध्यानम् ।

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां -
हस्ताभ्या मभयप्रदां मणिगणै र्नानाविधै र्भूषिताम् ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भक्ताभीष्ट फलप्रदां हरिहर ब्रह्मादिभिः सेवितां -
पार्श्वे पङ्कज शङ्ख पद्म निधिभि र्युक्तां सदा शक्तिभिः ॥ ८॥

सरसिज नयने सरोज हस्ते -
धवलतरांशुक गन्ध माल्य शोभे ।
भगवति हरिवल्लभे मनोज्ञे -
त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ ९॥

प्रकृतिं विकृतिं विद्यां सर्वभूत हितप्रदाम् ।
श्रद्धां विभूतिं सुरभिं नमामि परमात्मिकाम् ॥ १०॥

वाचं पद्मालयां पद्मां शुचिं स्वाहां स्वधां सुधाम् ।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम् ॥ ११॥

अदितिं च दितिं दीप्तां वसुधां वसु धारिणीम् ।
नमामि कमलां कान्तां कामाक्षीं क्रोध सम्भवाम् ॥ १२॥

अनुग्रहप्रदां बुद्धि मनघां हरि वल्लभाम् ।
अशोका ममृतां दीप्तां लोकशोक विनाशिनीम् ॥ १३॥

नमामि धर्मनिलयां करुणां लोक मातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्म सुन्दरीम् ॥ १४॥

पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम् ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगन्धिनीम् ॥ १५॥

पुण्यगन्धां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम् ।
नमामि चन्द्रवदनां चन्द्रां चन्द्रसहोदरीम् ॥ १६॥

चतुर्भुजां चन्द्ररूपां इन्दिरां इन्दुशीतलाम् ।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ॥ १७॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विमलां विश्वजननीं तुष्टिं दारिद्र्य नाशिनीम् ।
प्रीतपुष्करिणीं शान्तां शुक्लमाल्याम्बरां श्रियम् ॥ १८॥

भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम् ।
वसुन्धरा मुदाराङ्गीं हरिणीं हेममालिनीम् ॥ १९॥

धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदाम् ।
नृपवेश्मगतानन्दां वरलक्ष्मीं वसुप्रदाम् ॥ २०॥

शुभां हिरण्यप्राकारां समुद्रतनयां जयाम् ।
नमामि मङ्गलां देवीं विष्णुवक्षःस्थलस्थिताम् ॥ २१॥

विष्णुपत्नीं प्रसन्नाक्षीं नारायण समाश्रिताम् ।
दारिद्र्य ध्वंसिनीं देवीं सर्वोपद्रव वारिणीम् ॥ २२॥

नवदुर्गां महाकालीं ब्रह्मविष्णु शिवात्मिकाम् ।
त्रिकाल ज्ञान सम्पन्नां नमामि भुवनेश्वरीम् ॥ २३॥

लक्ष्मीं क्षीर समुद्रराज तनयां श्रीरङ्ग धामेश्वरीं -
दासीभूत समस्त देववनितां लोकैक दीपाङ्कुराम् ।
श्रीमन्मन्द कटाक्षलब्ध विभव ब्रह्मेन्द्र गङ्गाधरां -
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥ २४॥

मात र्नमामि कमले कमलायताक्षि -
श्रीविष्णु हृत्कमल वासिनि विश्वमातः ।
क्षीरोदजे कमल कोमलगर्भ गौरि -
लक्ष्मि प्रसीद सततं नमतां शरण्ये ॥ २५॥

त्रिकालं यो जपे द्विद्वान् षण्मासं विजितेन्द्रियः ।
दारिद्र्य ध्वंसनं कृत्वा सर्व माप्नो त्ययत्नतः ॥ २६॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

देवी नामसहस्त्रेषु पुण्य मष्टोत्तरं शतम् ।
येन श्रिय मवाप्नोति कोटिजन्म दरिद्रतः ॥ २७॥

भृगुवारे शतं धीमान् पठे द्वत्सर मात्रकम् ।
अष्टैश्वर्य मवाप्नोति कुबेर इव भूतले ॥ २८॥

दारिद्र्य मोचनं नाम स्तोत्र मम्बापरं शतम् ।
भुक्त्वा तु विपुलान् भोगान् अस्याः सायुज्य माप्नुयात् ॥ २९॥

प्रातःकाले पठेन्नित्यं सर्वं दुःखोप शान्तये ।
पठंस्तु चिन्तये द्देवीं सर्वाभरण भूषिताम् ॥ ३०॥

॥ इति श्रीलक्ष्म्यष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रियै नमः

लक्ष्मी अष्टोत्तर सहस्रनाम स्तोत्रम् (1008)

अस्य श्री महालक्ष्मी सहस्रनामस्तोत्र महामन्त्रस्य श्रीमहाविष्णु भंगवान् ऋषिः। अनुष्टुप् छन्दः। श्रीमहालक्ष्मी दैंवता । श्रीं बीजम्। ह्रीं शक्तिः। ह्रैं कीलकम् । श्रीमहालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः॥

ध्यानम्

पद्मानने पद्मकरे सर्वलोकैक पूजिते ।
सान्निध्यं कुरु मे चित्ते विष्णु वक्षःस्थल स्थिते ॥
भगवद्दक्षिणे पार्श्वे श्रियं देवी मवस्थिताम् ।
ईश्वरीं सर्वभूतानां जननीं सर्वदेहिनाम् ॥
चारुस्मितां चारुदतीं चारुनेत्रानन भ्रुवम् ।
सुकपोलां सुकर्णां ग्रन्यस्त मौक्तिक कुण्डलाम् ॥
सुकेशां चारु बिम्बोष्ठीं रत्नतुङ्ग घनस्तनीम् ।
अलकाग्रै रलिंनिभै रलङ्कृत मुखाम्बुजाम् ॥
लसत्कनक सङ्काशां पीनसुन्दर कन्धराम् ।
निष्ककण्ठीं स्तनालम्बि मुक्ताहार विराजिताम् ॥
नीलकुन्तलमध्यस्थ माणिक्य मकुटोज्ज्वलाम् ।
शुक्लमाल्याम्बरधरां तप्तहाटक वर्णिनीम् ॥
अनन्यसुलभै स्तैस्तै गुंणैः सौम्यमुखै र्निजैः ।
अनुरूपा नवद्याङ्गीं हरे र्नित्या नपायिनीम् ॥

1008 नामस्तोत्रम्

श्री वांसुदेव महिषी पुम्प्रधाने श्वरेश्वरी ।
अचिन्त्यानन्त विभवा भावाभाव विभाविनी ॥ १॥

अहम्भावात्मिका पद्मा शान्तानन्त चिदात्मिका ।
ब्रह्मभावं गता त्यक्तभीता सर्वं जगन्मयी ॥ २॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

षाड्गुण्य पूर्णा त्रय्यन्त रूपाऽऽत्मा ऽनपगामिनी ।
एकयोग्या ऽशून्यभावा कृति स्तेजः प्रभाविनी ॥ ३॥

भाव्य भावक भावाऽऽत्म भाव्या कामधुगा ऽऽत्मभूः ।
भावा भावमयी दिव्या भेद्य भेदक भावगा ॥ ४॥

जगत्कुटुम्बि न्यखिला धारा काम विजृम्भिणी ।
पञ्चकृत्यकरी पञ्च शक्तिमय्यात्म वल्लभा ॥ ५॥

भावा भावानुगा सर्व सम्मताऽऽत्मोपगूहिनी ।
अपृथक् चारिणी सौम्या सौम्यरूपव्यवस्थिता ॥ ६॥

आद्यन्त रहिता देवी भवभाव्य स्वरूपिणी ।
महाविभूति स्समतां गता ज्योति र्गणेश्वरी ॥ ७॥

सर्वकार्यकरी धर्म स्वभावात्मा ऽग्रत:स्थिता।
आज्ञासम विभक्ताङ्गी ज्ञानानन्द क्रियामयी ॥ ८ ॥

स्वातन्त्र्यरूपा देवोरःस्थिता तद्धर्म धर्मिणी ।
सर्वभूतेश्वरी सर्व भूतमाता ऽऽत्म मोहिनी ॥ ९॥

सर्वाङ्ग सुन्दरी सर्व व्यापिनी प्राप्त योगिनी ।
विमुक्ति दायिनी भक्ति गम्या संसार तारिणी ॥ १०॥

धर्मार्थ वादिनी व्योम निलया व्योम विग्रहा ।
पञ्चव्योमपदी रक्ष व्यावृत्ति: प्राप्यपूरिणी ॥ ११॥

आनन्दरूपा सर्वाप्ति शालिनी शक्तिनायिका ।
हिरण्यवर्णा हैरण्य प्राकारा हेम मालिनी ॥ १२॥

प्रत्नरत्ना भद्रपीठा वेशिनी रजतस्रजा ।
स्वाज्ञाकार्यभरा नित्यसुरभि र्व्योमचारिणी ॥ १३॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

योगक्षेमवहा सर्व सुलभेच्छा क्रियात्मिका ।
महासमूहा निखिल प्ररोहा वेदगोचरा ॥ १४ ॥

विस्मयाधायिनी ब्रह्मसंहिता सुगुणोत्तरा।
प्रज्ञापरिमिताऽऽत्मानुरूपा सत्योपयाचिता ॥ १५॥

मनोज्ञेया ज्ञानगम्या नित्यमुक्तात्मसेविनी ।
कर्तृशक्तिः सुगहना भोक्तृशक्ति र्गुणप्रिया ॥ १६॥

ज्ञानशक्ति रनौपम्या निर्विकल्पा निरामया ।
अकलङ्का महाशक्ति र्निराधारा विकासिनी ॥ १७॥

महामाया महानन्दा ब्रह्मनीति र्निराश्रया।
एकस्वरूपा त्रिविधा सङ्ख्यातीता निरञ्जना ॥ १८॥

आत्मसत्ता नित्यशुचिः निर्विकल्पा सुखोचिता ।
नित्यशान्ता निस्तरङ्गा निर्भिन्ना सर्वभेदिनी ॥ १९॥

असङ्कीर्णा ऽविधेयात्माऽनिषेव्या सर्वपावनी ।
निष्कामना सर्वरसा ऽभेद्या सर्वार्थ साधिनी ॥ २०॥

अनिर्देश्या ऽपरिमिता निर्विकारा त्रिलक्षणा ।
भयङ्करी सिद्धिरूपा ऽव्यक्ता सदसदाकृतिः ॥ २१॥

अप्रतर्क्या ऽप्रतिहता नियन्त्री यन्त्रवाहिनी ।
हार्दमूर्ति र्महामूर्तिः अव्यक्ता विश्वगोपिनी ॥ २२॥

वर्धमाना ऽनवद्याङ्गी निरवद्या त्रिवर्गदा ।
अप्रमेया ऽमृतदुघा कूटस्था कुलनन्दिनी ॥ २३॥

अविगीता तन्त्रसिद्धा योगसिद्धा ऽमरेश्वरी ।
विश्वसूति स्तर्पयन्ती नित्यतृप्ता महौषधिः ॥ २४॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शब्दात्यया शब्दसहा कृतज्ञा कृतलक्षणा ।
त्रिवर्तिनी त्रिलोकस्था भूर्भुवःस्व रयोनिजा ॥ २५॥

अग्राह्या ऽग्राहिका ऽनन्ताह्वया सर्वातिशायिनी ।
व्योमपद्मा कृतधुरा पूर्णकामा महेश्वरी ॥ २६॥

सुवाच्या वाचिका सत्यकथना सर्वपाविनी ।
लक्ष्यमाणा लक्षयन्ती जगज्ज्येष्ठा शुभावहा ॥ २७॥

जगत्प्रतिष्ठा भुवन भर्त्री गूढ प्रभाविनी ।
क्रियायोगात्मिका मूर्ता हृदब्जस्था महाक्रमा ॥ २८॥

परमद्यौः प्रथमजा परमाप्ता जगन्निधिः ।
आत्मानपायिनी तुल्यस्वरूपा समलक्षणा ॥ २९॥

तुल्यवृत्ता समवया मोदमाना खगध्वजा ।
तुल्यचेष्टा तुल्यशीला वरदा कामरूपिणी ॥ ३०॥

समग्रलक्षणा ऽनन्ता तुल्यभूतिः सनातना ।
महर्द्धिः सत्यसङ्कल्पा भूमिजा परमेश्वरी ॥ ३१॥

जगन्माता सूत्रवती भूतधात्री यशस्विनी ।
महाभिलाषा सावित्री प्रधाना सर्वभासिनी ॥ ३२॥

नानावपु र्बहुविधा सर्वज्ञा पुण्यकीर्तना ।
भूताश्रया हृषीकेशा अशोका वाजिवाहिका ॥ ३३॥

ब्रह्मात्मिका पुण्यजनी सत्यकामा समाधिभूः ।
हिरण्यगर्भा गम्भीरा गोधूली कमलासना ॥ ३४॥

जितक्रोधा कुमुदिनी वैजयन्ती मनोजवा ।
धनलक्ष्मीः स्वस्तिकरी राज्यलक्ष्मी र्महासती ॥ ३५॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

जयलक्ष्मी र्महागोष्ठी मघोनी माधवप्रिया ।
पद्मगर्भा वेदवती विविक्ता परमेष्ठिनी ॥ ३६ ॥

सुवर्णबिन्दु र्महती महायोगि प्रिया ऽनघा ।
पद्मे स्थिता वेदमयी कुमुदा जयवाहिनी ॥ ३७ ॥

संहति र्निर्मिता ज्योति र्नियति र्विविधोत्सवा ।
रुद्रवन्द्या सिन्धुमती वेदमाता मधुव्रता ॥ ३८ ॥

विश्वम्भरा हैमवती समुद्रेच्छा विहारिणी ।
अनुकूला यज्ञवती शतकोटिः सुपेशला ॥ ३९ ॥

धर्मोदया धर्मसेवा सुकुमारी सभावती ।
भीमा ब्रह्मस्तुता मध्यप्रभा देवर्षि वन्दिता ॥ ४० ॥

देवभोग्या महाभागा प्रतिज्ञा पूर्णशेवधिः ।
सुवर्णा रुचिरप्रख्या भोगिनी भोगदायिनी ॥ ४१ ॥

वसुप्रदोत्तमवधूः गायत्री कमलोद्भवा ।
विद्वत्प्रिया पद्मचिह्ना वरिष्ठा कमलेक्षणा ॥ ४२ ॥

पद्मप्रिया सुप्रसन्ना प्रमोदा प्रियपार्श्वगा ।
विश्वभूषा कान्तिमती कृष्णा वीणारवोत्सुका ॥ ४३ ॥

रोचिष्करी स्वप्रकाशा शोभमाना विहंगमा ।
देवाङ्कस्था परिणतिः कामवत्सा महामतिः ॥ ४४ ॥

इल्वलोत्पलनाभा ऽधि शमनी वर वर्णिनी ।
स्वनिष्ठा पद्मनिलया सद्गतिः पद्मगन्धिनी ॥ ४५ ॥

पद्मवर्णा कामयोनिः चण्डिका चारुकोपना ।
रतिस्नुषा पद्मधरा पूज्या त्रैलोक्य मोहिनी ॥ ४६ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नित्यकन्या बिन्दुमालि न्यक्षया सर्वगन्धिनी।
गन्धात्मिका सुरसिका दीप्तमूर्तिः सुमध्यमा ॥ ४७॥

पृथुश्रोणी सौम्यमुखी सुभगा विष्टरश्रुतिः ।
स्मिताननना चारुगति र्निम्ननाभी महास्तनी ॥ ४८॥

स्निग्धवेणी भगवती सुकान्ता वामलोचना ।
पल्लवाङ्घ्रिः पद्ममनाः पद्मबोधा महाप्सराः ॥ ४९॥

सरस्वती चारुहासा शुभदृष्टिः ककुद्मिनी ।
कम्बुग्रीवा सुजघना रक्तपाणी र्मनोरमा ॥ ५०॥

पद्मिनी मन्दगमना चतुर्दंष्ट्रा चतुर्भुजा ।
शुभरेखा विलासभ्रूः शुकवाणी कलावती ॥ ५१॥

ऋजुनासा कलरवा वरारोहा तलोदरी ।
सन्ध्या बिम्बाधरा पूर्वभाषिणी श्रीसमाह्वया ॥ ५२॥

इक्षुचापा सुमशरा दिव्यभूषा मनोहरा ।
वासवी पाण्डरच्छत्रा करभोरु स्तिलोत्तमा ॥ ५३॥

सीमन्तिनी प्राणशक्तिः विभीषि ष्यसुधारिणी ।
भद्रा जयावहा चन्द्रवदना कुटिलालका ॥ ५४॥

चित्राम्बरा चित्रगन्धा रत्नमौलि समुज्ज्वला ।
दिव्यायुधा दिव्यमाल्या विशाखा चित्रवाहना ॥ ५५॥

अम्बिका सिन्धुतनया निश्रेणिः सुमहासिनी ।
सामप्रिया नवमृगी सर्वसेव्या वराङ्गना ॥ ५६॥

गन्धद्वारा दुराधर्षा नित्यपुष्टा करीषिणी ।
देवजुष्टा ऽऽदित्यवर्णा दिव्यगन्धा स्वकर्दमा ॥ ५७॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अनन्तरूपा ऽनन्तस्था सर्वदा ऽनन्तसङ्गमा ।
यज्ञाशनी महावृष्टिः सर्वपूज्या वषट् क्रिया ॥ ५८॥

योगप्रिया वियन्नाभिः अनन्तश्री रतीन्द्रिया ।
योगिसेव्या सत्यरता योगमाया पुरातनी ॥ ५९॥

सर्वेश्वरी सुतरुणी शरण्या धर्मदेवता ।
सुतरा संवृतज्योतिः योगिनी योगसिद्धिदा ॥ ६०॥

सृष्टिशक्ति द्योतमानभूता मङ्गलदेवता ।
संहारशक्तिः प्रबला निरुपाधिः परावरा ॥ ६१॥

उत्तारिणी तारयन्ती शाश्वती समितिञ्जया ।
महाश्री रजहत्कीर्तिः योगश्रीः सिद्धिसाधनी ॥ ६२॥

पुण्यश्रीः पुण्यनिलया ब्रह्मश्री ब्राह्मणप्रिया ।
राजश्री राजकलिता फलश्रीः स्वर्गदायिनी ॥ ६३॥

देवश्री रद्भुत कथा वेदश्रीः श्रुति मार्गिणी ।
तमोऽपहा ऽव्ययनिधिः लक्ष्मणा हृदयङ्गमा ॥ ९४॥

मृतसञ्जीविनी शुभ्रा चन्द्रिका सर्वतोमुखी ।
सर्वोत्तमा मित्रविन्दा मैथिली प्रियदर्शना ॥ ६५॥

सत्यभामा वेदवेद्या सीता प्रणत पोषिणी ।
मूलप्रकृति रीशाना शिवदा दीप्र दीपिनी ॥ ६६॥

अभिप्रिया स्वैरवृत्ती रुक्मिणी सर्वसाक्षिणी ।
गान्धारिणी परगतिः तत्त्वगर्भा भवाभवा ॥ ६७॥

अन्तर्वृत्ति र्महामुद्रा विष्णुदुर्गा महाबला ।
मदयन्ती लोकधारि ण्यदृश्या सर्वनिष्कृतिः ॥ ६८॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

देवसेना ऽऽत्म बलदा वसुधा मुख्यमातृका ।
क्षीरधारा घृतमयी जुह्वती यज्ञदक्षिणा ॥ ६९॥

योगनिद्रा योगरता ब्रह्मचर्या दुरत्यया ।
सिंहपिञ्छा महादुर्गा जयन्ती खगवाहिनी॥ ७०॥

जगत्प्रिया विरूपाक्षी सुवर्णा क्रूरतापिनी।
कात्यायनी कालरात्रिः निशिदृष्टा करालिका ॥ ७१ ॥

त्रिशूलिनी खड्गधरा महाकाली न्द्रमालिनी ।
एकवीरा भद्रकाली सौनन्दी उल्लसद् गदा ॥ ७२॥

नारायणी जगत्पूरिण्युर्वरा द्रुहिणप्रसूः ।
यज्ञकामा लेलिहाना तीर्थकर्युग्र विक्रमा ॥ ७३॥

गरुत्म दुदया ऽत्युग्रा वाराही मातृभाषिणी ।
अश्वक्रान्ता रथक्रान्ता विष्णुक्रान्तोंरुचारिणी ॥ ७४॥

वैरोचिनी नारसिंही जीमूता शुभदेक्षणा ।
दीक्षाविधा विश्वशक्तिः बीजशक्तिः सुदर्शिनी ॥ ७५॥

प्रतीति जंगती वन्य धारिणी कलि नाशिनी ।
अयोध्याऽच्छिन्नसन्ताना महारत्ना सुखावहा ॥ ७६॥

राजवत्यर्क प्रतिभा विनयित्री महाशना ।
अमृतस्यन्दिनी सीमा यज्ञगर्भा समीक्षणा ॥ ७७॥

आकूतिः ऋग्यजुः सामघोषाऽऽरामवधूत्सुका ।
सोमपा माधवी नित्यकल्याणी कमलार्चिता ॥ ७८॥

योगरूढिः स्वार्थजुष्टा वह्निवर्णा जितासुरा ।
यज्ञविद्या गुह्यविद्या ऽध्यात्मविद्या कृतागमा ॥ ७९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

आप्यायिनी कलातीता सुमित्रा परभक्तिदा ।
काङ्क्षमाणा महामाया कोलकामा ऽमरावती ॥ ८० ॥

सुवीर्या दुःस्वप्नहरा देवकी वसुदेवता ।
सौदामिनी मेघरथा ऋद्धिदा दैत्य मर्दिनी ॥ ८१ ॥

श्रेयस्करी चित्रलीलैं कायिनी रत्नपादुका ।
मनस्यमाना तुलसी रोगनाशि न्युरुप्रथा ॥ ८२ ॥

तेजस्विनी सुखोज्वाला मन्दरेखाऽमृताशिनी ।
ब्रह्मिष्ठा वह्विशमनी जुषमाणा गुणात्यया ॥ ८३ ॥

कादम्बरी ब्रह्मरता विधात्र्युज्वलहस्तिका ।
अक्षोभ्या सर्वतोभद्रा वयस्या स्वस्तिदक्षिणा ॥ ८४ ॥

सहस्रास्या ज्ञानमाता वैश्वान यंक्षवर्तिनी ।
प्रत्यग्वरा वारणवती अनसूया दुरासदा ॥ ८५ ॥

अरुन्धती कुण्डलिनी भव्या दुर्गतिनाशिनी ।
मृत्युञ्जया त्रासहरा निर्भया शत्रुसूदिनी ॥ ८६ ॥

एकाक्षरा सत्पुरन्ध्री सुरपक्षा वरातुला ।
सकृद्विभासा प्रद्युम्ना हरिभद्रा धुरंधरा॥ ८७॥

बिल्वप्रियाऽवनी चक्रहृदया कम्बुतीर्थगा ।
सर्वमन्त्रात्मिका विद्युत् यशोदा सर्वरञ्जिनी ॥ ८८॥

ध्वज च्छत्राश्रया भूमिः वैष्णवी सद्गुणोज्ज्वला ।
सुषेणा लोकविदिता कामसू र्जगदादिभूः ॥ ८९ ॥

वेदान्तयोनि र्जिज्ञासा मनीषा समदर्शिनी ।
सहस्रशक्तिरावृत्तिः सुस्थिरा श्रेयसां निधिः ॥ ९० ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रोहिणी रेवती चन्द्रसोदरी भद्रमोहिनी ।
आर्या गव्यप्रिया विश्वभावनी सुविभाविनी ॥ ९१॥

सुप्रदश्या कामचारि ण्यप्रमत्ता ललन्तिका ।
मोक्षलक्ष्मी र्जगद्योनिः व्योमलक्ष्मीः सुदुर्लभा ॥ ९२॥

भास्करी पुण्यगेहस्था मनोज्ञा विभवप्रदा ।
लोकस्वामि न्यच्युतार्था पुष्कला जगदाकृतिः ॥ ९३॥

विचित्र हारिणी कान्ता पाविनी भूत भाविनी ।
प्राणिनी प्राणदा विद्वद् विश्वब्रह्माण्डवासिनी ॥ ९४॥

सम्पूर्णा परमोत्साहा श्रीपतिः श्रीमति श्रुतिः ।
श्रयन्ती श्रयमाणा क्ष्मा विश्वरूपा प्रसादिनी ॥ ९५॥

हर्षणी प्रथमा सर्वा विशाला कामवर्षिणी ।
सुप्रतीका प्रश्निमती निवृत्ति र्विविधा परा ॥ ९६॥

सुयज्ञा मधुरा श्रीदा देवराति र्महामनाः ।
स्थूला सर्वाकृतिः सूक्ष्मा निम्नगव्या तमोनुदा ॥ ९७॥

तुष्टि र्वागीश्वरी पुष्टिः सर्वाद्या सर्वशोषिणी ।
शक्त्यात्मिका शब्दशक्तिः विशिष्टा वायुमत्युमा ॥ ९८॥

आन्वीक्षकी त्रयी वार्ता दण्डनीति र्नयात्मिका ।
व्याली सङ्कर्षिणी द्योता महादेव्यपराजिता ॥ ९९॥

कपिला पिङ्गला स्वस्था बलाकी घोषनन्दिनी ।
अजिता कर्षणी क्षान्तिः र्गरुडा गरुडासना ॥ १००॥

ह्रादिन्यनुग्रहा नित्या ब्रह्मविद्या हिरण्मयी ।
मही शुद्धविधा पृथ्वी शतानन्दांशु मालिनी ॥ १०१॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यज्ञाश्रया ख्यातिपरा स्तव्या घृष्टि स्त्रिकालगा ।
सम्बोधिनी शब्दपूर्णा विजयांऽशुमती कला ॥ १०२॥

शिवा स्तुतिप्रिया ख्यातिः जीवयन्ती पुनर्वसुः ।
दीक्षा भक्तार्तिहा रक्षा परीक्षा यज्ञसम्भवा ॥ १०३॥

आर्द्रा पुष्करिणी पुण्या गण्या दारिद्र्यभञ्जिनी ।
धन्या मान्या पद्मनेमिः भार्गवी वंशवर्धिनी ॥ १०४॥

तीक्ष्णप्रवृत्तिः सत्कीर्तिः निधिसेव्याऽघनाशिनी ।
संज्ञा निस्संशया पूर्वा वनमाला वसुन्धरा ॥ १०५॥

पृथ्वी महोत्कटा ऽहल्या मण्डला ऽऽश्रितमानदा ।
सर्वा नित्योदितोदारा जृम्भमाणा महोदया ॥ १०६॥

चन्द्रकान्तोदिता सूर्या चतुरश्रा मनोजवा ।
बाला कुमारी युवती करुणा भक्तवत्सला ॥ १०७॥

मेदिन्युपनिषन्मिश्रा सुमवीरुर्धनेश्वरी ।
दुर्मर्षणी सुचरिता बोधा शोभा सुवर्चला ॥ १०८॥

यमुनाक्षोहिणी गङ्गा मन्दाकिन्यमरालया ।
गोदा गोदावरी चन्द्रभागा कावेर्युदन्वती ॥ १०९॥

सिनीवाली कुहू राका वारणा सिन्धुमत्यमा ।
पूर्तिर्मायात्मिका स्फूर्ति र्व्याख्या सूत्रा प्रजावती ॥ ११०॥

वृद्धिः स्थिति र्ध्रुवा बुद्धिः त्रिगुणा गुणगह्वरा ।
अमोघा शान्तिदा सत्या ज्ञानदोत्कर्षिणी शिवा ॥ १११॥

प्रकृति र्भामिनी लोला कमला कामधुग्विधिः ।
प्रज्ञा रामा परा सन्ध्या सुभद्रा सर्वमङ्गला ॥ ११२॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नन्दा भद्रा जया रिक्ता तिथिपूर्णा ऋतम्भरा ।
काष्ठा कामेश्वरी निष्ठा काम्या रम्या धरा स्मृतिः ॥ ११३॥

शङ्खिनी चक्रिणी श्यामा सामा गोत्रा रमा द्युतिः ।
शान्तिदा स्तुतिसिद्धिश्च विरजाऽत्युज्ज्वलाऽव्यया ॥ ११४॥

वाणी गौरीन्दिरा लक्ष्मीः मेधा श्रद्धा ऽप्रमा द्युतिः।
स्वधा स्वाहा रति रुषा वसु विंद्या धृतिः सभा ॥ ११५॥

शिष्टा इष्टा शुची धात्री सुधाराऽक्षोण्यजाऽमृता ।
रमण्येका शारदाम्बा समेधाद्या शुभाक्षरा।। ११६।।

रत्नावली भारतीडा धीराधीःकेवलाऽऽत्मदा ॥
या सा शुद्धिः सस्मिता का नीला राधाऽमृतोद्भवा ।।११७॥

विभूतिर्निष्कला रम्भा रक्षा सुविमला क्षमा।
प्राप्ति र्वासन्तिका लेखा भूरिबीजा महाङ्गदा।। ११८।।

वरधुर्या स्वधा ह्री भूंः कामिनी शोकनाशिनी ॥
माया प्रीति रसहना नर्मदा गोकुलाश्रया ।११९।।

अर्कप्रभा रसेभा श्री निलयेन्दु प्रभाऽद्भुता ॥
श्रीः कृशानुप्रभा वज्रलम्भना सर्वभूमिदा ।।१२०।।

भोगप्रिया भोगवती भोगीन्द्रशयनासना ॥
अश्वपूर्वा रथमध्या हस्तिनाद प्रबोधिनी ।१२२।।

सर्वलक्षण लक्षण्या सर्वलोक प्रियङ्करी ॥
सर्वमङ्गल माङ्गल्या दृष्टादृष्ट फलप्रदा ॥ १२३॥

(इति लक्ष्मी अष्टोत्तर सहस्रनाम स्तोत्रं संपूर्णम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी अष्टोत्तरशताधिक सहस्रनाम स्तोत्रम्। (1108)

राजा मित्रसह उवाच-

भगवन् सर्वधर्मज्ञ सर्वशास्त्र विशारद ।
पावनानां हि महसां निदानं त्वं महामुने ॥ १॥

अतर्किते नागमेन तव तुष्टो ऽस्मि सर्वदा ।
हृदयं निर्वृतं मेऽद्य महा दुःखौघ पीडितम् ॥ २॥

देवा: गृहेषु सन्तुष्टाः तारिताः पितरश्च मे ।
चिराय मे मन स्यस्ति संशयो बलवत्तरः ॥ ३॥

पृच्छामि त्वा महं तं वै उत्तरं दातु मर्हसि ।
इष्टं मया च बहुभिः यज्ञै स्सम्पूर्ण दक्षिणैः ॥ ४॥

दानानि च महार्हाणि पात्रेषु स्पर्शितानि च ।
अनृतं नोक्तपूर्वं मे प्रजा: धर्मेण पालिताः ॥ ५॥

पतिव्रता महाभागा नित्यं सुस्निग्ध भाषिणी ।
पूज्यान् गृहागतान् सर्वान् आराधयति नित्यदा ॥ ६॥

तथा हि सेवते देवान् यथाऽह मपि नाशकम् ।
भार्या ऽनुकूला मे देवी मदयन्ती मनस्विनी ॥ ७॥

तथा ऽपि दुःखं संप्राप्तं मया द्वादश वार्षिकम् ।
राक्षसत्वं महाघोरं सम्पूर्ण नरकोपमम् ॥ ८॥

तत्र वृत्तानि कार्याणि स्मृत्वा मे वेपते मनः ।
भक्षिताः कति वा तत्र द्विपदाश्च चतुष्पदाः ॥ ९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तत्सर्व मस्तु तन्नैव चिन्त्यते शापहेतुकम् ।
गुरुपुत्रो गुरुसमः शक्तिः स्संभक्षितो मया ॥ १०॥

ब्रह्महत्या कृतं पापं कथं मे न भविष्यति ।
शापात् राक्षसता काले प्राप्तं यद्यपि तन्मया ॥ ११॥

रात्रिन्दिवं मे दहति हृदयं हि सबन्धनम् ।
न रोचते मे भुक्ति र्वा सुप्ति र्वाऽपि गतिर्बहिः ॥ १२॥

महाबन्धन मेतन्मे राज्यं हि मनुते मनः ।
किं नु तत्कारणं येन प्राप्तोऽहं तादृशीं शुचम् ॥ १३॥

वक्तु मर्हसि सर्वज्ञ तत् प्रायश्चित्त विस्तरम् ।
उपादिश महामन्त्र तन्त्रज्ञ प्रणताय मे ॥ १४॥

श्री नारद उवाच-

श्रुणु राजन् प्रवक्ष्यामि प्राग्जन्म चरितं तव ।
येनेदृशं त्वया प्राप्तं दुःख मत्यन्त दुस्सहम् ॥ १५॥

पुराऽभूर्ब्राह्मणः कश्चित् ताम्रपर्णि नदीतटे ।
दरिद्रोऽत्यन्त दुर्भाग्यः बहुपुत्र कुटुम्बवान् ॥ १६॥

कृष्णशर्मेति विख्यातो वेदवेदाङ्ग तत्ववित् ।
तव भार्याऽभवत् पुण्या सदा चण्डी कुरूपिणी ॥ १७॥

किन्तु शील व्रताचारे ऽप्रतिमा शुद्ध मानसा ।
कटुवाङ् मानिनी नाम्ना क्षुत्पिपासार्दिता सदा ॥ १८॥

दारिद्य शमनार्थं त्वं सर्वलक्षण लक्षिताम् ।
कल्पयित्वा श्रियोमूर्तिं भक्त्या पूजितवान् गृहे ॥ १९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मानिन्य प्यन्वहं भक्त्या गोमया लेपनादिभिः ।
रङ्गवल्ल्या ऽप्यलंकृत्य पूजास्थानं गृहे तव ॥ २०॥

पायसा पूप नैवेद्यैः सा त्वां पर्यचर न्मुदा ।
एकदा भृगुवारे त्वं सहस्र कमलार्चनम् ॥ २१॥

विधातुं विष्णुपत्न्यास्तु पद्मा न्यानयितुं गतः ।
गते ऽर्धदिवसे गेहं प्राप्य खिन्नो ऽनयोदितः ॥ २२॥

हन्तार्ध दिवसो ऽतीतः कदा देवानसङ्ख्यकान् ।
अभ्यर्च्याथ श्रियो देव्याः सहस्र कमलार्चनम् ॥ २३॥

कृत्वा भुक्त्वा कदाऽन्नं नः दर्शयिष्यसि ताम्यताम् ।
बालाः रुदन्ति क्षुधिताः पक्वं भवति शीतलम् ॥ २४॥

इति तस्यां भर्त्सयन्त्यां तूष्णीं पूजा मदा द्भवान् ।
सहस्रपद्म पूजायां चलन्त्यां मध्यत स्तु सा ॥ २५॥

असमर्था क्षुधं सोढुं बालैस्सह बुभोजह ।
तदा त्वं कुपितोऽप्येनां न च किञ्चिदपि ब्रुवन् ॥ २६॥

गृहान् निर्गत्य शान्तात्मा किं कृत्य मिति चिन्तयः।
निर्यान्तं त्वां तु सा प्राह क्व गच्छसि सुदुर्मते ॥ २७॥

अनिर्वर्त्य श्रियः पूजां प्रारब्धां सुमहादरम् ।
पृथङ् नैवेद्य मस्तीह नास्माभि र्भक्षितं हि तत् ॥ २८॥

कालात्ययात् क्षुधार्तानां भुक्तिं देवी सहिष्यते ।
तद्विधेहि श्रियःपूजां मास्म निष्कारणं क्रुधः ॥ २९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नरके मापतो बुध्यो मां च पातय मा वृथा ।
इति तस्यां ब्रुवाणायां त्वं गृहान्निरगाः क्रुधा ॥ ३०॥

सद्यः सन्यस्य विपिने ऽवात्सी स्त्वं विधिना किल ।
यतित्वेऽपि सदा बुध्या पूर्वाश्रम कथां स्मरन् ॥ ३१॥

दारिद्र्यं सर्वधर्माणां प्रत्यूहाय प्रवर्तते ।
सत्यप्यस्मिन् धर्मपत्नी अनुकूला भवेद्यदि ॥ ३२॥

नरस्य जन्म सुखितं नान्यथाऽर्थशतै रपि ।
वन्ध्या जानिस्स भवतु अनुकूल कळत्रवान् ॥ ३३॥

लभते जन्मसाफल्य मेतद्देव्याः प्रसादजम् ।
इत्येवं चिन्तय न्नेव त्यक्त्वा देहं तरो स्तले ॥ ३४॥

इक्ष्वाकु वंशे जात स्त्वं राजा मित्रसहाभिधः ।
रुषा परवशो यस्मा दसमाप्य श्रियोऽर्चनम् ॥ ३५॥

निर्गतोऽसि गृहात् तस्मात् दुःख मेतत् उपस्थितम् ।
साऽपि त्वयि विनिर्याते पश्चात्तापवती भृशम् ॥ ३६॥

प्रक्षाळिताङ्घ्रि हस्ताऽथ प्रयताऽऽचम्य सत्वरम् ।
नैवेद्यं स्वय मीश्वर्यै प्रणम्य च निवेद्य च ॥ ३७॥

अम्ब सर्वस्य लोकस्य जनन्यसि सहस्व तत् ।
आगांसि मम नागारि केतनोर स्थलालये ॥ ३८॥

यस्यां जातौ तु मे भर्ता त्वत्पूजा पुण्यतो भवेत् ।
भवेय महमप्यत्र जातौ तं चाप्नुयां यथा ॥ ३९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कामक्रोधादि हीना स्यां तथा ऽम्बानुग्रहं कुरु ।
इति देवीं प्रार्थयन्ती जीवन्ती कृच्छ्रतो भुवि ॥ ४० ॥

त्यक्त्वा देहं पुन र्जाता राजवंशे सुपावने ।
मद्यन्तीति नाम्ना वै तव भार्या ऽभवत् पुनः ॥ ४१ ॥

अभुक्ते त्वयि भुक्त्वा सा वन्ध्या जाता वधूमणिः ।
उभयो र्भवतो र्लक्ष्मी पूजायां अपराधतः ॥ ४२ ॥

उभावपि महादुःखं प्राप्तौ द्वादश वार्षिकम् ।
त्यक्त्वा राज्यं च कोशं च दरिद्रा विव दुःखितौ ॥ ४३ ॥

मा ब्रह्महत्या दोषात् त्वं भैषी राजन् कथञ्चन ।
यां जाति मनुविष्टो हि तादृशीं त्वं क्रियामधाः ॥ ४४ ॥

किन्तु भूयश्च्युते राज्यात् भेतव्यं श्रीप्रकोपतः ।
नाम्नां तदद्य श्रीदेव्याः सहस्रेण शतेन च ॥ ४५ ॥

अष्टोत्तरेण पद्मानां पुञ्जत स्तां प्रपूजय ।
भवेत् तव स्थिरं राज्यं दुःखं नाण्वपि ते भवेत् ॥ ४६ ॥

भार्या ते साऽपि शुश्रूषां स्वय मेव करोतु ते ।
वर्षमात्रं पूजिता सा लक्ष्मी र्नारायणप्रिया ॥ ४७ ॥

युवयो स्सर्वकामानां दात्री स्यान् नात्र संशयः ।
स्त्रीसङ्ग प्रतिहन्ताऽस्ति शापो यद्यपि ते प्रभो ॥ ४८ ॥

प्रसोष्यते च तनयं तव भार्या कथञ्चन ।
पुत्र पौत्राभि वृद्ध्या त्वं मोदिष्यसि महेन्द्र वत् ॥ ४९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यथा पृष्टं महाभाग दुःख हेतु स्तवोदितः ।
उक्त स्तत्परिहारो ऽपि किमिच्छसि पुन र्वद ॥ ५० ॥

राजोवाच-
धन्यो स्म्यनुगृहीतोस्मि महर्षे कृपया तव ।
मत्तो न विद्यते कश्चित् लोकेऽस्मिन् भाग्यवत्तरः ॥ ५१ ॥

तव पादाब्जयुगले प्रणामानां शतं शतम् ।
करोमि पाहि मां विप्र कुलोत्तंस दयानघ ॥ ५२ ॥

नाम्नां सहस्रं श्रीदेव्याः अष्टोत्तर शताधिकम् ।
प्रब्रूहि मे मुनिश्रेष्ठ पूजाया विधि मप्यथ ॥ ५३ ॥

जपस्य च विधिं तेषां नाम्नां शुश्रूषवे वद ।

सूत उवाच-
इति राज्ञा मुनिश्रेष्ठः पृष्ट स्सविनयं ततः ॥ ५४ ॥
नमस्कृत्य श्रियै पश्चात् ध्यात्वोवाच महीपतिम् ।

श्री नारद उवाच-
सम्यक् पृष्टं महाराज सर्वलोकहितं त्वया ॥ ५५ ॥

वक्ष्यामि तानि नामानि पूजां चापि यथाक्रमम् ।
पलमान सुवर्णेन रजतेनाथ ताम्रतः ॥ ५६ ॥

चतुर्भुजां पद्मधरां वराभय विशोभिनीम् ।
निषण्णां फुल्लकमले चतुर्दन्तैः स्सितैर्गजैः ॥ ५७ ॥

सुवर्ण घण्टा मुखरैः कृतक्षीराभिषेचनाम् ।
कटकाङ्गद मञ्जीर रशनादि विभूषणैः ॥ ५८ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विभूषितां क्षौमवस्त्रां सिन्दूर तिलकाञ्चिताम् ।
प्रसन्नवदनाम्भोजां प्रपन्नार्ति विनाशिनीम् ॥ ५९॥

छत्रचामर हस्ताढ्यैः सेविता मप्सरोगणैः ।
कृत्वैवं प्रतिमां तां च प्रतिष्ठाप्य यथा विधि ॥ ६०॥

श्रीं लक्ष्म्यै नम इत्येव ध्यानावाहन पूर्वकान् ।
उपचारां श्चतुष्षष्टिं कल्पयेत गृहे सुधीः ॥ ६१॥

प्रतिमाया अलाभे तु लक्ष्म्यास्संप्राप्य चालयम् ।
कारयेद् उपचारांस्तु यथा विध्यर्चकै मुंदा ॥ ६२॥

तस्याप्यभावे त्वालेख्ये लिखितां वर्णकै स्तथा ।
पूजयेत् तस्य चाभावे कृतां चन्दनदारुणा ॥ ६३॥

तदभावे चन्दनेन रचितां पूजयेद् रमाम् ।
एषा मभावे विकचे कमले कर्णिकागताम् ॥ ६४॥

ध्यात्वा तथाविधां देवीं आदरेण प्रपूजयेत् ।
कमलानां सहस्रेणा प्यष्टोत्तर शतेन च ॥ ६५॥

अर्चये दिन्दिरापादौ ध्यात्वाऽभीष्टानि चेतसि ।
श्रीदेव्या नाम साहस्रं अष्टोत्तर शताधिकम् ॥ ६६॥

अथात स्सं प्रवक्ष्यामि श्रृणु नान्य मना नृप ।।

(इति श्री नारदीयोपपुराणे नारद मित्रसह संवादे- श्री लक्ष्मीसहस्रनाम पूर्वपीठिकानाम प्रथमोऽध्याय:)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अथ द्वितीयोऽध्याय:

श्रीनारद उवाच -

महालक्ष्मी र्महेशाना महामाया मलापहा ।
विष्णुपत्नी विधीशार्च्यां विश्वयोनि र्वरप्रदा ॥ १॥

धात्री विधात्री धर्मिष्ठा धम्मिल्लोद्भासि मल्लिका ।
भार्गवी भक्तिजननी भवनाथा भवार्चिता ॥ २॥

भद्रा भद्रप्रदा भव्या भक्ताभीष्ट फलप्रदा ।
प्रळयस्था प्रसिद्धाभा प्रकृष्टैश्वर्य दायिनी ॥ ३॥

विष्णुशक्ति र्विष्णुमाया विष्णु वक्षस्थल स्थिता ।
वाग्रूपा वाग्विभूतिज्ञा वाक्प्रदा वरदा वरा ॥ ४॥

सम्पत्प्रदा सर्वशक्तिः संविद्रूपा समाऽसमा ।
हरिद्राभा हरिन्नाथ पूजिता हरि मोहिनी ॥ ५॥

हत पापा हत खला हिताहित विवर्जिता ।
हिताहित परा ऽहेया हर्षदा हर्षरूपिणी ॥ ६॥

वेदशास्त्राळि संवेद्या वेदरूपा विधि स्तुता ।
श्रुति स्स्मृति र्मति स्साध्वी श्रुता श्रुतधरा धरा ॥ ७॥

श्री श्रिताघ ध्वान्त भानुः श्रेयसी श्रेष्ठरूपिणी ।
इन्दिरा मन्दिरान्तस्था मन्दिरावासिनी मही ॥ ८॥

धनलक्ष्मी र्धनकरी धनिप्रीता धनप्रदा ।
धाना समृद्धिदा धुर्या धुताघा धौतमानसा ॥ ९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

धान्यलक्ष्मी र्दुरिताघा दारिद्य विनिवारिणी ।
वीरलक्ष्मी र्वीरवन्द्या वीरखड्गाग्र वासिनी ॥ १०॥

अक्रोधना ऽलोभपरा ललिता ललिताशया।
लोकवन्द्या लोकमाता लोचनाधःकृतोत्पला ॥ ११॥

हस्ति हस्तो पमानोरुः हस्त द्वय धृताम्बुजा ।
हस्ति कुम्भोपम कुचा हस्तिकुम्भ स्थलस्थिता ॥ १२॥

राजलक्ष्मी राजराज सेविता राज्यदायिनी ।
राकेन्दु वदना रस्या रसाल रस भाषणा ॥ १३॥

कोशवृद्धिः कोटिदात्री कोटिकोटि रविप्रभा ।
कर्माराध्या कर्मगम्या कर्मणां फलदायिनी ॥ १४॥

धैर्यप्रदा धैर्यरूपा धीरा धीर समर्चिता ।
पतिव्रता परतर पुरुषार्थ प्रदा ऽपरा ॥ १५॥

पद्मालया पद्मकरा पद्माक्षी पद्म धारिणी ।
पद्मिनी पद्मदा पद्मा पद्म शंखादि सेविता ॥ १६॥

दिव्या दिव्याङ्ग रागाढ्या दिव्यादिव्य स्वरूपधृत् ।
दयानिधि र्दानपरा दानवाराति भामिनी ॥ १७॥

देवकार्यपरा देवी दैत्येन्द्र परिपूजिता ।
नारायणी नादगता नाकराज समर्चिता ॥ १८॥

नक्षत्रनाथ वदना नरसिंह प्रिया ऽनला ।
जगद्रूपा जगन्नाथा जङ्गमा जङ्गमाकृतिः ॥ १९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कल्याणी कञ्जनिलया कम्रा कलि निषेधिनी ।
कारुण्य सिन्धुः कमला कमलाक्षी कुचोन्नता ॥ २०॥

बलिप्रिया बलिहरी बलिनी बलिसंस्तुता ।
हीरभूषा हीनदोषा हानिहर्त्री हतासुरा ॥ २१॥

हव्य कव्यार्चिता हत्या दिक पातक नाशिनी ।
विशुद्ध सत्त्वा विवशा विश्वबाधा हरी वधूः ॥ २२॥

ब्रह्माणी ब्रह्मजननी ब्रह्मरूपा बृहद्वपुः ।
बन्दीकृता मरवधू मोचिनी बन्धुरालका ॥ २३॥

बिलेशयाङ्गना वन्द्या बीभत्स रहिताऽबला ।
भोगिनी भुवनाधीशा भोगि भोगशयाऽभया ॥ २४॥

दामोदर प्रिया दान्ता दाशेश परि सेविता ।
जामदग्न्य प्रिया जह्नु तनया पावनांघ्रिका ॥ २५॥

क्षीरोद मथनो द्भूता क्षीराक्ता क्षिति रूपिणी ।
क्षेमङ्करी क्षयकरी क्षेत्रज्ज्ञा क्षेत्र दायिनी ॥ २६॥

स्वयंवृताच्युता स्वीय रक्षिणी स्वत्व दायिनी ।
तारकेश मुखी तार्क्ष्य स्वामिनी तारिता श्रिता ॥ २७॥

गुणातीता गुणवती गुण्या गरुड संस्थिता ।
गेया गया क्षेत्रगता गानतुष्टा गति प्रदा ॥ २८॥

शेषरूपा शेषशायि भामिनी शिष्ट सम्मता ।
शेवधि श्शोषिताशेष भुवना शोभनाकृतिः ॥ २९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पाञ्चरात्रार्चिता पाञ्च जन्यधार्यङ्क वासिनी ।
पाषण्ड द्वेषिणी पाश मोचिनी पामरप्रिया ॥ ३० ॥

भयङ्करी भयहरी भर्तृ भक्ता भवा पहा ।
ह्री ह्रींमती हृत तमाः हृत माया हृता शुभा ॥ ३१ ॥

रघुवंश स्नुषा रामा रम्या राम प्रिया रमा ।
सीरध्वज सुता सीता सीमातीत गुणोज्वला ॥ ३२ ॥

जानकी जगदानन्द दायिनी जगती भवा ।
भूगर्भ सम्भवा भूतिः भूषिताङ्गी भृतानता ॥ ३३ ॥

वेदस्तुता वेदवती वैदेही वेदवित् प्रिया ।
वेदान्त वेद्या वीर्याढ्या वीरपत्नी विशिष्टधीः ॥ ३४ ॥

शिवचापा रोप पणा शिवा शिवपरार्चिता ।
साकेत वासिनी साधु स्वान्तगा स्वादु भक्षिणी ॥ ३५ ॥

गुहागता गुहनता गुहागत मुनि स्तुता ।
दरस्मिता दनुजसं हर्त्री दशरथ स्नुषा ॥ ३६ ॥

दायप्रदा दानपरा दक्षा दाशरथि प्रिया ।
कान्ता कान्तारगा काम्या कारणातीत विग्रहा ॥ ३७ ॥

वीरा विराध संहर्त्री विश्वमाया विधायिनी ।
वेद्या वैद्यप्रिया वैद्या वेधोविष्णु शिवाकृतिः ॥ ३८ ॥

खरदूषण कालाग्निः खरभानुकुल स्नुषा ।
शूरा शूर्पणखा भङ्ग कारिणी श्रुत वल्लभा ॥ ३९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सुवर्णमृग तृष्णाढ्या सुवर्ण सदृशाङ्गका ।
सुमित्रा सुखदा सूत संस्तुता सुत दारदा ॥ ४० ॥

सुमन्त्रा नुग्रह परा सुमन्त्रा सु प्रतिष्ठिता ।
श्यामा श्यामल नेत्रान्ता श्याम न्यग्रोध सेविनी ॥ ४१ ॥

तुङ्ग स्थान प्रदा तुङ्गा गङ्गा प्रार्थन तत्परा ।
गतिप्रिया गर्भरूपा गति र्गतिमती च गौः ॥ ४२ ॥

गर्व दूरा गर्व हरी गति निर्जित हंसिका ।
दशानन वधोद्युक्ता दयासिन्धु र्दशातिगा ॥ ४३ ॥

सेतु हेतु र्हेतुहीना हेतु र्हेतुमदा त्मिका ।
हनूमत् स्वामिनी हृष्टा हृष्ट पुष्ट जन स्तुता ॥ ४४ ॥

वामकेशी वामनेत्री वाद्या वादि जयप्रदा ।
धन धान्यकरी धर्म्या धर्माधर्म फलप्रदा ॥ ४५ ॥

समुद्र तनया स्तुत्या समुद्रा सद्रस प्रदा ।
सामप्रिया सामनुता सान्त्वोक्ति स्सायुधा सती ॥ ४६ ॥

शीतीकृताग्नि श्शीताम्शु मुखी शीलवती शिशुः ।
भस्मीकृता शरपुरा भरताग्रज भामिनी ॥ ४७ ॥

राक्षसी दुःखदा राज्ञी राक्षसी गण रक्षिणी ।
सरस्वती सरिद्रूपा सन्नुता सद्गति प्रदा ॥ ४८ ॥

क्षमावती क्षमाशीला क्षमापुत्री क्षमाप्रदा ।
भर्तृ भक्ति परा भर्तृ दैवता भरत स्तुता ॥ ४९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दूषणाराति दयिता दयिता लिङ्गनोत्सुका ।
अल्पमध्या ऽल्पधी दूरा कल्पवल्ली कलाधरा ॥ ५० ॥

सुग्रीव वन्द्या सुग्रीवा व्यग्रीभावा वितानता ।
नीलाश्मभूषा नीलादि स्तुता नीलोत्पलेक्षणा ॥ ५१ ॥

न्याय्या न्यायपरा राध्या न्यायान्याय फलप्रदा ।
पुण्यदा पुण्यलभ्या च पुरुषोत्तम भामिनी ॥ ५२ ॥

पुरुषार्थ प्रदा पुण्या पण्या फणिपति स्तुता ।
अशोक वनिका स्थाना ऽशोका शोकविनाशिनी ॥ ५३ ॥

शोभारूपा शुभा शुभ्रा शुभ्रदन्ता शुचि स्मिता ।
पुरुहूत स्तुता पूर्णा पूर्णरूपा पुरेशया ॥ ५४ ॥

दर्भाग्रधी र्दहरगा दर्भे ब्रह्मास्त्र भामिनी ।
त्रैलोक्य माता त्रैलोक्य मोहिनी त्रात वायसा ॥ ५५ ॥

त्राणैक कार्या त्रिदशा त्रिदशाधीश सेविता ।
लक्ष्मणा लक्ष्मणाराध्या लक्ष्मणाग्रज नायिका ॥ ५६ ॥

लङ्का विनाशिनी लक्ष्या ललना ललिताशया ।
तारकाख्य प्रिया तारा तारिका तारिणी तरिः ॥ ५७ ॥

ताटका ऽराति महिषी तापत्रय निवारिणी ।
ताम्राधरा तार्क्ष्य नुता ताम्यन्ती तारितानता ॥ ५८ ॥

रघुवंश पताकाश्री रघुनाथ सधर्मिणी ।
वनप्रिया वनपरा वनजाक्षी विनीतिदा ॥ ५९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विद्याप्रिया विद्वदीड्या विद्या ऽविद्या विनाशिनी ।
शमान्विता शमपरा शरभङ्ग मुनि स्तुता ॥ ६०॥

बिल्वप्रिया बलिमती बलिसंस्तुत वैभवा ।
बलिराक्षस संहर्त्री बहुळा बहु विग्रहा ॥ ६१॥

क्षत्रियान्तकरा राति भार्या क्षत्रिय वंशजा ।
शरणागत संरक्षा शर चापासि पूजिनी ॥ ६२॥

शरीर भाजित रतिः शरीरज हर स्तुता ।
कल्याणी करुणा मूर्तिः कलुषघ्नी कविप्रिया ॥ ६३॥

अचक्षु रश्रुति रपाद् प्राणा ऽचामना अधीः ।
अपाणि पादा ऽप्यव्यक्ता व्यक्ता व्यञ्जित विष्टपा ॥ ६४॥

शमिप्रिया शमपरा शर्मदा शर्म रूपिणी ।
सुतीक्ष्ण वन्दनीयाङ्घ्रिः सुतव द्वत्सला सुधीः ॥ ६५॥

सुतीक्ष्ण दण्डा सुव्यक्ता सुतीभूत जगत्त्रया ।
मधुरा मधुरालापा मधुसूदन भामिनी ॥ ६६॥

माधवी माधव सती माधवी कुसुम प्रिया ।
परा परभृता ऽलापा परापर गति प्रदा ॥ ६७॥

वाल्मीकि वदनाम्भोधि सुधा वलरिपु स्तुता ।
नीलाङ्गदादि विनुता नीलाङ्गद विभूषिता ॥ ६८॥

विद्याप्रदा वियन्मध्या विद्याधर कृतस्तवा ।
कुल्या कुशलदा कल्या कला कुश लव प्रसूः ॥ ६९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वशिनी विशदा वश्या वन्द्या वन्दारु वत्सला ।
माहेन्द्री महदा मह्या मीनाक्षी मीन केतना ॥ ७० ॥

कमनीया कलामूर्तिः कुपिता ऽकुपिता कृपा ।
अनसूया ऽङ्गरागाङ्का ऽनसूया सूरि वन्दिता ॥ ७१ ॥

अम्बा बिम्बाधरा कम्बु कन्धरा मन्थरा मतिः ।
रामानुगा ऽऽराम चरी रात्रिञ्चर भयङ्करी ॥ ७२ ॥

एकवेणी धरा भूमि शयना मलिनाम्बरा ।
रक्षोहरी गिरिलसद् वक्षोजा ऽप्यक्षरात्मिका ॥ ७३ ॥

मेधा मेधाविनी मेध्या मैथिली मातृ वर्जिता ।
अयोनिजा वयोनित्या पयोनिधि सुता पृथुः ॥ ७४ ॥

वानरर्क्ष परीवारा वारिजास्या वरान्विता ।
अभया ऽभयदा भद्रा निद्रा मुद्रा मुदायतिः ॥ ७५ ॥

गृध्र मोक्षप्रदा गृध्नुः गृहीत वरमालिका ।
श्वश्रेयस प्रदा शश्वद् भवा शतधृति प्रसूः ॥ ७६ ॥

शरत्पद्म पदा शान्ता श्वशुरार्पित भूषणा ।
लोकाधारा निराधारा नीरागा नीरज प्रिया ॥ ७७ ॥

नीरजा निस्तमा निस्स्वा नीरीति र्नीति नैपुणा ।
नारीमणि र्नराकारा निराकारा ऽनिराकृता ॥ ७८ ॥

कौमारी कौशल निधिः कौशिकी कौस्तुभ स्वसा ।
सुधाकरा नुजा सुभ्रूः सु जाता सोम भूषणा ॥ ७९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

काळी कलापिनी कान्तिः कौशेयाम्बर मण्डिता ।
शश क्षतज संरक्त चन्दना लिप्त गात्रका ॥ ८०॥

मञ्जीर मण्डित पदा मञ्जु वाक्या मनोरमा ।
गायत्र्यर्थ स्वरूपा च गायत्री गोगति प्रदा ॥ ८१॥

धन्या ऽक्षरात्मिका धेनुः धार्मिका धर्मवर्धिनी ।
एला लका ऽप्येधमान कृपा कृसर तर्पिता ॥ ८२॥

कृष्णा कृष्णालका कृष्टा कष्टघ्नी खण्डिताशरा ।
कला लापा कलहकृद् दूरा काव्याब्धि कौमुदी ॥ ८३॥

अकारणा कारणात्मा कारणा विनि वर्तिनी ।
कविप्रिया कवनदा कृतार्था कृष्ण भामिनी ॥ ८४॥

रुक्मिणी रुक्मिणी भागिनी रुचिरा रुचिदा रुचिः ।
रुक्मप्रिया रुक्मभूषा रूपिणी रूपवर्जिता ॥ ८५॥

अभीष्मा भीष्म तनया भीति हृद् भूति दायिनी ।
सत्या सत्यव्रता सह्या सत्यभामा शुचिव्रता ॥ ८६॥

सम्पन्ना संहिता सम्पत् सवित्री सवितृ स्तुता ।
द्वारका निलया द्वार भूता द्विपगदा द्विपात् ॥ ८७॥

एकैकात्मैक रूपैक पत्नी चैकेश्वरी प्रसूः ।
अज्ञान ध्वान्त सूर्यार्चिः दारिद्र्याग्नि घनावळी ॥ ८८॥

प्रद्युम्न जननी प्राप्या प्रकृष्टा प्रणति प्रिया ।
वासुदेव प्रिया वास्तु दोषघ्नी वार्त संश्रिता ॥ ८९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वत्सला कृत्स्न लावण्या वर्ण्या ऽगण्या स्वतन्त्रिका ।
भक्ता भक्त पराधीना भवानी भव सेविता ॥ ९०॥

राधापराध सहनी राधिता शेष सज्जना ।
कोमळा कोमळमतिः कुसुमाहित शेखरा ॥ ९१॥

कुरुविन्द मणि श्रेणी भूषणा कौमुदी रुचिः ।
अम्लान माल्या सम्मान कारिणी सरयू रुचिः ॥ ९२॥

कटाक्ष नृत्यत् करुणा कनकोज्वल भूषणा ।
निष्टप्त कनका भाङ्गी नील कुञ्चित मूर्धजा ॥ ९३॥

विशृङ्खला वियोनिस्था विद्यमाना विदांवरा ।
शृङ्गारिणी शिरीषाङ्गी शिशिरा शिरसि स्थिता ॥ ९४॥

सूर्यात्मिका सूरि नम्या सूर्य मण्डल वासिनी ।
वह्नि शैत्य करी वह्नि प्रविष्टा वह्नि शोधिता ॥ ९५॥

निर्हेतु रक्षिणी निष्काभरणा निष्क दायिनी ।
निर्ममा निर्मित जगत् निस्तमस्का निराश्रया ॥ ९६॥

निरयार्ति हरी निघ्ना निहिता निहता सुरा ।
राज्याभिषिक्ता राज्येशी राज्यदा राजिता श्रिता ॥ ९७॥

राकेन्दु वदना रात्रि चरघ्नी राष्ट्र वल्लभा ।
श्रिता च्युत प्रिया श्रोत्री श्रीदाम सख वल्लभा ॥ ९८॥

रमणी रमणीयाङ्गी रमणीय गुणाश्रया ।
रतिप्रिया रतिकरी रक्षोघ्नी रक्षिताण्डका ॥ ९९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रसरूपा रसात्मैक रसा रसपरा श्रिता ।
रसातल स्थिता रास तत्परा रथ गामिनी ॥ १००॥

अश्वारूढा गजारूढा शिबिका तल शायिनी ।
चलत्पादा चलद्वेणी चतुरङ्ग बलानुगा ॥ १०१॥

चञ्चत् चन्द्रकरा कारा चतुरा चतुराकृतिः ।
चूर्णीकृतशरा चूर्णाऽलका चूतफल प्रिया ॥ १०२॥

शिखा शीघ्रा शिखाकारा शिखा विधृत मल्लिका ।
शिक्षा शिक्षित मूर्खाळि: शिता शीता शताकृतिः ॥ १०३॥

वैष्णवी विष्णुसदृशी विष्णुलोक प्रदा वृषा ।
वीणागान प्रिया वीणा वीणाधर मुनिस्तुता ॥ १०४॥

वैदिकी वैदिकाचार प्रीता वैडूर्य भूषणा ।
सुन्दराङ्गी सुहृत् स्फीता साक्षिणी साक्षमालिका ॥ १०५॥

क्रिया क्रियापरा क्रूरा क्रूर राक्षस हारिणी ।
तल्पस्था तरणि स्थाना तापत्रय निवारिणी ॥ १०६॥

तीर्ण प्रतिज्ञा तीर्थेशी तीर्थपादा तिथिप्रिया ।
चर्या चरणदा चीर्णा चीराङ्का चत्व स्थिता ॥ १०७॥

लता लताङ्गी ललिता लक्ष्या ऽलक्ष्या शराऽलया ।
लीला लीलाहत खला लीना लीढा शुभावळि: ॥ १०८॥

लूतोपमाना लूनाघा लोलाऽलोल विभूतिदा ।
अमर्त्या मर्त्य सुलभा मानुषी मानवी मनुः ॥ १०९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सुगन्धा सुहिता सूक्ष्मा सूक्ष्ममध्या सुतोज्ज्वला ।
मणि र्मणिमती मञ्जुगमना महिता मुनिः ॥ ११०॥

मिता ऽमित सुखाकारा मीलिता मीनलोचना ।
गोमती गोकुल स्थाना गोदा गोकुल वासिनी ॥ १११॥

गजेन्द्र गामिनी गम्या माद्री मायाविनी मधुः ।
त्रिवृ देकपदी त्रिष्टुब् अनष्टुप् पङ्क्ति रूपिणी ॥ ११२॥

द्विपात् त्रिपाद् अष्टपदी नवपाच्च चतुष्पदा ।
पञ्च्याननो पदेष्ट्रयाज्ञा करणी पङ्क्ति पावनी ॥ ११३॥

शेखरीभूत शीतांशुः शेष तल्पाधि शायिनी ।
शेमुषी मुषिताशेष पातका मातृका मयी ॥ ११४॥

शिव वन्द्या शिखरिणी हरिणी करिणी सृणिः ।
जगच्चक्षु र्जगन्माता जङ्गमा जङ्गम प्रसूः ॥ ११५॥

सर्वशक्ति स्सर्वमुक्तिः सर्वभक्ति स्समाहिता ।
क्षीरप्रिया क्षारदूरा क्षीराम्बुधि सुता ऽक्षया ॥ ११६॥

मायिनी मथनोद्भूता मुग्धा दुग्धोपम स्मिता ।
वशिनी वाम नयना हंसिनी हंस सेविता ॥ ११७॥

अनङ्गा ऽनङ्ग जननी सुतुङ्ग पद दायिनी ।
विश्वा विश्वेडिता विश्व धात्री विश्वाधिकार्थदा ॥ ११८॥

गद्य पद्य स्तुता गन्त्री गच्छन्ती गरुडासना ।
पश्यन्ती श्रृण्वती स्पर्श कर्त्री रसनिरूपिणी ॥ ११९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भृत्यप्रिया भृंतिकरी भरणीया भयापहा ।
प्रकर्षदा प्रसिद्धेशा प्रमाणं प्रमितिः प्रमा ॥ १२०॥

अध्यास रूपिण्यध्यस्ता मध्यस्था मध्यमा मितिः ।
तलोदरी तलकरी तटिद्रूपा तरङ्गिणी ॥ १२१॥

अकम्पा कम्पित रिपुः जम्भारि सुख दायिनी ।
दया विष्टा शिष्ट सुहृत् विष्टरश्रवसः प्रिया ॥ १२२॥

हृषीक सुखदा हृद्या ऽभीता भीतापहारिणी ।
माता मनुमुखाराध्या मातङ्गी मानिताखिला ॥ १२३॥

भृगु प्रिया भृगु सुता भार्गवेढ्या ऽभयप्रदा।
अनुकूला ऽमलतनुः लोपहीना लिपिस्तुता ॥ १२४॥

अन्नदाऽन्नस्वरूपा ऽन्न पूर्णाऽपर्णा ऋणापहा ।
बृन्दा बृन्दावन रतिः बन्दीभूता मरी स्तुता ॥ १२५॥

तेजस्विनी तूर्यपूज्या तेज स्त्रितय रूपिणी ।
षडास्य जयदा षष्ठी षडूर्मि परिवर्जिता ॥ १२६॥

षड्जप्रिया सत्त्व रूपा सव्य मार्ग प्रपूजिता ।
सनातन तनुस्सन्ना सम्पन्मूर्ति स्सरीसृपा ॥ १२७॥

जिताशा जन्मकर्मादि नाशिनी ज्येष्ठ रूपिणी ।
जनार्दन हृदावासा जनानन्दा जयाऽजनिः ॥ १२८॥

वासना वासनाहर्त्री वामा वाम विलोचना ।
पयस्विनी पूततनुः पात्री पारिषदर्चिता ॥ १२९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महा मोह प्रमथिनी महा हर्षा महा धृतिः ।
महा वीर्या महा चर्या महा प्रीता महा गुणा ॥ १३० ॥

महा शक्तिः महा सक्तिः महा ज्ञाना महा रतिः ।
महा पूज्या महेज्या च महा लाभ प्रदा महा॥ १३१ ॥

महा सम्पत् महाकम्पा महा लक्ष्या महा शया ।
महा रूपा महा धूपा महा लक्ष्मी र्महामहा ॥ १३२ ॥

महा रोग हरी मुक्ता महा लोभ हरी मृडा ।
मेदस्विनी मातृपूज्या मेया मा मातृरूपिणी ॥ १३३ ॥

नित्य मुक्ता नित्य बुद्धा नित्य तृप्ता निधि प्रदा ।
नीतिज्ञा नीतिमद्वन्द्या नीता प्रीताऽऽच्युत प्रिया ॥ १३४ ॥

मित्रप्रिया मित्रविन्दा मित्रमण्डल शोभिनी ।
निरङ्कुशा निराधारा निरास्थाना निरामया ॥ १३५ ॥

निर्लेपा निस्पृहा नील कबरी नीरज प्रिया।
निरा बाधा निरा कर्त्री निस्तुला निष्क भूषिता ॥ १३६ ॥

निरञ्जना निर्मथना निष्क्रोधा निष्परिग्रहा ।
निर्लोभा निर्मला नित्य तेजा नित्यकृपा न्विता ॥ १३७ ॥

धनाढ्या धर्मनिलया धनदा धनदार्चिता ।
धर्म कर्त्री धर्म गोप्त्री धर्मिणी धर्मिदेवता ॥ १३८ ॥

धात्री धरित्री धरणिः धुत पापा धुताशरा ।
स्त्रीदेवता ऽक्रोधना चामोहा ऽलोभा ऽमितार्थदा ॥ १३९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कालरूपा ऽकालवशा कालज्ञा काल पालिनी ।
ब्रह्मज्ञा ब्रह्म सुखदा ब्रह्मण्या ब्रह्म रूपिणी ॥ १४० ॥

सुमति स्सुभगा सुन्दा प्रयति र्नियति र्यतिः ।
सर्व प्राण स्वरूपा च सर्वेन्द्रिय सुखप्रदा ॥ १४१ ॥

संविन्मयी सदाचारा सदा तुष्टा सदा नता ।
कौमुदी कुमुदानन्दा कुः कुत्सित तमोहरी ॥ १४२ ॥

हृदयार्ति हरी हार शोभिनी हानि वारिणी ।
सभाज्या सं विभज्याज्ञा ज्यायसी जनि हारिणी ॥ १४३ ॥

संहिता ऽसंहिता सह्या शयाना शान्तवन्दिता।
महा क्रोधा महा हर्षा महर्षि जन सेविता ॥ १४४ ॥

कैटभारि प्रिया कीर्तिः कीर्तिता कैतवोज्झिता ।
कौमुदी शीतल मनाः कौसल्या सुत भामिनी ॥ १४५ ॥

कासार नाभिः का सा याऽऽप्येषेयत्ता विवर्जिता ।
अन्तिकस्था ऽतिदूरस्था हृदयस्था ऽम्बुज स्थिता ॥ १४६ ॥

मुनि चित्त स्थिता मौनि गम्या मान्धातृ पूजिता ।
मति स्थिरी कर्तृ कार्य नित्य निर्वहणोत्सुका ॥ १४७ ॥

मही स्थिता च मध्यस्था द्युस्थिता ऽधस्थितोर्ध्वगा ।
भूति र्विभूति स्सुरभिः सुरसिद्धार्ति हारिणी ॥ १४८ ॥

अति भोगाऽति दानाऽति रूपाऽति करुणाऽतिभाः ।
विज्वरा वियदाभोगा वितन्द्रा विरहासहा ॥ १४९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शूर्पकाराति जननी शून्यदोषा शुचिप्रिया ।
निस्पृहा सस्पृहा नीळा सपत्नी निधि दायिनी ॥ १५० ॥

कुम्भ स्तनी कुन्द रदा कुङ्कुमा लेपिता कुजा ।
शास्त्रज्ञा शास्त्र जननी शास्त्रज्ञेया शरीरगा ॥ १५१ ॥

नतेष्ट कल्पक लता नताज्ञान विनाशिनी।
सत्य भास्सत्य सङ्कल्पा सत्यकामा सरोजिनी । २५२ ॥

चन्द्र प्रिया चन्द्र गता चन्द्रा चन्द्रसहोदरी ॥
औदर्यौपयिकी प्रीता गीता चौता गिरिस्थिता ॥ १५३ ॥

अनन्विता ऽप्यमूलार्ति ध्वान्त पुञ्ज रवि प्रभा ॥ १५३ ॥
मङ्गला मङ्गळपरा मृग्या मङ्गळ देवता । १५४

(इति श्री नारदीयोपपुराणे नारदमित्रसहसंवादे लक्ष्मी
सहस्रनामोपदेशो नाम द्वितीयोऽध्याय:)

अथ तृतीयोऽध्याय:

नारद उवाच-

इत्येवं नाम साहस्रं साष्टोत्तर शतं श्रियः ।
कथितं ते महाराज भुक्ति मुक्ति फलप्रदम् ॥ १ ॥

भूतानां अवताराणां तथा विष्णो र्भविष्यताम् ।
लक्ष्म्या: नित्यानुगामिन्याः गुण कर्मानु सारतः ॥ २ ॥

उदाहृतानि नामानि सारभूतानि सर्वतः ।
इदं तु नाम साहस्रं ब्रह्मणा कथितं मम ॥ ३ ॥

उपाम्शु वाचिक जपैः प्रीयेतास्य हरिप्रिया ।
लक्ष्मी नामसहस्रेण श्रुतेन पठितेन वा ॥ ४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

धर्मार्थी धर्मलाभी स्यात् अर्थार्थी चार्थवान्भवेत् ।
कामार्थी लभते कामान् सुखार्थी लभते सुखम् ॥ ५॥

इहामुत्र च सौख्याय लक्ष्मी भक्ति र्हितङ्करी ।
इदं श्रीनामसाहस्रं रहस्यानां रहस्यकम् ॥ ६॥

गोप्यं त्वया प्रयत्नेन अपचार भयाच्छ्रियः ।
नैतद् व्रात्याय वक्तव्यं न मूर्खाय न दम्भिने ॥ ७॥

न नास्तिकाय नो वेद शास्त्र विक्रय कारिणे ।
वक्तव्यं भक्तियुक्ताय दरिद्राय च सीदते ॥ ८॥

सकृत्पठित्वा श्रीदेव्याः नामसाहस्र मुत्तमम् ।
दारिद्र्यान्मुच्यते पुर्वं जन्मकोटि भवान्नरः ॥ ९॥

त्रिवार पठना दस्य सर्वपाप क्षयो भवेत् ।
पञ्चचत्वारिंशदहं सायं प्रातः पठेत् तु यः ॥ १०॥

तस्य सन्निहिता लक्ष्मीः किमतोऽधिक माप्यते ।
अमायां पौर्णमास्यां च भृगुवारेषु सङ्क्रमे ॥ ११॥

प्रातः स्नात्वा नित्यकर्म यथाविधि समाप्य च ।
स्वर्णपात्रेऽथ रजते कांस्यपात्रेऽथवा द्विजः ॥ १२॥

निक्षिप्य कुङ्कुमं तत्र लिखित्वा ऽष्टदळाम्बुजम् ।
कर्णिका मध्यतो लक्ष्मी बीजं साधु विलिख्य च ॥ १३॥

प्रागादिषु दळेष्वस्य वार्णीं ब्राह्म्यादि मातृकाः ।
विलिख्य वर्णतोऽथेदं नाम साहस्र मादरात् ॥ १४॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यः पठेत् तस्य लोकास्तु सर्वेऽपि वशगा स्ततः ।
राज्य लाभः पुत्र पौत्र लाभ श्शत्रुजय स्तथा ॥ १५॥

सङ्कल्पादेव तस्य स्यात् नात्र कार्या विचारणा ।
अनेन नाम सहस्रे णार्चयेत् कमलां यदि ॥ १६॥

कुङ्कुमे नाथ पुष्पै र्वा न तस्य स्यात् पराभवः ।
उत्तमोत्तमता प्रोक्ता कमलानां इहार्चने ॥ १७॥

तदभावे कुङ्कुमं स्यात् मल्ली पुष्पाञ्जलि स्ततः ।
जातीपुष्पाणि च ततः ततो मरुवकावळिः ॥ १८॥

पद्मानां मेव रक्तत्वं श्लाघितं मुनिसत्तमैः ।
अन्येषां कुसुमानां तु शौक्ल्य मेव श्रियोऽर्चने ॥ १९॥

प्रशस्तं नृपति श्रेष्ठ तस्माद् यत्नपरो भवेत् ।
किमिहात्र बहूक्तेन लक्ष्मी नाम सहस्रकम् ॥ २०॥

वेदानां सरहस्यानां सर्वशास्त्र गिरा मपि ।
तन्त्राणा मपि सर्वेषां सारभूतं न संशयः ॥ २१॥

सर्वपाप क्षयकरं सर्वशत्रु विनाशनम् ।
दारिद्र्य ध्वंसनकरं पराभव निवर्तकम् ॥ २२॥

विश्लिष्ट बन्धु संश्लेष कारकं सद्गति प्रदम् ।
तन्वन्ते चिन्मयात्म्यैक्य बोधा दानन्द दायकम् ॥ २३॥

लक्ष्मी नाम सहस्रं तत् नरो ऽवश्यं पठेत् सदा ।

(इति नारदीयोपपुराणे नारदमित्रसहसंवादे – लक्ष्मी सहस्रनामफलकथनं नाम तृतीयोऽध्यायः।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीसूक्त जपविधिः
(मन्त्रकोशोक्तः)

ओं अस्यश्री हिरण्यवर्णामिति श्रीसूक्तस्य-ऋचां पञ्चदशानां-आद्यायाः श्रीः-आनन्द-कर्दम-चिक्लीतः- श्रीपुत्राः ऋषयः, आद्याः तिस्रो अनुष्टुभः, ततो बृहती, ततः त्रिष्टुभौ-ततो अष्टौ अनुष्टुभाः, अन्त्यो प्रस्तारपङ्क्तिः, आद्यायाः श्रीरग्निः-अन्यासां श्रीःदेवताः, "हिरण्यवर्णां" इति बीजं, "कांसोस्मि" इति शक्तिः, मम श्रुति स्मृति पुराणोक्त फलप्राप्त्यर्थं, आयुरारोग्यऐश्वर्याभिवृद्ध्यर्थं, श्री महालक्ष्मी देवताप्रीत्यर्थं, जपे विनियोगः ततः क्रमेण मूर्धाक्षि कर्णनासा मुख ग्रीवांस बाहू हृदय नाभि गुह्य गुदोरू जङ्घा चरणेषु पञ्चदश ऋचो न्यसेत्॥ तद्यथा ॥

1. शिरसि - ओं हिरण्यवर्णां.....+.....मआवह ॥
2. नेत्रयोः - ओं तांम आवह.....+.....पुरुषानहम् ॥
3. कर्णयोः - ओं अश्वपूर्वां.....+.....जुषताम् ॥
4. नासिकायां - ओं कांसोस्मितां.....+.....श्रियम् ॥
5. मुखे - ओं चन्द्रां प्रभासां.....+.....त्वां वृणे ॥
6. ग्रीवायां - ओं आदित्यवर्णे.....+.....अलक्ष्मीः ॥
7. अंसयोः - ओं उपैतुमां.....+.....दधातुमे ॥
8. बाह्वोः - ओं क्षुत्पिपासां.....+.....गृहात् ॥
9. हृदये - ओं गन्धद्वारां.....+.....श्रियम् ॥
10. नाभौ - ओं मनसः काम.....+.....यशः ॥
11. गुह्ये - ओं कर्दमेन.....+.....पद्ममालिनीम् ॥
12. गुदे - ओं आपःसृजन्तु.....+.....मे कुले ॥
13. ऊर्वोः - ओं आर्द्रां पुष्करिणीं.....+.....म आवह ॥
14. जङ्घयोः - ओं आर्द्रां यःकरिणीं.....+.....म आवह ॥
15. चरणयोः - ओं तां म आवह.....+.....पुरुषानहम् ॥

एवं स्वाङ्गे ऋचो विन्यस्य-प्रणवेन करौ त्रिः प्रमृज्य -

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

करन्यासं कुर्यात्। तद्यथा-

1. ओं हिरण्मय्यै नमः	-	अङ्गुष्ठाभ्यां नमः
2. ओं चन्द्रायै नमः	-	तर्जनीभ्यां नमः
3. ओं रजतस्रजायै नमः	-	मध्यमाभ्यां नमः
4. ओं हिरण्यस्रजायै नमः	-	अनामिकाभ्यां नमः
5. ओं हिरण्याक्षायै नमः	-	कनिष्ठिकाभ्यां नमः
6. ओं हिरण्यवर्णायै नमः	-	करतलकरपृष्ठाभ्यां नमः

एवं करन्यासं विधाय। ततो षडङ्गानि न्यसेत्। तद्यथा

1. ओं हिरण्मय्यै नमः	-	हृदयाय नमः
2. ओं चन्द्रायै नमः	-	शिरसे स्वाहा
3. ओं रजतस्रजायै नमः	-	शिखायै वषट्
4. ओं हिरण्यस्रजायै नमः	-	कवचाय हुं
5. ओं हिरण्याक्षायै नमः	-	नेत्रेभ्यो वौषट्
6. ओं हिरण्यवर्णायै नमः	-	अस्त्राय फट्

भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ततो देवीं ध्यायेत्।

स्वरूप ध्यानम्

अरुण कमल संस्था तत्रजःपुञ्ज वर्णा -
करकमल धृतेष्टा अभीति युग्मांबुजा च ।
मणिमकुट विचित्रा लङ्कृता कल्पजालैः -
भवतु भुवन माता सन्ततं श्रीः श्रियै नः ॥

श्रियं हृदयकमले मनसा पञ्चोपचारैस्संपूज्य ॥

1. ओं लं पृथिव्यात्मिकायै गन्धं समर्पयामि ॥
2. ओं हं आकाशात्मिकायै पुष्पं समर्पयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

3. ओं यं वाय्वात्मिकायै धूपं आघ्रापयामि ॥
4. ओं रं अग्न्यात्मिकायै दीपं दर्शयामि ॥
5. ओं वं अमृतात्मिकायै अमृतं निवेदयामि ॥
6. ओं सं सर्वात्मिकायै सर्वोपचारान्समर्पयामि

॥मन्त्रः॥ श्री सूक्तं जपेत्। पञ्चदशऋचो जपेत्। तद्यथा

1. हिरण्यवर्णां.....+.....मआवह ॥
2. तांम आवह.....+.....पुरुषानहम् ॥
3. अश्वपूर्वां.....+.....जुषताम् ॥
4. कांसोस्मितां.....+.....श्रियम् ॥
5. चन्द्रां प्रभासां.....+.....त्वां वृणे ॥
6. आदित्यवर्णे.....+.....अलक्ष्मीः ॥
7. उपैतुमां.....+.....दधातुमे ॥
8. क्षुत्पिपासां.....+.....गृहात् ॥
9. गन्धद्वारां.....+.....श्रियम् ॥
10. मनसः काम.....+.....यशः ॥
11. कर्दमेन.....+.....पद्ममालिनीम् ॥
12. आपःसृजन्तु.....+.....मे कुले ॥
13. आर्द्रां पुष्करिणीं.....+.....ममावह ॥
14. आर्द्रां यःकरिणीं.....+.....ममावह ॥
15. तां म आवह.....+.....पुरुषानहम् ॥

यःशुचिः.....+.....श्रीकामः सततं जपेत्। (पञ्चदशऋचः)

शजपान्ते यथाविधि उपसंहरणं च विदध्यात् ॥ ततो जपं समर्पयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीसूक्त मन्त्राः ॥ (संपूर्णाः)

ओं हिरण्यवर्णां हरिणीं सुवर्ण रजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ 1

ओं तां म आवह जातवेदो लक्ष्मी मनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ 2

ओं अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् ।
श्रियं देवी मुपह्वये श्रीर्मा देवी र्जुषताम् ॥ 3

ओं कां सोस्मितां हिरण्य प्राकारा माद्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहो पह्वये श्रियम् ॥ 4

ओं चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टा मुदाराम् ।
तां पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ 5

ओं आदित्य वर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसा नुदन्तु मायान्त रायाश्च बाह्या अलक्ष्मीः ॥ 6

ओं उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातुमे ॥ 7

ओं क्षुत्पिपासामलां ज्येष्ठा मलक्ष्मीं नाशयाम्यहम् ।
अभूति मसमृद्धिञ्च सर्वा न्निर्णुद मे गृहात् ॥ 8

ओं गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहो पह्वये श्रियम् ॥ 9

ओं मनसःकाम माकूतिं वाचः सत्य मशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ 10

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ 11

ओं आपःसृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ॥ 12

ओं आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ 13

ओं आर्द्रां यःकरिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ 14

ओं तां म आवह जातवेदो लक्ष्मीमनप गामिनीम् ।
यस्यां हिरण्यं प्रभूतिं गावोदास्योऽश्वान् विन्देयं पुरुषानहम् ॥ 15

(श्रीसूक्त फलश्रुति रूपः मन्त्रः)

यश्शुचिः प्रयतो भूत्वा जुहुया दाज्य मन्वहम् ।
सूक्तं पञ्चदशर्चं च श्री कामः सततं जपेत् ॥ 1

पद्मानने पद्मिनि पद्मपत्रे - पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्व मनोनुकूले - त्वत्पादपद्मं मयि सन्निधस्व ॥2

पद्मानने पद्मऊरू पद्माक्षी पद्मसंभवे ।
तन्मे भजसि पद्माक्षि येन सौख्यं लभाम्यहम् ॥ 3

अश्वदायी च गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्व कामांश्च देहिमे ॥ 4

पुत्रपौत्र धनं धान्यं हस्त्यश्वादि गवेरथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥ 5

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

धनमग्निर्धनं वायुः धनं सूर्यो धनं वसुः ।
धन मिन्द्रो बृहस्पति र्वरुणं धन मस्तु मे ॥ 6

वैनतेय सोमं पिब सोमं पिबतु वृत्रह ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ 7

नक्रोधो नच मात्सर्यं नलोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां भक्तानां श्रीसूक्तं जपेत् ॥ 8

सरसिजनिलये सरोज हस्ते -
धवलतरां शुक गन्धमाल्य शोभे ।
भगवति हरिवल्लभे मनोज्ञे -
त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥ 9

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं देवीं नामाम्यच्युत वल्लभाम् ॥ 10

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि-
तन्नो लक्ष्मी प्रचोदयात् ॥ 11

आनन्दः कर्दमः श्रीदः चिक्लीद इति विश्रुताः ।
ऋषयश्च श्रियः पुत्राः मयि श्रीर्देवि देवता ॥ 12

ऋणरोगादि दारिद्र्यं पापञ्च अपमृत्यवः ।
भयशोक मनस्तापा नश्यन्तु मम सर्वदा ॥ 13

श्रीवर्चस्व मायुष्य मारोग्य माविधात्पावमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शत संवत्सरं दीर्घमायुः ॥

इति श्रुतिप्रसिद्ध श्रीसूक्तमन्त्रः समाप्तः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्मी मन्त्रभेद जपक्रमः

श्रीदेवी मूलमन्त्र जपक्रमः (एकाक्षरीविद्या-ऐश्वर्यप्रदा)

अस्य श्रीदेवी मन्त्रस्य - भृगु ऋषिः निचृत् छन्दः। श्री देवता। शं बीजम्। ईं शक्तिः। रं कीलकम्। श्रियः प्रसादसिद्ध्यर्थे जपेविनियोगः।

श्रां इत्यादिभिः श्रीबीजेन कराङ्गन्यासौकुर्यात्।

करन्यास :	अङ्गन्यासः
1. ओं श्रां - अङ्गुष्ठाभ्यां नमः	1. ओं श्रां - हृदयाय नमः
2. ओं श्रीं - तर्जनीभ्यां नमः	2. ओं श्रीं - शिरसे स्वाहा
3. ओं श्रूं - मध्यमाभ्यां नमः	3. ओं श्रूं - शिखायै वषट्
4. ओं श्रैं - अनामिकाभ्यां नमः	4. ओं श्रैं - कवचाय हुं
5. ओं श्रौं - कनिष्ठिकाभ्यां नमः	5. ओं श्रौं - नेत्रेभ्यो वौषट्
6. ओं श्रः - करतलकरपृष्ठाभ्यां नमः	6. ओं श्रः - अस्त्राय फट्

श्रीध्यानम्

भूयाद् भूयो द्विपद्मा ऽभय वरद करा तप्त कार्तस्वराभा -
शुभ्राऽभ्राभेभ युग्म द्वय कर धृत कुम्भाद्भि रासिच्यमाना।
रत्नौघा बद्ध मौलि र्विमलतर दुकूलार्तवा लेपनाढ्या –
पद्माक्षी पद्मनाभो रसि कृत वसतिः पद्मगा श्रीः श्रियै नः।।

इतिध्यात्वा – लमित्यादिभिः पञ्चोपचारपूजांकृत्वा बीजमन्त्रं जपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि। 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः (श्रीं बीजमन्त्रः - ओं श्रीं-श्रियै नमः)

इति नाम मन्त्रः (12000 लक्षजपे सिद्धिः भवेत्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्मी मूलमन्त्र जपक्रमः (21 अर्णः)

ओं अस्य-श्री महालक्ष्मी महामन्त्रस्य-बृहस्पति ऋषिः-अनुष्टुप्छन्दः-श्री महालक्ष्मी देवता-श्रीं बीजम्-ह्रीं शक्तिः-ऐं कीलकम्-श्री महालक्ष्मी प्रसादसिद्ध्यर्थे-जपे विनियोगः ॥

करन्यासं कुर्यात्-

1. ओं श्रीं ह्रीं ऐं-ज्ञानाय-अङ्गुष्ठाभ्यां नमः ॥
2. महालक्ष्म्यै-ऐश्वर्याय-तर्जनीभ्यां नमः ॥
3. कमलधारिण्यै-शक्तये-मध्यमाभ्यां नमः ॥
4. सिंहवाहिन्यै-बलाय- अनामिकाभ्यां नमः ॥
5. स्वाहा-तेजसे-कनिष्ठिकाभ्यां नमः ॥
6. ओं श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै-सिंहवाहिन्यै स्वाहा-वीर्याय-करतलकरपृष्ठाभ्यां नमः ॥

एवं करन्यासं विधाय-ततः हृदयादिन्यासं कुर्यात् - तद्यथा -

1. ओं श्रीं ह्रीं ऐं-ज्ञानाय-हृदयाय नमः ॥
2. महालक्ष्म्यै-ऐश्वर्याय-शिरसे स्वाहा ॥
3. कमलधारिण्यै-शक्तये-शिखायै वषट् ॥
4. सिंहवाहिन्यै-बलाय-कवचाय हुम् ॥
5. स्वाहा-तेजसे-नेत्रत्रयाय वौषट् ॥
6. ओं श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै-सिंहवाहिन्यै स्वाहा-अस्त्राय फट् ॥

भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम्

अरुण कमल संस्था तद्रजः पुञ्जवर्णा-
करकमलधृतेष्टाऽभीति युग्मांबुजा च ।
मणिमकुट विचित्रा कल्पजातो ज्वलाङ्गी-
भवतु भुवनमाता सन्ततं श्री श्रियै नः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ततो - हृदये लमित्यादि पञ्चोपचार पूजां - कुर्यात् तद्यथा -

1. ओं लं पृथिव्यात्मिकायै गन्धं समर्पयामि ॥
2. ओं हं आकाशात्मिकायै पुष्पं समर्पयामि ॥
3. ओं यं वाय्वात्मिकायै धूपं आघ्रापयामि ॥
4. ओं रं अग्न्यात्मिकायै दीपं दर्शयामि ॥
5. ओं वं अमृतात्मिकायै अमृतं निवेदयामि ॥
6. ओं सं सर्वात्मिकायै सर्वोपचारान्समर्पयामि ।। इत्यभ्यर्च्य - मूलमन्त्रजपं कुर्यात्। एकविंशत्यर्णमन्त्रः (प्रपञ्चसारे)

मूलमन्त्रः-

"ओं श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा" ॥

जपान्ते-अङ्गन्यासः-दिग्विमोकः-ध्यानं -पञ्चोपचारपूजां-जप समर्पणं च कुर्यात् ॥ तद्यथा -

गुह्यातिगुह्य गोप्त्री त्वं गृहाणास्मत् कृतं जपम्।
सिद्धि र्भवतु मे देवि त्वत्प्रसादात् सुरेश्वरि।।

इतिमन्त्रेण सपुष्पंजपं देव्यै समर्पयेत्।

इति महालक्ष्मीमन्त्र जपक्रमः समाप्तः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलामन्त्र जपक्रमः (27 अर्णाः)

अस्य श्रीकमलात्मिकामन्त्रस्य - भृगु ऋषिः - निचृत् छन्दः- श्रीकमलात्मिका देवता- ओं बीजं - श्रीं शक्तिः - ह्रीं कीलकं - श्री कमलात्मिका प्रसादसिद्ध्यर्थे - मम सौभाग्य संपत् प्राप्त्यर्थे - जपे विनियोगः।

ऋष्यादि न्यासः-

ओं भृगुऋषये नमः - शिरसि ओं निचृत्छन्दसे नमः - मुखे

ओं कमलात्मिका देवतायै नमः - हृदये ओं विनियोगाय नमः - सर्वाङ्गे

करन्यास :	अङ्गन्यासः
ओं श्रां अङ्गुष्ठाभ्यां नमः	ओं श्रां हृदयाय नमः
ओं श्रीं तर्जनीभ्यां नमः	ओं श्रीं शिरसे स्वाहा
ओं श्रूं मध्यमाभ्यां नमः	ओं श्रूं शिखायै वषट्
ओं श्रैं अनामिकाभ्यां नमः	ओं श्रैं कवचाय हुं
ओं श्रौं कनिष्ठिकाभ्यां नमः	ओं श्रौं नेत्राभ्यां वौषट्
ओं श्रः करतलकरपृष्ठाभ्यां नमः	ओं श्रः अस्त्राय फट्

भूर्भुवस्सुवरोमिति दिग्बन्धः - ततो ध्यानम् - कुर्यात्

कान्त्या काञ्चन सन्निभां हिमगिरि प्रख्यैश्चतुर्भिर्गजैः -
हस्तोत्क्षिप्त हिरण्मयाऽमृतघटै रासिच्यमानां श्रियम्।
बिभ्राणां वर मब्जयुग्म मभयं हस्तैः किरीटोज्वलां-
क्षौमाबद्ध नितंब बिंब ललितां वन्देऽरविन्द स्थिताम्॥

इतिध्यात्वा लमित्यादिभिः पञ्चोपचारैः संपूज्य -

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकं सर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः। (27)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलात्मिका मन्त्रजपक्रमः (12 अर्णाः)

अस्य श्रीकमलात्मिकामन्त्रस्य - भृगु ऋषिः - निचृत् छन्दः- श्रीकमलात्मिका देवता- ओं बीजं - श्रीं शक्तिः - ह्रीं कीलकं - श्री कमलात्मिका प्रसादसिध्यर्थे - मम सौभाग्य संपत् प्राप्त्यर्थे - जपे विनियोगः।

ऋष्यादि न्यासः-

ओं भृगुऋषये नमः - शिरसि ओं निचृत्छन्दसे नमः - मुखे

ओं कमलात्मिका देवतायै नमः - हृदये ओं विनियोगाय नमः - सर्वाङ्गे

करन्यास :	अङ्गन्यासः
ओं श्रां अङ्गुष्ठाभ्यां नमः	ओं श्रां हृदयाय नमः
ओं श्रीं तर्जनीभ्यां नमः	ओं श्रीं शिरसे स्वाहा
ओं श्रूं मध्यमाभ्यां नमः	ओं श्रूं शिखायै वषट्
ओं श्रैं अनामिकाभ्यां नमः	ओं श्रैं कवचाय हुं
ओं श्रौं कनिष्ठिकाभ्यां नमः	ओं श्रौं नेत्राभ्यां वौषट्
ओं श्रः करतलकरपृष्ठाभ्यां नमः	ओं श्रः अस्त्राय फट्

भूर्भुवस्सुवरोमिति दिग्बन्धः-

माणिक्य प्रतिम प्रभां हिमनिभै स्तुङ्गै श्चतुर्भि र्गजैः -
हस्ताग्रा हित रत्नकुंभ सलिलै रासिच्यमानां सदा ।
हस्ताब्जै र्वरदान मब्जयुगळा भीतो र्दधानां हरेः -
कान्तां काङ्क्षित पारिजात लतिकां वन्दे सरोजाननाम्॥

इतिध्यात्वा लमित्यादिभिः पञ्चोपचारैः संपूज्य -

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकं सर्वोपचारं समर्पयामि।

द्वादशाक्षरमन्त्रः=ऐं श्रीं ह्रीं क्लीं कमलात्मिकायै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलवासिनी मन्त्रजपक्रमः (प्रपञ्चसारे)

अस्य श्री महालक्ष्मी कमलवासिनी मन्त्रस्य भृगुः ऋषिः निचृद् छन्दः। श्रीमहालक्ष्मी देवता। क्रां बीजम्। म्रीं शक्तिः। लूं कीलकम्। श्री महालक्ष्मी प्रसादसिद्ध्यर्थे जपे विनियोगः।

करन्यासः	अङ्गन्यासः
ओं क्रां अंगुष्ठाभां नमः	ओं क्रां हृदयाय नमः
ओं म्रां तर्जनीभ्यां नमः।	ओं म्रां शिरसे स्वाहा
ओं ल्रां मध्यमाभ्यां नमः।	ओं ल्रां शिखायै वषट्
ओं व्रां अनामिकाभ्यां नमः।	ओं व्रां कवचाय हुं
ओं स्त्रां कनिष्ठिकाभ्यां नमः।	ओं स्त्रां नेत्रेभ्यो वौषट्

ओं त्रां करतलकरपृष्ठाभ्यं नमः। ओं त्रां अस्त्राय फट्।

भूर्भुवस्सुवरों इति दिग्बन्धः ॥ ध्यानम्॥

भूयाद् भूयो द्विपद्मा ऽभय वरद् करा तप्त कार्तस्वराभा -
शुभ्राऽभ्राभेभ युग्म द्वय कर धृत कुम्भाद्भि रासिच्यमाना ।
रत्नौघा बध्द मौलि र्विमलतर दुकूलार्तवा लेपनाढ्या –
पद्माक्षी पद्मनाभो रसि कृत वसतिः पद्मगा श्रीः श्रियै नः ।।

इतिध्यात्वा – लमित्यादिभिः पञ्चोपचारपूजांकृत्वा बीजमन्त्रं जपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकं सर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं ह्रीं क्रीं कमलवासिन्यै क्रीं ह्रीं स्वाहा ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

साम्राज्यलक्ष्मी मन्त्र जप क्रमिः (रुद्रयामळे)

अस्य श्रीसाम्राज्यलक्ष्मी महामन्त्रस्य-हरिः ऋषिः-गायत्री छन्दः-साम्राज्यदायिनी लक्ष्मीदेवता-स् ह् क् ल् ह् रीं बीजम्-श्रीं शक्तिः-

करन्यासः	अङ्गन्यासः
1. ओं श्रां अंगुष्ठाभ्यां नमः	ओं श्रां हृदयाय नमः
2. ओं श्रीं तर्जनीभ्यां नमः।	ओं श्रीं शिरसे स्वाहा
3. ओं श्रूं मध्यमाभ्यां नमः।	ओं श्रूं शिखायै वषट्
4. ओं श्रैं अनामिकाभ्यां नमः।	ओं श्रैं कवचाय हुं
5. ओं श्रौं कनिष्ठिकाभ्यां नमः।	ओं श्रौं नेत्रेभ्यो वौषट्
6. ओं श्रः करतलकरपृष्ठाभ्यं नमः।	ओं श्रः अस्त्राय फट्।

भूर्भुवस्सुवरों इति दिग्बन्धः ॥ ध्यानम्॥

अतसी पुष्पसङ्काशां रत्नभूषण भूषिताम्।
शङ्ख चक्र गदा पद्म शार्ङ्गबाण धरां करैः॥
षड्भिःकराभ्यां देवेशीं वरदाभय शोभिताम्।
एवमष्टभुजां ध्यायेत् सर्वसाम्राज्य सिद्धये॥

लमित्यादिभिः पञ्चोपचार पूजां कृत्वा॥ मूलं जपेत्॥

1. लं पृथिव्यात्मकं गन्धं समर्पयामि। 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकं सर्वोपचारं समर्पयामि।

मूलमन्त्रः = "श्रीं स् ह् क् ल् ह् रीं श्रीं"
(अयं मन्त्रः गुरुमुखेनैव स्वीकार्यः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

जगन्माताश्रीमन्त्र जपंक्रमः
(द्वादशाक्षरीविद्या) (12 वर्णाः)

अस्य श्री लक्ष्मी द्वादशाक्षरमहामन्त्रस्य ब्रह्मा ऋषिः जगन्माता गायत्री छन्दः श्री जगन्मातृ महालक्ष्मी देवता - श्रीं बीजं सौं शक्तिः - क्लीं कीलकं – महालक्ष्मी प्रसदसिद्ध्यर्थे जपे विनियोगः। (शारदातिलके)

करन्यास :	अङ्गन्यासः
ओं ऐं अङ्गुष्ठाभ्यां नमः	ओं ऐं हृदयाय नमः
ओं ह्रीं तर्जनीभ्यां नमः	ओं ह्रीं शिरसे
ओं श्रीं मध्यमाभ्यां नमः	ओं श्रीं शिखायै
ओं क्लीं अनामिकाभ्यां नमः	ओं क्लीं कवचाय
ओं सौं कनिष्ठिकाभ्यां नमः	ओं सौं नेत्रेभ्यो
ओं जगत्प्रसूत्यै नमः:-	ओं जगत्प्रसूत्यै नमः:-
- करतल करपृष्ठाभ्यां नमः	- अस्त्राय फट्।

इति विन्यस्य भूर्भुवस्सुवरोमिति दिग्बन्धः - ध्यानम् -

बालार्क द्युति मिन्दुखण्ड विलसत् कोटीर हारोज्वलां –
रत्नाकल्प विभूषितां कुचनतां शाल्यै करैर्मञ्जरीम् ।
पद्मं कौस्तुभ रत्न मप्यविरतं संबिभ्रतीं संस्थितां –
फुल्लाम्बोज विलोचन त्रय युतां ध्यायेत् परां देवताम् ।।

इति ध्यात्वा - लमित्यादिभिः मनसि श्रियं पञ्चोपचारैः - संपूज्य प्रजपेत्-

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकं सर्वोपचारं समर्पयामि।

मन्त्रः द्वादशार्णविद्याः – ओं ऐं ह्रीं श्रीं क्लीं सौं जगत्प्रसूत्यै नमः ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मीमन्त्रः जपक्रमः (नवाक्षरीविद्या)

अस्य श्री महालक्ष्मी महामन्त्रस्य - भृगु ऋषिः-अनुष्टुप् छन्दः - श्री महालक्ष्मी देवता – श्रीं बीजं - ह्रीं शक्तिः - स्वाहा कीलकं - श्री महालक्ष्मी प्रसादसिद्ध्यर्थे जपे विनियोगः।

करन्यास :	अङ्गन्यासः
1. ओं श्रीं अङ्गुष्ठाभ्यां नमः।	ओं श्रीं हृदयाय नमः।
2. ओं ह्रीं तर्जनीभ्यां नमः।	ओं ह्रीं शिरसे स्वाहा
3. ओं श्रीं मध्यमाभ्यां नमः।	ओं श्रीं शिखायै वषट्
4. ओं श्रीं अनामिकाभ्यां नमः।	ओं श्रीं कवचाय हुम्
5. ओं ह्रीं कनिष्ठिकाभ्यां नमः।	ओं ह्रीं नेत्रेभ्यो वौषट्
6. ओं श्रीं करतल करपृष्ठाभ्यां नमः।	ओं श्रीं अस्त्राय फट्

इति विन्यस्य - भूर्भुवस्सुवरों इति दिग्बन्धः - ध्यानम् कुर्यात्।

कान्त्या काञ्चन सन्निभां हिमगिरि प्रख्यै श्चतुर्भि र्गजैः -
हस्तोत्क्षिप्त हिरण्मया ऽमृतघटै रासिच्यमानां श्रियम्।
बिभ्राणां वर मब्ज युग्म मभयं हस्तैः किरीटोज्वलां-
क्षौमाबद्ध नितंब बिंब ललितां वन्दे ऽरविन्द स्थिताम्॥

इत्यादिना पञ्चोपचारपूजां कृत्वा जपेत् -

1. लं पृथिव्यात्मकं गन्धं समर्पयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि।
3. यं वाय्वात्मकं धूपमाघ्रापयामि।
4. रं अग्न्यात्मकं दीपं दर्शयामि।
5. वं अमृतात्मकं सुधांनिवेदयामि
6. सं सर्वात्मकं सर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः (नवाक्षरीविद्या)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गृहलक्ष्मी मन्त्रः जपक्रमः (२३वर्णाः)

अस्य श्री लक्ष्मी त्रयोविंशत्यक्षरमहामन्त्रस्य – ब्रह्मा ऋषिः - गायत्री छन्दः -श्री महालक्ष्मी देवता –श्रीं बीजम् – ह्रीं शक्तिः -क्लीं कीलकं श्री महालक्ष्मी प्रसादसिद्ध्यर्थे जपे विनियोगः

करन्यास :

1. ओं श्रीं अङ्गुष्ठाभ्यां नमः।
2. ओं ह्रीं तर्जनीभ्यां नमः।
3. ओं क्लीं मध्यमाभ्यां नमः।
4. ओं श्रीं लक्ष्मिः अनामिकाभ्यां नमः।
5. ओं आगच्छ आगच्छ - - कनिष्ठिकाभ्यां नमः।
6. ओं मम मन्दिरे तिष्ठतिष्ठस्वाहा - - करतल करपृष्ठाभ्यां नमः

अङ्गन्यासः

ओं श्रीं हृदयाय नमः
ओं ह्रीं शिरसे स्वाहा
ओं क्लीं शिखायै वषट्
ओं श्रीं लक्ष्मिः कवचाय हुं
ओं आगच्छ आगच्छ - - नेत्रेभ्यो वौषट्
ओं मम मन्दिरे तिष्ठतिष्ठ- - स्वाहा अस्त्राय फट्

एवं करन्यासं अङ्गन्यासंचविधाय – भूर्भुवस्स्वरोमिति दिग्बन्धः ध्यानम्

पद्मासनस्थां करपङ्कजाभ्यां –
रक्तोत्पले सन्दधतीं त्रिणेत्राम्।
आबिभ्रती माभरणानि रक्तां-
पद्मावतीं पद्ममुखीं भजामि।।

इतिध्यात्वा –लमित्यादिभिः हृदि पञ्चोपचार पूजांकृत्वामनुंजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि।
3. यं वाय्वात्मकं धूपमाघ्रापयामि।
4. रं अग्न्यात्मकं दीपं दर्शयामि।
5. वं अमृतात्मकं सुधांनिवेदयामि
6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं ह्रीं क्लीं श्रीं लक्ष्मि आगच्छागच्छ मम
मन्दिरे तिष्ठ तिष्ठ स्वाहा।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रमामन्त्र जपक्रमः (२८ वर्णः)

अस्य श्री रमामन्त्रस्य ब्रह्मा ऋषिः - गायत्री छन्दः - श्रीरमा देवता - श्रीं बीजं - स्वाहा शक्तिः - श्री महालक्ष्मी प्रसादसिद्ध्यर्थे जपेविनियोगः।

अङ्गन्यासः	करन्यासः
1. ओं श्रीं अङ्गुष्ठाभ्यां नमः	ओं श्रीं हृदयाय नमः।
2. ओं नमोभगवति तर्जनीभ्यां नमः	ओं नमोभगवति शिरसे स्वाहा।
3. ओं सर्व सौभाग्यदायिनि - - मध्यमाभ्यां नमः	ओं सर्वसौभाग्यदायिनि - - शिखायै वषट्
4. ओं श्रीविद्ये अनामिकाभ्यां नमः	ओं श्रीविद्ये - कवचाय हुं
5. ओं महाविभूतये कनिष्ठिकाभ्यां नमः	ओं महाविभूतये नेत्रेभ्यो वौषट्
6. ओं स्वाहा करतल करपृष्ठाभ्यां नमः	ओं स्वाहा अस्त्राय फट्।

भूर्भुवस्सुवरों इति दिग्बन्धः। ध्यानम्

तटिच्छोभा पूर्णां तपन शशि ताटङ्क युगळां -
लसद् ग्रीवां क्षौमांशुक विशद नाभी सरसिजाम्।
दर स्मेरां धीरां कर कलित पद्मां त्रि नयनां –
रमाविद्यां वन्दे वरपुरुष वामोरु निलयाम्।।

इति ध्यात्वा –हृदि लमित्यादिपञ्चोपचारैस्संपूज्य –जपेत्।।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि। 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलविद्या – ओं श्रीं नमो भगवति सर्वसौभाग्यदायिनि - श्रीं विंद्ये महाविभूतये स्वाहा ।। (२८वर्णविद्या) (प्रपञ्चसारसंग्रहे)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सिद्धलक्ष्मी मन्त्र जपक्रमः (१०अर्णविद्या)

अस्य श्री सिद्धलक्ष्मी महामन्त्रस्य हिरण्यगर्भः ऋषिः। अनुष्टुप् छन्दः। श्री महाकाली महालक्ष्मी सरस्वत्यो देवताः। श्री बीजं। ह्रीं शक्तिः। क्लीं कीलकम्। सर्वक्लेश पीडापरिहारार्थं श्री सिद्धलक्ष्मी प्रसादसिध्यर्थे। सर्वकाय सिद्ध्यर्थं च श्री सिद्धलक्ष्मीमन्त्र जपेविनियोगः

ऋष्यादिन्यास :

1. ओं हिरण्यगर्भ ऋषये नमः शिरसे 2. अनुष्टुप् छन्दसे नमः - मुखे
3. ओं श्रीं बीजाय नमः लिंगे
4. श्रीमहाकालीमहालक्ष्मीसरस्वती देवताभ्यो नमः हृदि
5. ओं ह्रीं शक्तये नमः पादयोः 6. ओं क्लीं कीलकाय नमः ज्ञाभौ
7. ओं श्रीमन्त्रविनियोगाय नमः सर्वाङ्ग। इति ऋष्यादिन्यासः।

करन्यास :	अङ्गन्यासः
1. ओं श्रीं अङ्गुष्ठाभ्यां नमः	ओं श्रीं हृदयाय नमः।
2. ओं ह्रीं तर्जनीभ्यां नमः	ओं ह्रीं शिरसे स्वाहा
3. ओं क्लीं मध्यमाभ्यां नमः	ओं क्लीं शिखायै वषट्
4. ओं श्रीं अनामिकाभ्यां नमः	ओं श्रीं लक्ष्मीः कवचाय हुं
5. ओं सिद्धलक्ष्म्यै कनिष्ठिकाभ्यां नमः	ओं सिद्धलक्ष्म्यै नेत्रत्रयाय वौषट्

6. ओं नमः -करतल करपृष्ठाभ्यां नमः -ओं नमः अस्त्राय फट्

भूर्भुवस्सुवरों इति दिग्बन्धनं कृत्वा –देवीं ध्यायेत्।

ब्राह्मीं च वैष्णवीं रुद्रां षड्भुजां च चतुर्मुखीम् ।
त्रिणेत्रां खड्गशूला भी पद्म चक्र गदा धराम् ।
पीताम्बर धरां देवीं नाना लङ्कार भूषिताम् ।
तेजःपुञ्ज धरीं श्रेष्ठीं ध्यायेद् बाल कुमारिकाम् ।

एवं ध्यात्वा – मनसि मूलेन आवाहनादि कृत्वा - लमित्यादिभिः पञ्चोपचारपूजां समाप्य मूलमन्त्रं जपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं ह्रीं क्लीं श्रीं सिद्धलक्ष्म्यै नमः। (ऐकलक्षंजपेत)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

धनलक्ष्मीमन्त्र जपक्रमः (48 वर्णाः)

अस्य श्री धनलक्ष्मी महामन्त्रस्य – विष्णुर् ऋषिः गायत्री छन्दः श्री धनलक्ष्मी देवता। श्रां बीजम्।श्रीं शक्तिः। श्रूं कीलकम्। श्री धनलक्ष्मी प्रसाद सिद्ध्यर्थे जपे विनियोगः। श्रामित्यादिभिष्षडङ्ग न्यासः - भूर्भुवस्सुवरों इति दिग्बन्धः

करन्यास :	अङ्गन्यासः
1. ओं श्रां अङ्गुष्ठाभ्यां नमः	ओं श्रां हृदयाय नमः
2. ओं श्रीं तर्जनीभ्यां नमः	ओं श्रीं शिरसे स्वाहा
3. ओं श्रूं मध्यमाभ्यां नमः	ओं श्रूं शिखायै वषट्
4. ओं श्रैं अनामिकाभ्यां नमः	ओं श्रैं लक्ष्मीः कवचाय हुं
5. ओं श्रौं कनिष्ठिकाभ्यां नमः	ओं श्रौं नेत्राभ्यां वौषट्

6. ओं श्रः करतल –करपृष्ठाभ्यां नमः - ओं श्रः अस्त्राय फट्

भूर्भुवस्सुवरोम् इति दिग्बन्धनं विधाय। **ध्यानम्**

वन्दे पद्मकरां प्रसन्नवदनां कौशुम्भ वस्त्रान्वितां -
भक्ताभीष्ट वरप्रदां हरिहर ब्रह्मादिभि स्सेविताम् ।
पार्श्वे पङ्कज शङ्ख चक्रनिधिभिः युक्तां सरोजस्थितां –
देवीं चन्द्रकलावतंस मकुटां चारुस्मितां भावये ।।

एवं ध्यात्वा मनसि लमित्यादिभिः पञ्चोपचारपूजांकृत्वा जपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं श्रीं श्रीकरि धनकरि धान्यकरि धान्यैक वृद्धिकरि समृद्धिकरि सर्वसंपत्करि श्रीं श्रीं महालक्ष्मि सर्वैश्वर्यं कुरुकुरु स्वाहा।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलवासिनी मन्त्रजपक्रमः (१४ वर्णाः)

अस्य श्री कमलवासिनी महामन्त्रस्य दक्ष ऋषिः। विराट् छन्दः। श्रीर्देवता – श्रीं बीजम् – ह्रीं शक्तिः - स्वाहा कीलकम् – श्रीकमलवासिनी महालक्ष्मी प्रसाद सिद्ध्यर्थे जपे विनियोगः

करन्यास :

ओं ओं अङ्गुष्ठाभ्यां नमः

ओं श्रीं तर्जनीभ्यां नमः

ओं ह्रीं मध्यमाभ्यां नमः

ओं श्रीं अनामिकाभ्यां नमः

ओं नमः कमलवासिन्यै
- कनिष्ठिकाभ्यां नमः

अङ्गन्यासः

ओं ओं हृदयाय नमः

ओं श्रीं शिरसे स्वाहा

ओं ह्रीं शिखायै वषट्

ओं श्रीं लक्ष्मीः कवचाय हुं

ओं नमः कमलवासिन्यै
- अस्त्राय फट्

भूर्भुवस्सुवरों इति दिग्बन्धः **ध्यानम्**

पद्मस्था पद्मनेत्रा कमलयुग वरा ऽभीति युग्दोस्सरोजा –
देहोत्थाभिः प्रभाभि स्त्रिभुवन मखिलं भासुरा भासयन्ती ।
मुक्ता हारा भिरामो न्नतकु चकलशा रत्न मञ्जीर काञ्ची –
ग्रैवेयो र्म्यङ्गदाढ्या धृत मणि मकुटा श्रेयसे श्री र्भवेद् वः।।

इति ध्यात्वा – लमित्यादिभिः पञ्चोपचारपूजां कृत्वा – विद्यांप्रजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं ह्रीं श्रीं नमः कमलवासिन्यै स्वाहा ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलालक्ष्मी मन्त्रजपक्रमः (प्रपञ्चसारं) (३०वर्णाः)

अस्य श्री कमलालक्ष्मी महामन्त्रस्य दक्ष ऋषिः विराट् छन्दः - श्रीर्देवता। श्रीं बीजम्। ह्रीं शक्तिः। स्वाहा कीलकम्। श्री कमलालक्ष्मी प्रसादसिद्ध्यर्थे जपे विनियोगः।

करन्यास :	अङ्गन्यासः
1. ओं श्रीं ह्रीं श्रीं कमले –अङ्गुष्ठाभ्यांनमः	ओं श्रीं ह्रीं श्रीं कमले – हृदयाय नमः
2. कमलालये – तर्जनीभ्यां नमः	कमलालये – शिरसे स्वाहा।
3. प्रसीद प्रसीद – मध्यमाभ्यां नमः	प्रसीद प्रसीद – शिखायै वषट्।
4. सर्वधनं – अनामिकाभ्यां नमः	सर्वधनं – कवचाय हुम।
5. मे वशमानय – कनिष्ठिकाभ्यां नमः	मे वशमानय – नेत्रेभ्यो वौषट्।
6. स्वाहा – करतल करपृष्ठाभ्यां नमः।	स्वाहा – अस्त्राय फट्।

एवं हृदयादिषु षडङ्गन्यासं चकृत्वा – भूर्भुवस्सुवरों इति दिग्बन्धः।

हस्तोद्यद् वसुपत्र पङ्कजधरा चञ्चत्स्फुरन्नूपुरा –
ग्रैवेयाङ्गद हार कङ्कण महा माला ज्वलत्कुण्डला ।
पद्मस्था परिचारिका परिवृता शुक्लाङ्ग रागांशुका –
देवी दिव्य वसुप्रदा भवभय प्रध्वंसिनी स्याद् रमा ।।

इति ध्यात्वा –लमित्यादिभिः पञ्चोपचारपूजांकृत्वा – विद्यांप्रजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि ।
2. हं आकाशात्मकं पुष्पं समर्पयामि।
3. यं वाय्वात्मकं धूपमाघ्रापयामि।
4. रं अग्न्यात्मकं दीपं दर्शयामि।
5. वं अमृतात्मकं सुधांनिवेदयामि
6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद
सर्वधनं मे वशमानय स्वाहा ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सौभाग्यलक्ष्मीमन्त्र जपक्रमः (२४ वर्णाः) (प्रपञ्चसारे)

अस्य श्री सौभाग्य लक्ष्मी महामन्त्रस्य देवेश ऋषिः। गायत्री छन्दः। श्री महा लक्ष्मी देवता। श्रीं बीजम्। ह्रीं शक्तिः। स्वाहा कीलकम्। श्री महालक्ष्मी प्रीत्यर्थे सर्वसौभाग्य सिद्ध्यर्थे जपे विनियोगः।

करन्यास :	**अङ्गन्यासः**
ओं श्रां अङ्गुष्ठाभ्यां नमः	ओं श्रां हृदयाय नमः
ओं श्रीं तर्जनीभ्यां नमः	ओं श्रीं शिरसे स्वाहा
ओं श्रूं मध्यमाभ्यां नमः	ओं श्रूं शिखायै वषट्
ओं श्रैं अनामिकाभ्यां नमः	ओं श्रैं लक्ष्मीः कवचाय हुं
ओं श्रौं कनिष्ठिकाभ्यां नमः	ओं श्रौं नेत्राभ्यां वौषट्
ओं श्रः करतल –करपृष्ठाभ्यां नमः -	ओं श्रः अस्त्राय फट्

भुर्भुवस्सुवरोम् इति दिग्बन्धः - **ध्यानम्**

या सा पद्मासनस्था विपुल कटितटी पद्मपत्रायताक्षी-
गंभीरा वर्तनाभि स्तनभर नमिता शुभ्र वस्त्रोत्तरीया ।
लक्ष्मी र्दिव्यै र्गजेन्द्रै र्मणिगण खचितैः स्नापिता -
हेमकुंभैः-नित्यं सा पद्महस्ता मम वसतु गृहे सर्व माङ्गल्य युक्ता ॥

एवं ध्यात्वा हृदि लमित्यादिनापञ्चोपचारपूजां कृत्वामूलंप्रजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि ।
2. हं आकाशात्मकं पुष्पं समर्पयामि।
3. यं वाय्वात्मकं धूपमाघ्रापयामि।
4. रं अग्न्यात्मकं दीपं दर्शयामि।
5. वं अमृतात्मकं सुधांनिवेदयामि
6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः **ओं श्रीं ह्रीं क्लीं महालक्ष्मि महालक्ष्मि
एह्येहिसर्वसौभाग्यं मे देहि स्वाहा। (२४ वर्णाः)**

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वसुधा लक्ष्मीमन्त्रः जपक्रमः (२७ वर्णाः)

अस्य श्री वसुदा महालक्ष्मी महामन्त्रस्य – ब्रह्मा ऋषिः। निचृद् गायत्री छन्दः। श्री वसुदा महालक्ष्मी देवता। ओंग्लौं बीजम्। श्रीं शक्तिः। स्वाहा कीलकम्। श्री वसुदा लक्ष्मी प्रसाद सिद्ध्यर्थे ममाभीष्टप्राप्त्यै च जपे विनियोगः।

करन्यास :

ओं श्रीं अङ्गुष्ठाभ्यां नमः
ओं वसुदे वसुधारे वसुकरि तर्जनीभ्यां नमः
ओं धनकरि मध्यमाभ्यां नमः
ओं धान्यकरि अनामिकाभ्यां नमः
ओं रत्नकरि कनिष्ठिकाभ्यां नमः
ओं स्वाहा करतल करपृष्ठाभ्यां नमः -

अङ्गन्यासः

ओं श्रीं हृदयाय नमः
ओं वसुदे वसुधारे वसुकरि शिरसे स्वाहा
ओं धनकरि शिखायै वषट्
ओं धान्यकरि कवचाय हुं
ओं रत्नकरि नेत्राभ्यां वौषट्
ओं स्वाहा अस्त्राय फट्

भुर्भुवस्सुवरोम् इतिदिग्बन्धः **ध्यानम्**

कल्पद्रुमादौ मणि वेदिकायां –
समास्थिते वस्त्र विभूषणाढ्ये ।
भूमि श्रियौ वाञ्चित वामदक्षे -
सञ्चिन्तयेद् देव मुनीन्द्र वन्द्ये। इतिध्यात्वा - पञ्चोपचारपूजांकृत्वा

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं वसुदे - वसुधारे - वसुकरि धनकरि
धान्यकरि रत्नकरिस्वाहा।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पद्महस्तामन्त्र जपक्रमः (10 अर्णोः)
(महालक्ष्मीरत्नकोशे)

अस्य श्री कमलवासिनी महामन्त्रस्य दक्ष ऋषिः - विराट् छन्दः। श्रीर्देवता। ओं बीजम्। स्वाहा शक्तिः। नमः कीलकम् । श्रीकमलवासिनी प्रीत्यर्थं अभीष्टफलप्राप्तये सर्वेष्टसिद्ध्ये च जपे विनियोगः।

करन्यास :	अङ्गन्यासः
ओं देव्यै नमः अङ्गुष्ठाभ्यां नमः	ओं देव्यै नमः हृदयाय नमः
ओं पद्मिन्यै नमः तर्जनीभ्यां नमः	ओं पद्मिन्यै नमः शिरसे स्वाहा
ओं विष्णुपत्न्यै नमः मध्यमाभ्यां नमः	ओं विष्णुपत्न्यै नमः शिखायै वषट्
ओं वरदायै नमः अनामिकाभ्यां नमः	ओं वरदायै नमः कवचाय हुं
ओं कमलायै नमः कनिष्ठिकाभ्यां नमः	ओं कमलायै नमः अस्त्राय फट्

भूर्भुवस्सुवरों इति दिग्बन्धः। ध्यानम्

आसीना सरसीरुहे स्मितमुखी हस्तांबुजै र्बिभ्रती -
दानं पद्मयुगाभये च वपुषा सौदामिनी सन्निभा ।
मुक्ताहार विराजमान पृथुलो त्तुङ्गस्तनो द्भासिनी -
पायाद्व वः कमला कटाक्षविभवै रानन्दयन्ती हरिम् ।।

(शारदातिलके)

इति ध्यात्वा – लमित्यादिभिः पञ्चोपचारपूजां कृत्वा – विद्यांप्रजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि ।
2. हं आकाशात्मकं पुष्पं समर्पयामि।
3. यं वाय्वात्मकं धूपमाघ्रापयामि।
4. रं अग्न्यात्मकं दीपं दर्शयामि।
5. वं अमृतात्मकं सुधांनिवेदयामि
6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः नमः कमलवासिन्यै स्वाहा (दशाक्षरमन्त्रः) (प्र-सार-सं)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलाम्बा मन्त्र जपक्रमः (27 अर्णाः शारदायाम्)

अस्य श्री कमलालक्ष्मी महामन्त्रस्य दक्ष ऋषिः विराट् छन्दः श्रीर्देवता। श्रीं बीजम्। ह्रीं शक्तिः। स्वाहाकीलकम् । श्री कमलालक्ष्मी प्रसाद सिद्ध्यर्थे जपे विनियोगः।

करन्यासः

ओं श्रीं ह्रीं श्रीं कमले – अङ्गुष्ठाभ्यां नमः
कमलालये – तर्जनीभ्यां नमः
प्रसीद – मध्यमाभ्यां नमः
प्रसीद – अनामिकाभ्यां नमः
श्रीं ह्रीं श्रीं – कनिष्ठिकाभ्यां नमः
महालक्ष्म्यै नमः करतल –
- करपृष्ठाभ्यां नमः

अङ्गन्यासः

ओं श्रीं ह्रीं श्रीं कमले – हृदयाय नमः
कमलालये – शिरसेस्वाहा
प्रसीद – शिखायैवषट्
प्रसीद – कवचायहुं
श्रीं ह्रीं श्रीं – नेत्रेभ्यो वौषट्।
महालक्ष्म्यै नमः–
- अस्त्राय फट्

भूर्भुवस्सुवरों इति दिग्बन्धः। ध्यानम्

हस्तोद्यद् वसुपा पङ्कज धरा चञ्चत्स्फुर न्नूपुरा –
ग्रैवेयाङ्गद हार कङ्कण महा माला ज्वलत्कुण्डला ।
पद्मस्था परिचारिका परिवृता शुक्लाङ्ग रागांशुका –
देवी दिव्यवसुप्रदा भवभय प्रध्वंसिनी स्याद् रमा ।।

इति ध्यात्वा –लमित्यादिभिः पञ्चोपचारपूजांकृत्वा – विद्यांप्रजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः = ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद
श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः ।
(अथवा) ओं श्रीं ह्रीं श्रीं महालक्ष्मि नमः। (शारदायां)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेरलक्ष्मी मन्त्र जपक्रमः (27 अर्णमन्त्रः)

अस्य श्री कुबेरलक्ष्मी महामन्त्रस्य दक्ष ऋषिः विराट् छन्दः श्रीर्देवता। श्रीं बीजम्। ह्रीं शक्तिः। स्वाहा कीलकम् । श्री कुबेरालक्ष्मी प्रसाद सिद्ध्यर्थे जपे विनियोगः।

करन्यास :	अङ्गन्यासः
ओं श्रीं ह्रीं ऐं अङ्गुष्ठाभ्यां नमः	ओं श्रीं ह्रीं ऐं हृदयाय नमः
कुबेरलक्ष्म्यै तर्जनीभ्यां नमः	कुबेरलक्ष्म्यै शिरसे स्वाहा
कमलधारिण्यै मध्यमाभ्यां नमः	कमलधारिण्यै शिखायै वषट्
सिंहवाहिन्यै अनामिकाभ्यां नमः	सिंहवाहिन्यै कवचाय हुं
धनाकर्षिण्यै कनिष्ठिकाभ्यां नमः	धनाकर्षिण्यै नेत्राभ्यां वौषट्
स्वाहा करतल – करपृष्ठाभ्यां नमः	ओं स्वाहा अस्त्राय फट्

भूर्भुवस्सुवरों इति दिग्बन्धः। ध्यानम्

हस्तोद्यद् वसुपत्र पङ्कजधरा चञ्चत्स्फुरन्नूपुरा –
ग्रैवेयाङ्गद हार कङ्कण महा माला ज्वलत्कुण्डला ।
पद्मस्था परिचारिका परिवृता शुक्लाङ्गरागांशुका –
देवी दिव्यगणा नता भवदघ प्रध्वंसिनी स्याद् रमा ।।

इति ध्यात्वा –लमित्यादिभिः पञ्चोपचारपूजांकृत्वा – विद्यांप्रजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं ह्रीं ऐं कुबेरलक्ष्म्यै - कमलधारिण्यै - सिंहवाहिन्यै धनाकर्षिण्यै स्वाहा । (27 अर्णः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ज्योष्ठालक्ष्मी मन्त्रजपक्रमः (17 अर्णाः) (मन्त्रमहोदधौ) धनवृद्धिदः)

अस्य श्री ज्येष्ठालक्ष्मीमन्त्रस्य ब्रह्मा ऋषिः - अष्टिश्छन्दः। ज्येष्ठालक्ष्मीर्देवता – ह्रीं बीजम् –. श्रीं शक्तिः -ममाभीष्टसिद्ध्यर्थे जपे विनियोगः। ऋष्यादि न्यासंकृत्वा – करन्यास अङ्गन्यासौ कुर्यात्।

करन्यासः	अङ्गन्यासः
ऐं ह्रीं श्रीं अङ्गुष्ठाभ्यां नमः	ऐं ह्रीं श्रीं हृदयाय नमः
ज्येष्ठालक्ष्मि तर्जनीभ्यां नमः	ज्येष्ठालक्ष्मि – शिरसे स्वाहा
स्वयम्भुवे मध्यमाभ्यां नमः	स्वयम्भुवे शिखायै वषट्
ह्रीं अनामिकाभ्यां नमः	ह्रीं कवचाय हुं
ज्येष्ठायै कनिष्ठिकाभ्यां नमः	ज्येष्ठायै नेत्रत्रयाय वौषट्
नमः करतलकरपृष्ठाभ्यां नमः	नमः - अस्त्रायफट्।

मन्त्राक्षरन्यासः

1. ओं ऐं नमः शिरसि
2. ओं ह्रीं नमः भ्रूमध्ये
3. ओं श्रीं नमः मुखे।
4. ओं ज्येष्ठालक्ष्म्यै नमः -हृदि
5. ओं स्वयंभुवे नमः -नाभौ
6. ह्रीं नमः - आधारे।
7. ओं ज्येष्ठायै नमः -जानुनि
8. ओं नमो नमः -पादयो।

(इति मन्त्रवर्णन्यासः)

ज्येष्ठालक्ष्मीध्यानम्।। (सर्वतोभद्रमण्डले पूजाकार्या)

अद्यद्भास्कर सन्निभा स्मितमुखी रक्ताम्बराऽऽलेपना –
सत्कुम्भं धनभाजनं सृणिमथो पाशं करै बिभ्रती ।
पद्मस्था कमलेक्षणा दृढकुचा सौन्दर्य वारांनिधिः -
ध्यातव्या सकलाभिलाषफलदाश्री ज्येष्ठ लक्ष्मीरियम्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पञ्चोपचार पूजांकृत्वा मूलंजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि। 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्र: **ऐं ह्रीं श्रीं ज्येष्ठालक्ष्मि स्वयम्भुवे ह्रीं ज्येष्ठायै नम:**
(१७वर्णा:)

गायत्रीमन्त्र: रक्तज्येष्ठायै विद्महे नीलज्येष्ठायै धीमहितन्नो
लक्ष्मी: प्रचोदयात्।।

नवपीठशक्ती: लोहिताक्ष्यै विरूपायै कराल्यै नीललोहितायै
समदायै नम:। वारुण्यै नम: पुष्ट्यै नम:
अमोघायै नम: मध्ये विश्वमोहिन्यै नम: इतिसंपूज्य

आवरण पूजाक्रम:

प्रथमावरणे – षडङ्गमन्त्रशक्ती: ६षट्कोणेषुसंपूज्य –

द्वितीयावरणे – अष्टदलेषु - ब्राह्म्यादि महालक्ष्मीपर्यन्त
अष्टौलोकमातृ: संपूज्य –

तृतीयावरणे – इन्द्रादीनष्ठौपूजयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वसुधा श्रीमन्त्रजपक्रमः (भूमिश्रियौ) (28 वर्णविद्या)

अस्य श्री वसुधालक्ष्मीमन्त्रस्य ब्रह्मा ऋषिः - निचृद्गायत्रीछन्दः- वसुधाश्री देवता – ग्लौं बीजम् – श्रीं शक्तिः - मम अभीष्टप्राप्त्यै जपे विनियोगः। ऋष्यादिन्यासं विधाय – पञ्चाङ्गन्यासः कुर्यात्।

करन्यास :

ओं अन्नं महि ग्लां श्रीं – अंगुष्ठाभ्यां नमः।

ओं अन्नं मे देहि ग्लीं श्रीं – तर्जनीभ्यां ।

ओं अन्नाधिपतये ग्लूं श्रीं – मध्यमाभ्यां नमः।

ओं ममान्नं प्रदापय ग्लैं श्रीं – अनामिकाभ्यां ।

ओं स्वाहा ग्लः श्रीं कनिष्ठिकाभ्यां नमः।

अङ्गन्यासः

ओं अन्नं महि ग्लां श्रीं – हृदयाय नमः।

ओं अन्नं मे देहि ग्लीं श्रीं – शिरसे स्वाहा ।

ओं अन्नाधिपतये ग्लूं श्रीं – शिखायै वषट् ।

ओं ममान्नं प्रदापय ग्लैं श्रीं – कवचाय हुं ।

ओं स्वाहा ग्लः श्रीं अस्त्राय फट् ।

भूर्भुवस्सुवरों इति दिग्बन्धः ध्यानम् (स्वर्णदीपेध्यायेत)

कल्पद्रुमाधो मणि वेदिकायां –
समास्थिते वस्त्र विभूषणाढ्ये ।
भूमिश्रियौ वाञ्चित वाम दक्षे –
सं चिन्तयेद् देव मुनीन्द्र वन्द्ये।। एवं श्रियं महीं च ध्यात्वा –

सर्वतोभद्रमण्डलमध्ये – ओं मं मण्डकादि परतत्वान्त पीठदेवताभ्यों नमः तत्पीठाब्ज नवशक्तीः पूजयेत्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

1. विमालयै 2. उत्कर्षिण्यै 3. ज्ञानायै
4. क्रियायै 5. योगायै 6. प्रह्वायै
7. सत्यायै 8. ईशानायै 9. अनुग्रहायै

इति संपूज्य देवीं पञ्चोपचारैः संपूज्य – मूलमन्त्रं जपेत्।

मूलमन्त्रः ओं ग्लौं श्रीं महि अन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं ग्लौं ओं (28 अक्षरमन्त्रः)

प्रथमावरणे – षडङ्गमन्त्रशक्तीः पूज्याः

द्वितीयावरणे – 1. चतुर्दिक्षु पूर्वे पृथिव्यै 2. दक्षिणे अग्नये
3. पश्चिमे-जलाय 4. उत्तरे मारुताय नमः
5. आग्नेये – निवृत्यै नमः 6. नैरृते – प्रतिष्ठायै नमः
7. वायव्ये विद्यायै नमः 8. ऐशान्ये – शान्त्यै नमः
इति अष्टौपूजयेत्।।

तृतीयावरणे – 1. बलाकायै 2. विमलायै 3. कमलायै
4. वनमालायै 5. विभीषायै 6. मालिकायै
7. शाङ्कर्यै 8. वसुमालिकायै नमः इति

चतुर्थावरणे - भूपुरे – इन्द्रादीन् अष्टौ पूजयेत्।

पञ्चमावरणे – भूपुरेबाह्ये –वज्रादीन् पूजयेत्।।

इति संपूज्य मूलं प्रजपेत्।।

पुनः वसुधा श्रियौ स्तोत्रादिनासन्तोष्य प्रार्थयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वसुधारा महालक्ष्मी मन्त्रजपक्रमः (प्रपञ्चसारसंग्रहे)

अस्य महालक्ष्मी मन्त्रस्य मङ्कण ऋषिः गायत्री छन्दः वसुधारा महालक्ष्मी देवता – श्रीं बीजं – स्वाहा शक्तिः- श्रीबीजेन श्रां इत्यादिना कराङ्गन्यासौ कुर्यात्।। (महालक्ष्मी रत्नकोशे)

करन्यासः	अङ्गन्यासः
ओं श्रां – अङ्गुष्ठाभ्यां नमः	ओं श्रां – हृदयाय नमः
ओं श्रीं – तर्जनीभ्यां नमः	ओं श्रीं – शिरसेस्वाहा
ओं श्रूं – मध्यमाभ्यां नमः	ओं श्रूं – शिखायैवषट्
ओं श्रैं – अनामिकाभ्यां नमः	ओं श्रैं – कवचायहुं
ओं श्रौं – कनिष्ठिकाभ्यां नमः	ओं श्रौं – नेत्रेभ्यो वौषट्।
ओं श्रः – करपृष्ठाभ्यां नमः।	ओं श्रः - अस्त्राय फट्भू

भूर्भुवस्सुवरों इति दिग्बन्धः। ध्यानम्

हस्तोद्यद् वसुपा पङ्कज धरा चञ्चत्स्फुर न्नूपुरा –
ग्रैवेयाङ्गद हार कङ्कण महा माला ज्वलत्कुण्डला ।
पद्मस्था परिचारिका परिवृता शुक्लाङ्ग रागांशुका –
देवी दिव्यवसुप्रदा भवभय प्रध्वंसिनी स्याद् रमा ।।

पञ्चोपचार पूजांकृत्वा मूलंजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधांनिवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकंसर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं ऐं ह्रीं श्रीं क्लीं सौः पङ्कजहस्ते नमः। १२ अर्णः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्मी षडक्षर मन्त्रजपक्रमः

अस्य श्री लक्ष्मीषडक्षर महामन्त्रस्य भार्गव ऋषिः पङ्क्तिः छन्दः श्री महालक्ष्मी देवता – मम अभीषृ फलावाप्तये - लक्ष्मीप्रसाद सिद्ध्यर्थे महालक्ष्मीयाः समाराधनार्थे जपे विनियोगः ।

करन्यासः	अङ्गन्यासः
ओं श्रां – अङ्गुष्ठाभ्यां नमः	ओं श्रां – हृदयाय नमः
ओं श्रीं – तर्जनीभ्यां नमः	ओं श्रीं – शिरसेस्वाहा
ओं श्रूं – मध्यमाभ्यां नमः	ओं श्रूं – शिखायैवषट्
ओं श्रैं – अनामिकाभ्यां नमः	ओं श्रैं – कवचायहुं
ओं श्रौं – कनिष्ठिकाभ्यां नमः	ओं श्रौं – नेत्रेभ्यो वौषट्।
ओं श्रः – करपृष्ठाभ्यां नमः।	ओं श्रः - अस्त्राय फट्भू

भूर्भुवस्सुवरों इति दिग्बन्धः। ध्यानम्

दुग्धामृतोदधौ श्वेतद्वीप रत्न निकेतने ।
कल्पद्रु राजि प्रभदा कानने विभ्रमाचले ।
पद्मासने सुखासीनां अष्टलक्ष्मया समावृताम् ।
हिरण्यवर्णां हरिणीं पुण्डरीक निभेक्षणाम् ।
चतुर्भुजां पीवरांसां सर्वाकल्प विभूषिताम् ।
उभयोर्हस्तयोः पद्मं इतराभ्यां वराभये ।
दधतीं पद्मगन्धांगीं महालक्ष्मीं समाश्चये ।

पञ्चोपचार पूजां कृत्वा - मूलंजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि । 4. रं अग्न्यात्मकं दीपं दर्शयामि।
2. हं आकाशात्मकं पुष्पं समर्पयामि। 5. वं अमृतात्मकं सुधां निवेदयामि
3. यं वाय्वात्मकं धूपमाघ्रापयामि। 6. सं सर्वात्मकं सर्वोपचारं समर्पयामि।

मूलमन्त्रः ओं श्रीं श्रीयैः नमः।। (6 अक्षरः & 108 जपः)

उत्तर अङ्गन्यासः पूर्वोक्तवत् षङ्गिः हृदयादिषु अंमानि न्यस्त्वा-पूर्ववत् ध्यायेत्।

पुनर्पूजा-जपसमर्पनम् : पूर्ववत् पञ्चोपचार पूजां कृत्वा -
जपसङ्ख्यां पुष्पेण समर्पयेत्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महाविष्णु षडक्षर मन्त्रजपक्रमः

अस्य श्री विष्णुषडक्षर महामन्त्रस्य ब्रह्मा ऋषि: देवीगायत्री छन्द: श्री परमात्मा श्रीमहाविष्णुः देवता – प्रणवं बीजम् - इं शक्ति - मं कीलकम् मम श्रीमहाविष्णोः प्रसाद सिध्यर्थे महालक्ष्म्याः भगवत्समाराधनार्थे जपे विनियोग: ।

करन्यास:

ओं ओं ज्ञानाय – अङ्गुष्ठाभ्यां नम:
ओं नं ऐश्वयार्य – तर्जनीभ्यां नम:
ओं मों शक्त्यै – मध्यमाभ्यां नम:
ओं विं बलाय – अनामिकाभ्यां नम:
ओं ष्णं तेजसे – कनिष्ठिकाभ्यां नम:
ओं वें वीयार्य – करपृष्ठाभ्यां नम:।

अङ्गन्यास:

ओं ओं ज्ञानाय – हृदयाय नम:
ओं नं ऐश्वयार्य – शिरसे स्वाहा
ओं मों शक्त्यै – शिखायैवषट्
ओं विं बलाय – कवचायहुं
ओं ष्णं तेजसे– नेत्राभ्यां वौषट्
ओं वें वीयार्य - अस्त्राय फट्भू

भूर्भुवस्सुवरों इति दिग्बन्ध:। ध्यानम्

विष्णुं शारद चन्द्रकोटि सदृशं शङ्खं रथाङ्गं गदा -
अम्बोजं सततं सिताब्जनिलयं कान्तं जगन्मोहनम् ।
आबद्धाङ्गद हार कुण्डल महा शोभा स्फुरद्वक्षसं -
श्रीवत्साङ्ग मुदार कौस्तुभधरं वन्दे मुनीन्द्रावृत्तम् ।।

पञ्चोपचार पूजां कृत्वा - मूलंजपेत्।

1. लं पृथिव्यात्मकं गन्धं समर्पयामि ।
2. हं आकाशात्मकं पुष्पं समर्पयामि।
3. यं वाय्वात्मकं धूप माघ्रापयामि।
4. रं अग्न्यात्मकं दीपं दर्शयामि।
5. वं अमृतात्मकं सुधां निवेदयामि
6. सं सर्वात्मकं सर्वोपचारं समर्पयामि।

मूलमन्त्र: ओं नमो विष्णवे (3 अर्णः & 108 जपः)

उत्तर अङ्गन्यासः पूर्वोक्तवत् षड्भिः हृदयादिषु अंमानि न्यस्त्वा-पूर्ववत् ध्यायेत् ।

पुनर्पूजा-जपसमर्पनम् : पूर्ववत् पञ्चोपचार पूजां कृत्वा -
जपसङ्ख्यां पुष्पेण समर्पयेत्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

हरिमन्त्र जपक्रमः (षडक्षर मन्त्रः)

(अस्य हरे मन्त्रस्य न्यासः अनपेक्षितः हरेः)

श्री हरि ध्यानम् ॥

शङ्खचक्रगदापद्म धरं पद्मासनस्थितम्।
पीतांबरं घनश्यामं स्मितं श्यामं ह रिं भजे ॥

पञ्चोपचार पूजां कृत्वा मूलं जपेत्।

1. लं पृथिव्यात्मकं समर्पयामि ।
2. हं आकाशात्मकंपुष्पंसमर्पयामि।
3. यं वाय्वात्मकं धूपमाघ्रापयामि।
4. रं अग्न्यात्मकं दीपं दर्शयामि।
5. वं अमृतात्मकं सुधांनिवेदयामि
6. सं सर्वात्मकंसर्वोपचारं समर्पयामि

मन्त्रः = "ह्रीं हरये नमः" (6,00,000 जपे सिद्धिः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विष्णोः परव्यूहादि भेद विवरणम्

विष्णुरूपम्

विष्णु नारायणः श्रीमान् परमात्मा सनातनः।
षाड्गुण्यविग्रहो नित्यं परब्रह्माक्षरं परम्॥

पर व्यूहादि संभेदं व्यूहयन्ती हरेः सदा।
शुद्धषाड्गुण्य मादाय कल्पयन्ती यथा तथा॥

तेन नानाविधं रूपं व्यूहा द्युचित मञ्जसा।
उन्मेषयानि देवस्य प्रकारं भवद्रुत्तमम्॥

व्यापारस्तस्य देवस्य साऽहमस्मि न संशयः।
मया कृतं हि यत्कर्म तेन तत्कृत मुच्यते॥

अहं हि तस्य देवस्य स्मृता ऽन्या क्रियमाणता।
इति शक्र परं रूपं व्यूहरूपं प्रदर्शितम्॥ (लक्ष्मीतन्त्रे)

लक्ष्मी आवाहन ध्यानम् (विष्णुवामाङ्कसंस्थाश्रीः)

मामथा वाहयेत् देवा दुत्सङ्गे परमात्मनः ।
प्रसन्नवदनां शश्वत् सर्वलक्षण लक्षिताम् ॥

पद्मगर्भनिभां कान्तां असितायत लोचनाम् ।
स्फुरत् कटक केयूर हार कुण्डल मण्डिताम् ॥

गंभीर नाभिं त्रिवली विभूषित तनूदराम् ।
सुकर्कश दृढोत्तुङ्ग पीनवृत्त घन स्तनीम् ॥

चलद् द्विरेफ पटल समाक्रान्ता ऽलका वलिम् ।
आरक्ताधर बिंबां च वंश मुक्ताफल द्विजाम् ॥

अर्धचन्द्र ललाटस्थ राजमान ललाटिकाम् ।
सर्वलक्षण संपन्नां कृष्ण कुञ्चित मूर्धजाम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वरदां पङ्कजकरां पद्ममाला विभूषिताम् ।
विष्णु वामभुजा श्लिष्टां तदंसस्थ करांबुजाम् ॥

वामेन बाहुना दिव्यां वहन्तीं पुष्प मञ्जरीम् ।
वरदा भय पाणिं वा पाशा ङ्कुश करां तु वा ॥

अर्ध स्वस्तिक संलीनां स्फुरन्मौलि विराजिताम् ।
ध्यात्वा मां संमुखीं कुर्यात् मन्त्रमूर्तिं सनातनीम् ॥

अर्चयित्वाऽथ देवेशं लक्ष्मीं सर्वाङ्गगां स्मरेत् ।
लयात्मना ऽर्चयित्वा ऽथ लक्ष्मीं आवाहयेत् ततः ॥

वामोत्सङ्गे निषण्णां तां अथ देवस्य शार्ङ्गिणः ।
अर्चयेत् विविधै र्भोगै यथावत् शास्त्रचोदितैः ॥ (लक्ष्मीतन्त्रे)

लक्ष्मीनारायण ध्यानम्

सूर्यानलांश संस्थानं नारायण मनामयम् ।
स्मरेत् चिदासनासीनं पुण्डरीकायतेक्षणम् ॥
पीतांबर मुदाराङ्गं काञ्ची नूपुर शोभितम् ।
हार कुण्डल केयूर किरीट कटकोज्वलम् ॥
युगानुसारि कान्तिं वा नीलांब रनिभं तु वा ।
शङ्ख चक्र धरं देवं वरदा भय दायिनम् ।
प्रभयेव मणिं पूर्णं गांभीर्येणेव सागरम् ॥
प्रभयैव विवस्वन्तं ज्योत्स्नयेव निशाकरम् ।
पुरा ध्यात्वा हृषीकेशं प्रसन्न मुख पङ्कजम् ।
पुरा द्वादशभि र्भोगैः अर्चयेत् पुरुषोत्तमम् ।
(सूक्तेन पौरुषेणाथ प्रणवेन च वासव)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विष्णोः पर-व्यूह- विभवमूर्तीनां प्रकाशः।

वैष्णवा अवतारा स्ते यावन्तो यद्विधा श्च ते ।
षाड्गुण्य ममलं ब्रह्म निर्दोष मजरं ध्रुवम् ॥ 1

सर्वशक्ति निरातङ्कं निरालंबन भावनम्।
तदुन्मिषति वै पूर्वं शक्तिमच्छक्ति भावतः ॥ 2

परमूर्तयः

नारायणः परो देवः संस्थितः शक्तिमत्तया ।
स्थिरशक्ति रहं तस्य सर्वं कार्यकरी विभोः ॥ 3

आद्येन पररूपेण व्यूहरूपेण चाप्यथ ।
तथा विभव रूपेण नानाभाव मुपेयुषा ॥ 4

व्यापको भगवान् देवः भक्तानुग्रह काम्यया ।
अनौपम्य मनिर्देश्यं वपुः स भजते परम् ॥

एका मूर्ति रियं दिव्या पराख्या वैष्णवी परा।
योगसिद्धा भजन्त्येनां हृदि तुर्यं पदाश्रिताम् ॥

व्यूहमूर्तयः

अथ व्यूहस्वरूपं ते द्वितीयं वर्णयाम्यहम्।
व्यूहात्मानं चतुर्धा स्वं देवः प्रागादिभेदतः।
वासुदेवादि भेदेन सौषुप्ताध्वनि तिष्ठति।
संस्थान मादिमूर्तेर्वै सर्वेषां तु समं स्मृतम्।
वासुदेवस्तु पूर्वे स्यात् सङ्कर्षणस्तु दक्षिणे।
प्रद्युंनस्तु प्रतीच्यां च अनिरुद्धस्तथोत्तरे।
व्यूहमूर्तय एते तु ध्यातव्या वरदा इमे।
ज्ञानक्रियादिभि र्विष्णोः लोकाननुसिसृक्षतः।
व्यहसंज्ञमिदं रूपं द्वितीयं कथितं मया।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विभवमूर्तयः

तृतीयं विभवाख्यं तु विश्वमन्दिर मध्यगम्।
नानाकार क्रिया कर्तृरूपं विष्णोःनिशामय।
विशाखयूपो भगवान् स देवस्तेजसां निधिः।
विशाखयूप एवैष विभवान् भावयत्युत।
ते देवा विभवात्मानः पद्मनाभादयो मताः।



विभवमूर्तिनामानि।

पद्मनाभो ध्रुनोऽनन्तः शक्तीशो मधुसूदनः।
विद्याधिदेवः कपिलो विश्वरूपो विहङ्गमः।
क्रोधात्मा बडवावक्रो धर्मो वागीश्वरस्तथा।
एकार्णवान्त श्शायी च तथैव कमठाकृतिः।
वराहो नरसिंहश्चा प्यमृताहरण स्तथा।।
श्रीपति र्दिव्यदेहो ऽथ कान्तात्मा ऽमृतधारकः।
राहुजित् कालनेमिघ्नः पारिजातहर स्तथा ।
लोकनाथ स्तु शान्तात्मा दत्तात्रेयो महाप्रभुः।
न्यग्रोधशायी भगवान् एकश्शृङ्गतनु स्तथा । ।
देवो वामनदेह स्तु सर्वव्यापी त्रिविक्रमः।
नरो नारायण श्चैव हरिःकृष्ण स्तथैव च । ।
ज्वलत् परशुभृत् रामो रामश्चान्यो धनुर्धरः।
वेदविद् भगवान् कल्की पातालशयनः प्रभुः।
त्रिंशच्चाष्टाविमे देवाः पद्मनाभादयो मताः।



वैभवमूर्तीनां स्थानम्

विभोर्विशाख यूपस्य तत्तत्कार्यवशा दिमे।
स्फूर्तयो विभवाः ख्याताः कार्यं चैषा मसङ्करम्।
शुद्धा शुद्धाध्वनो मध्ये पद्मनाभो व्यवस्थितः।
ध्रुवादयो ऽपरे देवाः विवृताः विश्वमन्दिरे। (लक्ष्मीतन्त्रे)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्म्याः पर व्यूह विभव शक्तयः

लक्ष्म्याः नानारूपाणि

अहं नारायणी देवी पूर्वेषा मपि पूर्वजा ।
साक्षाद् भगवतो विष्णोः अहं श्री रनपायिनी ॥ 1

विभजामि स्वया शक्त्या चतुर्धात्मान मात्मना ।
लक्ष्मीः कीर्ति र्जया माया चतस्रो मूर्तश्च ताः ॥ 2

या सा शक्तिः परा लक्ष्मी रहं ताहं विभो र्हरेः ।
विभजयन्ती स्वमात्मानं चतुर्धा जगतो हिते ॥ 3

चतुर्व्यूहमूर्तिशक्तयः

अह मेव परा हन्ता भवामि प्रथमा तनुः ।
लक्ष्मी र्नाम महाभागा सर्वैश्वर्य फलप्रदा ॥ 4

कीर्ति र्नाम द्वितीया मे तनुः सत्कीर्ति दायिनी ।
जया नाम तृतीया मे तनु र्विजय दायिनी ॥ 5

माया नाम चतुर्थी मे सर्वाश्चर्य करी तनुः ।
लक्ष्मी कीर्ति र्जया माये त्येवं नारायणा श्रयाः ॥ 6

नारायणाश्रया या मे मूर्तयः परमोज्ज्वलाः ।
स्वशक्ति निचयोपेताः निराकारास्तु निष्कलाः ॥ 7

सूर्यस्य रश्मयो यद्वद् ऊर्मय श्चांबुधे रिव ।
सर्वैश्वर्य प्रभावे तु लक्ष्मी र्लक्ष्मीपतेः स्थिता ॥ 8

नाना विशेष लक्ष्मीभिः कोटि संख्याभि रावृता ।
कीर्ति स्तथाविधा नैव विभिन्ना विग्रहे विभोः ॥ 9

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तन्नास्ति यन्न हि तया व्याप्तं सामान्य देहया ।
यस्य यत्र च या कीर्तिः स्व सामर्थ्या त्प्रजायते ॥ 10

सा सा रूप विशेषोऽस्याः सामान्यात्मन उत्थिता ।
जया जयेश्वरस्यैवं व्याप्ति भावेन संस्थिता ॥ 11

या काचि द्विद्यते माया जग त्यस्मिन् सुरादिषु ।
भगव न्मायायोद्भूतां तां मां विद्धि सुरेश्वर ॥ 12

तदीयं निष्कलं रूपं मदीयं च विहाय वै ।
कोऽस्मिन् तत्वोदधौ चास्ति चतुर्धा सुरसत्तम ॥ 13

भगवच्छक्तिभिः सम्यक् अभियोग विभाविताः ।
स्वालोक ज्ञानसामर्थ्यात् साकारत्व मुपागताः ॥ 14

ध्यातव्याः साधकश्रेष्ठैः इज्याः पूज्याश्च सिद्धये ॥ (लक्ष्मीतन्त्रे 45)

व्यूहान्तर द्वादशशक्तय:

श्रीश्च कामेश्वरी कान्तिः क्रिया शक्ति र्विभूतय:।
इच्छा प्रीति रति श्चैव माया धी र्महिमेति च।।
एवं चतुर्भुजस्यापि षोडाऽहं क्रमशः स्थिता।।

(अन्यत्र च)

लक्ष्मीः कीर्ति र्जया माया व्यूह शक्तय ईरिताः॥

(व्यूहान्तरशक्तय:12)

श्रीश्च वागीश्वरी कान्तिः क्रिया शान्ति र्विभूतयः।
इच्छा प्रीति रतिश्चैव माया धी र्महिमे तिच ॥
शक्तयः केशवादीनां ता एताः स्वरशक्तयः।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

(विभवशक्तय:24)

पद्मनाभादयो देवाः शक्तीस्तेषां इमाः श्रुणु॥

धी स्तारा वारुणी शक्तिः पद्मा विद्या तथैव च।
सह्या विश्वा खगा भू गौं लक्ष्मी वांगीश्वरी तथा॥

अमृता धारिणी छाया नारसिंही सुधा तथा।
श्री कीर्ति विंश्वकामा मा सत्या कान्ति सरोरुहा॥

माया पद्मासना खर्वा विक्रान्तिः नरसंभवा।
नारायणी हरिप्रीतिः गान्धारी काश्यपी तथा।
वैदेही वेदविद्या च पद्मिनी नागशायिनी।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विष्णुमूर्तीनां लक्ष्मीमूर्तयः

नारायणावतारो यः शक्तीशो नाम नामतः।
प्रकारा बहवस्तस्य सर्वत्राऽह मनुव्रता ।। (लक्ष्मीतन्त्रे 8-19)

एकधा द्वि चतुर्थी च षोडा चैव तथा ऽष्टधा।
पुनर्द्वादाशधा चैव तत्र नामानि मे श्रुणु ।।

I. परं एकं - पररूपः- नारायणः नारायणी (महालक्ष्मी/परा)
परंब्रह्म नारायणः। लक्ष्मी नारायणः।
परममूर्तिः परवासुदेवः । श्रीः परवासुदेवः। मूर्तिःद्वयम्

II. परमरूपे

1. द्विरूपे - विष्णुदेवः श्रीदेवी -हरेरङ्कस्था - अनपायिनी
2. हरिः पुष्टिदेवी - (हरेस्समीपस्था)

III. व्यूहर्मूर्तयः (चतस्रो मूर्तयः शक्त्यः)

1. वासुदेवः लक्ष्मीः (सर्वैश्वर्यफलप्रदा-पूर्वे)
2. सङ्कर्षण & कीर्तिः (सत्कीर्तिदायिनी दक्षिणे।)
3. प्रद्युम्नः & जया - (विजयदायिनी पश्चिमे।)
4 अनिरुद्धः & माया – (सर्वाश्चर्यकरी - उत्तरे)

IV षण्मूर्तयः (षोडामूर्तयः शक्तयः 6)

षड्कोणस्थाःमूर्तयः
षडङ्गमूर्तिशक्तयः ।

1. ज्ञानरूपः - हृदयः & शुद्धिः
2. ऐश्वर्यरूपः -शिरः & निरञ्जना
3. शक्तिमान् - शिखी & नित्या
4. बलवान् - कवची - & ज्ञानशक्तिः
5. तेजस्वी - नेत्री & अपराजिता
6. वीर्यवान् - वीर्यः & परा प्रकृतिः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

V. अष्टधा मूर्तयः । (अष्टौमूर्तयः & शक्तयः 8)

1. पुरुषः & लक्ष्मी	5. कपिलः & शान्तिका
2. सत्यः & सरस्वती	6. यज्ञदेवः & तुष्टिदा
3. अच्युतः & प्रीतिवर्धिनी	7. नारायणः & सर्वकामदा
4. अनिरुद्धः & यशस्करी	8. पुण्यरूपः & पुष्टिदा

VI. द्वादशमूर्तयः (व्यूहान्तरमूर्तयः & शक्तयः 12)

1. केशवः & श्रीः	7. त्रिविक्रमः & इच्छा
2. नारायणः & वागीश्वरी	8. वामनः & प्रीतिः
3. माधवः & कान्तिः	9. श्रीधरः & रतिः
4. गोविन्दः & क्रिया	10. हृषीकेशः & माया
5. विष्णुः & शान्तिः	11. पद्मनाभः & धीः
6. मधुसूदनः & विभूतिः	12. दामोदरः & महिमा

VII. अष्टत्रिंशत् विभवमूर्तयः & शक्तयः 38

1. पद्मनाभः & धीःज्ञानी (बुद्धिः)	10. क्रीडात्मा & भूमिदेवी
2. ध्रुवः & तारा	11. बडवा वक्त्रः & गौर्देवी
3. अनन्तः & वारुणी	12. धर्मः & लक्ष्मी
4. शक्तीशः & शक्तिः	13. वागीश्वरः & वागीश्वरी
5. मधुसूदनः & पद्मा	14. एकार्णवान्तरशायी & अमृता
6. विद्याधिदेवः & विद्या	15. कमठाकृतिः (कूर्मरूपी) & धारिणी
7. कपिलः & सङ्ख्या	
8. विश्वरूपः & विश्वा	16. वराहः & छाया
9. विहङ्गमः & खगा	17. नरसिंहः & नारसिंही

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

18. अमृताहरण: & सुधादेवी
19. श्रीपति: & श्री:
20. दिव्यदेह: & कीर्तिदेवी
21. कान्तात्मा & विश्वकामा
22. अमृतधारक: & मादेवी
23. राहुजित् & सत्या देवी
24. कालनेमिघ्न: & कान्ति देवी
25. पारिजातहर: & सरोरुहा
26. लोकनाथ: & माया
27. शान्तात्मा & पद्मासना
28. दत्तात्रेय: & खर्वा
29. न्यग्रोधशायी & विक्रान्ति: (वटपत्र)
30. एकश्रृङ्गतनु: & नरसंभवा
31. वामनदेहदेव: & नारायणी
32. त्रिविक्रम: & हरिप्रीति:
33. नरनारायण & गान्धारी
34. हरिकृष्ण: & काश्यपी
35. परशुराम: & वेदविद्या
36. कोदण्डराम: & वैदेही
37. भगवान्कल्की & पद्मिनी
38. पाताळशयन: & नागशायिनी



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्मी मानस पूजा विधिः
(पाञ्चरात्रागमे)

देह बन्धे तु वाञ्छा चेद् देहं त्वं मामकं श्रुणु ।
एकस्मिन् हृदये तोयं माहेन्द्रं मण्डपं स्मरेत् ॥

(द्वारपूजा)

चतुर्द्वारयुतं तत्र संस्मरेत् द्वारपालिकाः ।
बलाकिणीं पुरः श्यामां वनमालां तथा परे ॥

श्वेतां विभीषिकां पश्चाद् उक्तवर्णा मनुस्मरेत् ।
उत्तरे शाङ्करी शक्र धूम्रवर्णा मनुस्मरेत् ॥
तत्र मण्डपमध्ये तु सहस्रादित्य सन्निभम् ।

(पीठपूजा)

अष्टपत्रं स्मरेत् पद्मं कर्णिका केसरोज्ज्वलम् ॥

पूर्वेदले वासुदेवं सङ्कर्षं चैव दक्षिणे ।
प्रद्युंनं पश्चिमे पत्रे त्वनिरुद्ध मथोत्तरे ॥

शङ्खचक्र धरान् सर्वान् वनमाला विभूषितान् ।
युगानुसारि कान्तीं श्च स्मरे दभिमुखान् मम ॥

गुग्गुलुं च गुरूण्यं च मदनं शललं तथा ।
गजेन्द्रान् संस्मरेत् कोणे सुधां मामभिषिञ्चतः ॥

(लक्ष्मी ध्यानम्)

कर्णिका बीजमध्यस्थां सर्वलोक महेश्वरीम् ।
मां स्मरेत् तप्तहेमाभां पङ्कजद्वय धारिणीम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वरदाभय हस्तां च सर्वाभरण भूषिताम् ।
अनिर्देश्या मनौपम्यां विष्णुपत्नी मनिन्दिताम् ॥

स्मितज्योत्स्नानुगैर्दिव्यै रसितापाङ्ग सम्भवैः ।
सिञ्चन्तीं किरणैश्शीतैः तप्ततप्तं जगत्त्रयम् ॥

(उपचारपूजा)

उत्पाद्य ज्ञानतो भोगान् तैर्यजेत् परमेश्वरीम् ।
ब्रह्मानन्दमयैस्सम्यक् मन्मयै दौषवर्जितैः ॥

(लक्ष्मीनारायण ध्यानम्)

यद्वा नारायणाङ्कस्थां तत्सङ्गाह्लाद भूषिताम् ।
करेण दक्षिणेनेशं आश्लिष्यन्तीं निरन्तरम् ॥

प्रतिपत्तिस्तु कर्तव्या तदा वैमानिकी तनौ ।
दांपत्यं तदमी मांस्यं आवयोः श्रुतिगह्वरम् ॥

(इति लक्ष्मीतन्त्रे इन्द्रं प्रति लक्ष्मी वचनम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पुरुषसूक्तेन नारायण पूजा

श्री:

श्रीमते वासुदेवाय नम:

पुरुषसूक्तयाग:

श्री परमपुरुषविष्णु ध्यानम्

गोक्षीराभं पुण्डरीकायताक्षं -
चक्राब्जाभ्यां शङ्ख कौमोदकीभ्याम् ।
श्रीभूमिभ्यां अर्चितं योगपीठे –
ध्यायेद् देवं पूजयेत् पौरुषेण।

आगच्छ देवदेवेश जगद्योने रमापते ।
कलशेऽस्मिन् प्रतिष्ठाने सन्निधेहि कृपां कुरु ।।

अत्र नारायणं पुरुषसूक्तस्य अष्टादश ऋग्भि: अष्टादश – भोगै:
पूर्वं आराध्य –तत: नारायणाङ्के श्रियं श्रीसूक्तस्य –षोडशमन्त्रै:
षोडशोपचारै: संपूजये दिति विधिक्रम:।।

पुरुषसूक्तपूजायां अष्टादश उपचार विधि:

आवाहनासने सार्घ्यं पाद्य माचामनं तथा ।
स्नानं च परिधानं च सोत्तरीयोपवीतकम् ।
गन्ध:सुमनसो दीपो धूपश्च मधुपर्कक: ।
प्रापणं सेन्दुताम्बुलं पादयो: कुसुमाञ्जलि: ।
आत्माराधनदानं च यथेष्टस्थान चिन्तनम् । (लक्ष्मीतन्त्रे)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पुरुषसूक्तऋचः प्रणवाद्याः स्थानम्	न्याससृष्टि उच्छरेत्	18 उपचारः	18 भोगाः
1. सहस्रशीर्षापुरुषः.... + दशाङ्गुलम् ॥	शिरसि	आवाहनम्	आवाहनम्
2. पुरुष एवेद....... +सर्वम् अतिरोहति ॥	अक्ष्णोः	आसनम्	आसनम्
3. एतावानस्य...... +महिमा अमृतं दिवि ॥	वदने	अर्घ्यं	अर्घ्यं
4. त्रिपादूर्ध्वउदैत्पुरुषः.... + अभि ॥	दक्षांसे	पाद्यम्	पाद्यम्
5. तस्माद्विराडजायत.... + मथो पुरः ॥	वामांसे	आचमनम्	आचमनम्
6. यत्पुरुषेण हविषा.... + शरद्धविः ॥	कण्ठे	स्नानम्	स्नानम्
7 सप्तास्यासन् परिधयः.... + पुरुषं पशुम् ॥	स्कन्धे	परिधानम् वस्त्रम्	परिधानम् उत्तरीयकम्
8. तं यज्ञं बर्हिषि प्रौक्षन्.... + ऋषयश्च ये ॥	हृदये	उत्तरीयम्	उपवीतम्
9. तस्माद्यतात्सर्वहुतः..... + ग्राम्याश्चये ॥	नाभौ	उपवीतम्	गन्धाः
10.तस्मादश्वा अजायन्त... + अजावयः ॥	दक्षोरौ	गन्धाः	सुमनसः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पुरुषसूक्तऋचः प्रणवाद्याः स्थानम्	न्याससृष्टि उच्छरेत्	18 उपचारः	18 भोगाः
11.तस्मादश्वा अजायन्त.. + अजावयः॥	दक्षोरौ	गन्धाः	सुमनसः
12.यत्पुरुषं व्यदधुः....... + पादावुच्येते॥	दक्षजानुनि	धूपः	दीपः
13. ब्राह्मणोस्य मुखमासीत्... + अजायत॥	वामजानुनि	दीपः	मधुपर्कः
14.चन्द्रमा मनसो जातः + वायुरजायत ॥	दक्षपादे	नैवेद्यम्	प्रापणम्
15.नाभ्या आसीदन्तरिक्षं.. + अकल्पयम् ॥	वामपादे	ताम्बूलम्	ताम्बूलम्
16.वेदाहमेतं पुरुषं ..... + महान्तम् यदास्ते॥	दक्षकरे	नीराजनम्	पादपुष्पाञ्जलिः
17.धाता पुरस्ता द्यमुदा.... + जहार विद्यते ॥	वामकरे	प्रदक्षिणम्	आत्मपूजार्पणम्
18.यज्ञेन यज्ञ..... + मयजन्तदेवाः देवाः॥	सर्वाङ्गे	नमस्कारः	यथास्थान विसर्जनम्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विष्णुं विश्वात्मकं देवं नारायण मनामयम्।
भावयेन् परमात्मानं शङ्ख चक्र गदाधरम्।।
चतुर्भुजं पीतवस्त्रं पुण्डरीक निभेक्षणम्।
उदितं संस्मरेद् देवं स्वशक्तेः स्पन्दनात्मनः।।
परं ब्रह्म परंधाम यत् पारे तमसः स्थितम्।
शक्तिमत् शक्ति भावेन लक्ष्मीनारायणं महः।।

श्रौतसूक्त मन्त्रार्चन महिमा विधिः (सूक्तयोर्महिमा)

उत्तारणाय जीवानां उपायोऽन्विष्यता मिति।
आवाभ्या मुत्थितं तेजः शब्द ब्रह्म महोदधिः।।
मथ्यमानात् ततस्तस्मात् अभूत् सूक्तद्वयामृतम्।
पुरुषस्य हरेः सूक्तं मम सूक्तं तथैव च।।
अन्योन्य शक्तिसंपृक्तं अन्योन्यार्ण परिष्कृतम् ।
नारायणार्ष मव्यक्तं पौरुषं सूक्त मिष्यते।।
अन्यन् मदार्षकं सूक्तं श्री सूक्तं यत् प्रचक्षते।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी भेदविवरणम्

आम्नायोक्ता: अष्टलक्ष्म्य: (पञ्चलक्ष्म्यः)

पूर्वाम्नाय पूजायां प्रोक्ता: - लक्ष्मीभेदा:

पूर्वआम्नायोक्ताः पञ्चलक्ष्मीः & अष्टलक्ष्मीः - यथाक्रमेण -

1) महालक्ष्मी, 2) सौभाग्यलक्ष्मी, 3) त्रिशक्तिलक्ष्मी

4) साम्राज्यलक्ष्मी, 5) सिद्धिलक्ष्मी (5+3=8)

6) ऊर्ध्वांनाये-सिद्धिलक्ष्मी प्रोक्ता। (एषा 6 - श्रीविद्यालक्ष्मी नाम्नी।)

7) पश्चिमाम्नाये - राजलक्ष्मी प्रोक्ता। (एषा - कुब्जिका नाम्नी।)

8) पूर्वाम्नाये - धान्यलक्ष्मी प्रोक्ता। (एषा-अन्नपूर्णा नाम्नी।)

आहत्य एताः अष्टलक्ष्म्य: इति जगति प्रख्याताः । एतासां अष्टलक्ष्मीनां रूपद्वयेन ता: षोडशधा पूज्याः लक्ष्म्याः प्रोच्यन्ते। सर्वासां आद्या महालक्ष्मी भवति॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अष्टलक्ष्मी ध्यानम्



1. आदिलक्ष्मी (सकलसिद्धिप्रदा) ॥

द्विभुजांच द्विनेत्रांच साभयां वरदान्विताम् ।
पुष्पमालाधरां देवीं अंबुजासन संस्थिताम् ॥ 1
पुष्पतोरण संयुक्तां प्रभामण्डल मण्डिताम् ।
सर्वलक्षण संयुक्तां सर्वाभरण भूषिताम् ॥ 2
पीतांबरधरां देवीं मकुटे चारुबन्धनाम् ।
स्तनोन्नति समायुक्तां पार्श्वयोर्दीप शक्तिकाम् ॥ 3
सौन्दर्य निलयां शक्तिं आदिलक्ष्मीं अहं भजे । 4

(अन्यत्) आदिलक्ष्मी

द्विभुजांच द्विनेत्रांच पद्माभय वरान्विताम् ।
पुष्पमाला समायुक्तां प्रभामण्डल मण्डिताम् ॥ 1
सर्वलक्षण संपन्नां सर्वाभरण भूषिताम् ।
सुन्दरीमादिलक्ष्मीं च अष्टमङ्गल संयुताम् ॥ 2

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



2. सन्तानलक्ष्मी (सन्तानसिद्धिप्रदा)

जटामकुट संयुक्तां स्थितासन समन्विताम् ।
अभयं कटकं चैव पूर्णकुंभं भुजद्वये ॥ 1

कञ्चुकं छन्नवीरंच मौक्तिकं चाभिधारिणीम् ।
दीप चामर नारीभिः सेवितां पार्श्वयोर्द्वयोः ॥ 2

बाले सेनानि संकाशे करुणापूरिताननाम् ।
महाराज्ञीं च सन्तान लक्ष्मी मिष्टार्थ सिद्धये ॥ 3

(अन्यत्र तु)

(अभयं खड्ग खेटं च वरदं च चतुर्भुजैः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



3. गजलक्ष्मी (राज्यप्रदा - गजद्वयाभिषिक्ता)

चतुर्भुजां द्विनेत्रांच वराभय करान्विताम् ।
अब्जद्वय करांबोजां अंबुजासन संस्थिताम् ॥ 1

ससुवर्ण घटेभाभ्यां प्लाव्यमानां महाश्रियम् ।
सर्वाभरण शोभाढ्यां शुभ्रवस्त्रोत्तरीयकाम् ॥ 2

चामर ग्रह नारीभिः सेवितां पार्श्वयोर्द्वयोः ।
आपादलंबि वसनां करण्ड मकुटां भजे ॥ 3

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



4. धनलक्ष्मी (धनप्रदा-अष्टभुजा)

किरीट मकुटोपेतां स्वर्णवर्ण समन्विताम् ।
सर्वाभरण संयुक्तां सुखासन समन्विताम् ॥ 1

परिपूर्णं च कुंभंच दक्षिणेन करेणतु ।
चक्रं बाणंच तांबूलं तथा वाम करेणतु ॥ 2

शंखं पद्मंच चापंच गण्डिका मपि धारिणीम् ।
सत्कञ्चुक स्तनीं ध्यायेत् धनलक्ष्मीं मनोहराम् ॥ 3



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



5. धान्यलक्ष्मी (अष्टभुजा-धान्यश्रीः)

वरदाभय संयुक्तां किरीट मकुटोज्वलाम् ।
अंबुजं चेक्षु शालीं च कदलीफल द्रोणिकाम् ॥ 1

पङ्कजं दक्ष वामे तु दधानां शुक्ल रूपिणीम् ।
कृपामूर्तिं जटाचूडां सुखासन समन्विताम् ॥ 2

सर्वालंकार संयुक्तां सर्वाभरण भूषिताम् ।
मदमत्तां मनोहारि रूपां धान्यश्रियं भजे ॥ 3

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



6. विजयलक्ष्मी (जयदा, अष्टभुजा,सिह्मासनस्था)

अष्टबाहुयुतां देवीं रत्नसिह्मा सनस्थिताम् ।
सुखासीनां सुकेशीं च किरीट मकुटोज्ज्वलाम् ॥ 1

श्यामाङ्गीं कोमलाकारां सर्वाभरणभूषिताम् ।
खड्गं पाशं तथा चक्रं अभयं सव्य हस्तके ॥ 2

खेटकं चाङ्कुशं शङ्खं वरदं वाम हस्तके ।
जयरूपधरां शक्तिं प्रभुसौन्दर्य शोभिताम् ॥ 3

हंसारूढां स्मरेत् देवीं विजयां विजयाप्तये ॥ 4

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



7. महालक्ष्मी (सौभाग्यदा) (चतुर्भुजा सर्वमङ्गळा)

चतुर्भुजां महालक्ष्मीं गजयुग्म सुपूजिताम् ।
पद्मपत्राभ नयनां वराभय करोज्वलाम् ॥ 1

ऊर्द्ध्व द्वयकरे चाब्जं दधतीं शुक्लवस्त्रकाम् ।
पद्मासने सुखासीनां भजेऽहं सर्वमङ्गलाम् ॥ 2

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



8. वीरलक्ष्मी (अष्टभुजा वीरश्रीः)

अष्टबाहु युतां लक्ष्मीं सिह्मासन वर स्थिताम् ।
तप्त काञ्चन संकाशां किरीट मकुटोज्वलाम् ॥ 1

स्वर्ण कञ्चुक संयुक्तां छन्नवीर धरां तथा ।
अभयं वरदं चैव भुजयो स्सव्य वामयोः ॥ 2

चक्रं शूलंच बाणंच शङ्खं चापं कपालकम् ।
दधतीं वीरलक्ष्मीं तां नवतालात्मिकां भजे ॥ 3

दुकूल वसनां लक्ष्मीं सर्वा ऽराति विनाशिनीम् ॥ 4

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्म्याः मूलमन्त्र भेदाः। (५०)

इयं बीजत्रयी विद्या कथिता त्रिपुराह्वया।
व्युत्क्रमाऽनुक्रमाभ्यां सा ह्यात्मसाम्यप्रदाऽपिच।
विधेयं कामधुक् प्रोक्ता जप होमादि साधिता।।
(पाञ्चरात्रे – लक्ष्मीतन्त्रे – विद्याप्रकाशे)

लक्ष्म्याः सप्तविद्याः (सप्तविध बीजाक्षर मन्त्राः)

1. तारा-ओं । 2. तारिका ह्रीं । 3. अनुतारिका श्रीं ।
4. वाग्भवी ऐं । 5. कामबीजं – क्लीं । 6. सारस्वतबीजं-सौः।
7. महालक्ष्मीविद्या-क्ष्म्रीं।। अत्र- "ऐं ह्रीं श्रीं" – इति त्रिपुरा नामक "बीजत्रयी विद्या" नाम भवति।

1. श्रीं एकाक्षरी बीजमन्त्रः (1वर्णः) एकाक्षरी विद्या।
2. ओं श्रियै नमः - (4 अक्षरी) - चतुरक्षरी विद्या। (नामात्मकमन्त्रः)
3. ओं नमः कमलवासिन्यै स्वाहा ॥ (10 वर्णाः दशाक्षरीविद्या)
4. ओं श्रीं ह्रीं क्लीं ऐं सौः जगत्प्रसूत्यै स्वाहा ॥ (द्वादशाक्षरीविद्या 12)
5. ओं ऐं ह्रीं श्रीं क्लीं सौं जगत्प्रसूत्यै नमः ॥ (द्वादशाक्षरीविद्या 12)
6. ओं श्रीं ह्रीं क्लीं श्रीं महालक्ष्मि आगच्छ आगच्छ मम मन्दिरे तिष्ठ तिष्ठ स्वाहा ॥
7. ओं श्रीं ह्रीं क्लीं श्रीं सिद्धलक्ष्म्यै नमः। (11 एकादशाक्षरी / 10 दशाक्षरी)
8. "ओं श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा" ॥
9. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः। (27)
10. ऐं श्रीं ह्रीं क्लीं कमलात्मिकायै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

11. ओं ह्रीं क्रीं कमलवासिन्यै क्रीं ह्रीं स्वाहा ।।
12. श्रीं स् ह् क् ल् ह् रीं श्रीं
    ओं ऐं ह्रीं श्रीं क्लीं सौं जगत्प्रसूत्यै नमः ।।
13. ओं श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः (नवाक्षरीविद्या)
14. ओं श्रीं ह्रीं क्लीं श्रीं लक्ष्मि आगच्छागच्छ मम मन्दिरे तिष्ठ तिष्ठ स्वाहा।।
15. ओं श्रीं नमो भगवति सर्वसौभाग्यदायिनि - श्रीं विद्ये महाविभूतये स्वाहा ।। (२८वर्णविद्या) (प्रपञ्चसारसंग्रहे)
16. ओं श्रीं ह्रीं क्लीं श्रीं सिद्धलक्ष्म्यै नमः। (एकलक्षंजपेत्)
17. ओं श्रीं श्रीं श्रीकरि धनकरि धान्यकरि धान्यैक वृद्धिकरि समृद्धिकरि सर्वसंपत्करि श्रीं श्रीं महालक्ष्मि सर्वैश्वर्यं कुरुकुरु स्वाहा।।
18. ओं श्रीं ह्रीं श्रीं नमः कमलवासिन्यै स्वाहा ।।
19. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद सर्वधनं मे वशमानय स्वाहा।।
20. ओं श्रीं ह्रीं क्लीं महालक्ष्मि महालक्ष्मि एह्येहिसर्वसौभाग्यं मे देहि स्वाहा। (२४ वर्णाः)
21. ओं श्रीं वसुदे - वसुधारे - वसुकरि धनकरि धान्यकरि रत्नकरि स्वाहा।
22. नमः कमलवासिन्यै स्वाहा (दशाक्षरमन्त्रः) (प्र-सार-सं)

ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद
श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः
(अथवा) ओं श्रीं ह्रीं श्रीं महालक्ष्मि नमः। (शारदायां)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

23. ओं श्रीं ह्रीं ऐं कुबेरलक्ष्म्यै - कमलधारिण्यै - सिंहवाहिन्यै धनाकर्षिण्यै स्वाहा । (27 अर्णः)
24. ऐं ह्रीं श्रीं ज्येष्ठालक्ष्मि स्वयम्भुवे ह्रीं ज्येष्ठायै नमः (१७वर्णाः)
25. ओं ग्लौं श्रीं महि अन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं ग्लौं ओं (28 अक्षरमन्त्रः)
26. ओं ऐं ह्रीं श्रीं क्लीं सौः पङ्कजहस्ते नमः। १२ अर्णः
27. ऐं ह्रीं श्रीं – (त्र्यक्षरी)।
28. ऐं ह्रीं श्रीं क्लीं – (4 अक्षरी) - चतुरक्षरी विद्या। (बीजात्मकमन्त्रः)
29. ओं हिरण्यवर्णायै नमः - (9 अक्षरी) - नवाक्षरी विद्या। (नामात्मकमन्त्रः)
30. ओं श्रियै नमः (5अर्णः) - पञ्चाक्षरी विद्या। (नाममन्त्रः)
31. ओं ह्रीं लक्ष्म्यै नमः (6अर्णः) - षडक्षरी विद्या। (बीजात्मकमन्त्रः)
32. ओं श्रीं ह्रीं ओं श्रियै नमः (8अर्णः) - अष्टाक्षरी विद्या।
33. ओं श्रीं श्रियै नमः ॥ (6अर्णः) - षडक्षरी विद्या।
34. ओं श्रीं ह्रीं क्लीं कमलायै नमः 9 नवाक्षरी विद्या।
35. ओं श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः 10 दशाक्षरी विद्या (नवाक्षरी)
36. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः ॥ (27 सप्तविंशतिवर्णात्मकोमन्त्रः)
37. ओं श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै स्वाहा (21 अर्णाः)
38. ऐं श्रीं ह्रीं क्लीं कमलात्मिकायै नमः (12 अर्णाः)
39. ओं श्रीं ह्रीं श्रीं नमः कमलवासिन्यै स्वाहा (14 अर्णाः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

40. ओं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद - सकल सौभाग्यं मे देहि दापय स्वाहा ॥ (31 वर्णाः)

41. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद - सकल सौभाग्यं मे देहि देहि श्रीं ह्रीं श्रीं - महालक्ष्म्यै नमः ॥

42. ओं श्रीं ह्रीं श्रीं मं महालक्ष्म्यै नमः ॥

43. ओं श्रीं ह्रीं क्लीं हं यं वं धनलक्ष्म्यै नमः ॥

44. ओं श्रीं नमो भगवति सर्व सौभाग्य दायिनि श्रीं विद्ये महाविभूतये स्वाहा।(27 अर्णाः)

45. ओं श्रीं श्रीं श्रीकरि धनकरि धान्यकरि धान्यैकवृद्धिकरि समृद्धिकरि सर्वसम्पत्करि श्रीं श्रीं महालक्ष्मि सर्वैश्वर्यं कुरु कुरु स्वाहा।। (48 अर्णाः)

46. ओं ऐं ह्रीं श्रीं क्लीं क्ष्मौः जगत्प्रसूत्यै नमः

47. ओं ऐं ह्रीं श्रीं – ओं क्लीं श्रीं क्लीं महालक्ष्मि एह्येहि सर्वसौभाग्यं देहि देहि स्वाहा।। (द्वादशाक्षरी विद्या)

48. ओं श्रीं ह्रीं वं जुं सः आरोग्य लक्ष्म्यै नमः ॥

49. ओं श्रीं ह्रीं ऐं कुबेरलक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै धनाकर्षिण्यै स्वाहा ॥

50. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद सर्वधनं मे वश मानय स्वाहा। (30 अर्णाः)

51. ओं श्रीं वसुदे वसुदधारे वसुकरि धनकरि धान्यकरि रत्नकरि स्वाहा।

52. ऐं ह्रीं श्रीं ज्येष्ठालक्ष्मि स्वयंभुवे ह्रीं ज्येष्ठायै नमः (17 अर्णाः)

53. ओं ग्लौं श्रीं अन्नं महि अन्नं मे देहिअन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं ग्लौंओं (28 वर्णाः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

54. ओं श्रीं ह्रीं ऐं महालक्ष्म्यै कमलधारिण्यै धनाकर्षिण्यै सिह्मवाहिन्यै स्वाहा ॥

55. ओं श्रीं ह्रीं क्लीं महालक्ष्मि महालक्ष्मि एह्येहि सर्व सौभाग्यं मे देहि स्वाहा ॥ (24 अर्णाः) (प्रपञ्चसारसङ्ग्रहे)

56. ओं श्रीं ह्रीं श्रीं सिद्धलक्ष्म्यै नमः ॥

57. ओं श्रीं ह्रीं ऐं विद्यालक्ष्म्यै नमः ॥

58. ओं श्रीं ह्रीं क्लीं सर्व सौभाग्य लक्ष्म्यै नमः ॥

59. ओं नमोभगवति श्रीं महालक्ष्मि सर्व समृद्धिप्रदे स्वाहा ॥

60. ओं ह्रीं क्रीं कमलवासिन्यै क्रीं ह्रीं स्वाहा

61. ओं श्रीं ह्रीं श्रीं नमःकमलवासिन्यै श्रियै स्वाहा ॥

62. ओं श्रीं ह्रीं नमो धनदायै श्रियै स्वाहा ॥

63. ओं श्रीं ह्रीं महालक्ष्म्यै नमः

64. ओं नमो धनदायै स्वाहा

65. ओं ऐं क्लीं सौः श्रीं नमो भगवती सर्व सौभाग्यदायिनि श्रीं श्रीविद्ये श्रीं महा विभूतये स्वाहा

66. ओं श्रीं नमोभगवत्यै साम्राज्यदायै श्रीं महालक्ष्म्यै नमः ॥

67. ओं श्रीं हिरण्ये हिरण्योद्भवे हिरण्येश्वरी हिरण्यवर्षिणी हिरण्यसमृद्धिं मे देहि दापय स्वाहा ॥

68. ओं श्रीं ह्रीं वसुधारे वसुकरि धनकरि धान्यकरि रत्नकर्यै श्रियै नमः

69. ओं ऐं ह्रीं श्रीं कमलायै नमः (9 अर्णाः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

70. केबेरलक्ष्मी मन्त्रः (अर्णाः)
ओं श्रीं ह्रीं ऐं कुबेरलक्ष्म्यै कमलधारिण्यै सिंहवाहिन्यै धनाकर्षिण्यै नमः स्वाहा॥ (27)

71. ओं श्रीं ह्रीं क्लीं यक्षाय कुबेराय वैश्रवनाय धनधान्याधिपतये धनधान्य समृद्धिं मे देहि दापय स्वाहा॥ (अयं कुबेरमन्त्रः)

72. श्रीसूक्तमन्त्राः १५

1. हिरण्यवर्णां.....+.....मआवह ॥
2. तांम आवह.....+.....पुरुषानहम् ॥
3. अश्वपूर्वां.....+.....जुषताम् ॥
4. कांसोस्मितां.....+.....श्रियम् ॥
5. चन्द्रां प्रभासां.....+.....त्वां वृणे ॥
6. आदित्यवर्णे.....+.....अलक्ष्मीः ॥
7. उपैतुमां.....+.....दधातुमे ॥
8. क्षुत्पिपासां.....+.....गृहात् ॥
9. गन्धद्वारां.....+.....श्रियम् ॥
10. मनसः काम.....+.....यशः ॥
11. कर्दमेन.....+.....पद्ममालिनीम् ॥
12. आपःसृजन्तु.....+.....मे कुले ॥
13. आर्द्रां पुष्करिणीं.....+.....म आवह ॥
14. आर्द्रां यःकरिणीं.....+.....म आवह ॥
15. तां म आवह.....+.....पुरुषानहम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अष्टलक्ष्मी मालामन्त्रः ॥

ओं नमो भगवति लोक वशीकरमोहिनि, ओं ऐं ह्रीं श्रीं आदिलक्ष्मि, सन्तानलक्ष्मि, धान्यलक्ष्मि, गजलक्ष्मि, धनलक्ष्मि, वीरलक्ष्मि, विजयलक्ष्मि, ऐश्वर्याद्यष्टलक्ष्मि, योगाद्या मम हृदये, दृढस्थिता सर्वराज वशीकराया, सर्वलोक वशीकराया, सर्वजन वशीकराया, सर्वकार्य सिद्धिं मे कुरु कुरु सर्वारिष्टं, झहि झहि,सर्व सौभाग्यं कुरु कुरु, ओं नमो भगवति महालक्ष्मि हुं फट् स्वाहा ॥

73. महालक्ष्म्याः गायत्री मन्त्राः ॥

ओं हरिप्रियायै विद्महे पद्महस्तायै धीमहि - तन्नो लक्ष्मी प्रचोदयात्॥

ओं महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि तन्नो लक्ष्मी प्रचोदयात्॥

ओं अब्जहस्तायै विद्महे धनेश्वर्यै च धीमहि तन्नो लक्ष्मी प्रचोदयात् ॥

ओं नारायणायै विद्महे धनेश्वर्यै च धीमहि तन्नो पद्मा प्रचोदयात् ॥

ओं हेमरूपायै विद्महे पद्म हस्तायै धीमहि तन्नो लक्ष्मी प्रचोदयात्॥

ओं महादेव्यै च विद्महे विष्णु पत्न्यै च धीमहि तन्नो लक्ष्मी प्रचोदयात्॥

ओं हरिप्रियायै विद्महे हेमरूपायै धीमहि तन्नो रमा प्रचोदयात् ॥

ओं वसुप्रदायै विद्महे विष्णु कान्तायै धीमहि तन्नो लक्ष्मी प्रचोदयात् ॥

ओं अब्धिकन्यायै विद्महे विष्णु पत्न्यै च धीमहि तन्नो लक्ष्मी प्रचोदयात् ॥

ओं खगध्वजायै विद्महे पद्महस्तायै धीमहि तन्नो पद्मा प्रचोदयात्।

ओं सिन्धुकन्यायै विद्महे सिंहवाहायै धीमहि तन्नो रमा प्रचोदयात्।।

ओं हेमवर्णायै विद्महे सिंहवाहिन्यै धीमहि तन्नो पद्मा प्रचोदयात्।

हिरण्मय्यै च विद्महे पद्ममालिन्यै धीमहि तन्नो देवी प्रचोदयात्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मीरूप ध्यान संग्रहः

1. गजयुग्माभिषिक्ता श्रीः ॥

सर्वपाप हरां देवीं गजलक्ष्मीं हरिप्रियाम् ।
लाक्षा रस सवर्णाभां पद्मद्वय विराजिताम् ॥ 1

अभयं वरदं चैव करण्ड मकुटान्विताम् ।
पद्मासनस्थितां चैव व्याकीर्ण कुन्तलावृताम् ॥ 2

सव्य दक्षिण पार्श्वे च गजतुण्डा भिषेचनीम् ।
शक्तिभ्यां पुष्टि वृद्धिभ्यां चामरै रभिवीजिताम् ॥ 3

2. चतुर्गजाभिषिक्ता श्रीः ॥

कान्त्या काञ्चन सन्निभां हिमगिरि प्रख्यै श्चतुर्भि र्गजैः -
हस्तो क्षिप्त हिरण्मया मृतघटै रासिच्यमानां श्रियम् ।
बिभ्राणां वरमब्ज युग्म मभयं हस्तैः किरीटोज्वलाम् -
क्षौमाबद्ध नितंब बिंब ललितां वन्दे ऽरविन्द स्थिताम् ॥

3. षड्भुजा धनश्रीः ॥

किरीट मकुटोपेतां स्वर्ण वर्णां सु यौवनाम् ।
चक्रं बाणं च तांबूलं दक्षिणेन करेण तु ॥ 1

शंखं चैव धनुःकुण्डीं धारितां कर वामके ।
स्तनकञ्चुक संयुक्तां सर्वाभरण भूषिताम् ॥ 2

4. गजारूडा धान्यश्रीः ॥

अभयं वरदं चैव किरीट मकुटान्विताम् ।
अंबुजं चेक्षुशालींच कदलीफल द्रोणिकाम् ॥ 1

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अंबुजं दक्षवामे तु श्वेतरूपां च धारिणीम् ।
कृपामूर्तिं गजारूढां सर्वालंकार संयुताम् ॥ 2

5. अष्टभुजाजयश्रीः ॥

स्वर्णवर्णा मेकवक्त्रां द्विनेत्रां सुमनोहराम् ।
अष्टबाहुयुतां लक्ष्मीं सिह्मासन सुसंस्थिताम् ॥ 1

खड्गं पाशं च चक्रं च अभयं सव्य हस्तके ।
खेटकं चाङ्कुशं शङ्खं वरदं वाम हस्तके ॥ 2

हंस वाहन मासीनां पुष्पमालाभि रावृताम् । 3

6. सिह्मवाहिनी वीरलक्ष्मी ॥

अष्टबाहु युतां लक्ष्मीं सिह्म वाहन सुस्थिताम् ।
अभयं वरदं चैव हस्त द्वंद्वे च धारिणीम् ॥ 1

चक्रं बाणंच शूलं च धनुः शङ्खं कपालकम् ।
सर्व लक्षण संपन्नां तप्त काञ्चन सन्निभाम् ॥ 2

7. वीरलक्ष्मी ध्यानम् (पाञ्चरात्रागमे)

वीरलक्ष्मी रिति ख्याता वरदाभय हस्तिनी ।
ऊर्ध्वपद्मद्वयौ हस्तौ तथा पद्मासनेस्थिता ॥ 1

दक्षिणेत्वभयं बिभ्रत् उत्तरे वरदं तथा ।
ऊरु पद्म दलाकारौ वीरश्रीमूर्ति लक्षणम् ॥ 2

पाशांकुशाक्ष सूत्र वराभय गदा तथा ।
पद्म पात्रकरा कार्या विष्णुवीर्य स्वरूपिणी ॥ 3

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

8. ऐश्वर्यलक्ष्मी (वसुदा हयारूडा भूतिश्रीः)

अश्वारूढां महालक्ष्मीं चतुर्भुज समन्विताम् ।
स्वर्णवर्णधरां देवीं स्तनकञ्चुक संयुताम् ॥
क्षौमवस्त्र परीधानां सर्वाभरण भूषिताम् ।
स्त्रैणसौन्दर्य शोभाढ्यां श्रिय मैश्वर्यदां भजे ॥

9. अश्वारूढा ऐश्वर्यश्रीः

अश्वारूढां महालक्ष्मीं द्विनेत्रांच चतुर्भुजाम् ।
स्वर्णाङ्गीं हरिवल्लभां पीनस्तन सुशोभिताम् ॥
सर्वाभरण संयुक्तां दुकूलांबर धारिणीम् ।
ऐश्वर्यदां तां वन्देऽहं ऽसर्वसौभाग्य सिद्धये ॥

10. सिद्धलक्ष्मी (सर्वसिद्धिदा द्विभुजा)

तप्तकाञ्चन संकाशां द्विभुजां लोल लोचनाम् ।
कटाक्ष विशिखोद्दीप्तां अञ्जनाञ्चित लोचनाम् ॥
शुक्लांबर परीधानां सिन्दूर तिलकोज्वलाम् ।
शुक्लपद्मासन गतां ध्याये नारायण प्रियाम् ॥

11. चतुर्भुजा सिद्धलक्ष्मी

अभय वरद हस्तां अब्ज युग्मं दधानां -
सरसिज निजवासां रत्नताटंक भूषाम् ।
अरुण सदृश वर्णां अच्युत प्राणकान्तां -
सकल विबुध वन्द्यां सिद्धलक्ष्मीं नमामि ॥

12. सर्वमङ्गळागजलक्ष्मी (चतुर्भुजा)

चतुर्भुजां महालक्ष्मीं गजयुग्म सुपूजिताम् ।
पद्मपत्राभ नयनां वराभय करोज्वलाम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ऊर्द्ध्व द्वय करे चाब्जं दधतीं शुक्ल वस्त्रकाम् ।
पद्मासने सुखासीनां भजेऽहं सर्व मङ्गलाम् ॥

13. गृहलक्ष्मी (मङ्गलप्रदा) गजलक्ष्मी

या सा पद्मासनस्था विपुल कटितटी पद्मपत्रायताक्षी -
गंभीरा वर्तनाभि स्तनभर नमिता शुभ्र वस्त्रोत्तरीया ।
लक्ष्मी र्दिव्यै र्गजेन्द्रै र्मणिगण खचितैः स्नापिता हेमकुंभैः -
नित्यं सा पद्महस्ता मम वसतु गृहे सर्व माङ्गल्य युक्ता ॥

14. दीपलक्ष्मी (ज्ञानप्रदा-अष्टभुजाहरिणी)

तप्त स्वर्णनिभां सुरत्न मकुटां सिंहासने सुस्थितां -
शङ्खं चक्र वरा भयाब्ज युगलं चापं शरं बिभ्रतीम् ।
नाना रत्न विभूषितां सुरनुतां क्षौमांबरा मद्विजां -
वन्दे विष्णु मनोहरां प्रियकरीं तां दीपलक्ष्मीं शुभाम् ॥

15. भुवनलक्ष्मी (धैर्यश्री-शुभप्रदा)

अरुण कमल संस्था तद्रजः पुञ्जवर्णा-
करकमल धृतेष्टा अभीति युग्मांबुजा च ।
मणिमकुट विचित्रा लङ्कृता कल्पजालैः-
भवतु भुवन माता सन्ततं श्रीः श्रियै नः ॥

16. भूतिलक्ष्मी (विश्वश्री)

सरसिज निलये सरोज हस्ते -
धवल तरांशुक गन्ध माल्य शोभे ।
भगवति हरि वल्लभे मनोज्ञे -
त्रिभुवन भूतिकरि प्रसीद मह्यम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

17. मण्टपलक्ष्मी (राज्यदा-द्विभुजा गजद्वया)

धृतांबुजां श्रीफल हस्तयुग्मां-
पीतां द्विनेत्रान्वित वक्र शोभाम् ।
पार्श्व द्वये हस्ति युतां सुवेषां-
भजामि लक्ष्मीं कमलासनस्थाम् ॥

18. कुबेरलक्ष्मी (वसुदाश्री-भाग्यप्रदा)

वन्दे पद्मकरां प्रसन्न वदनां सौभाग्यदां भाग्यदां -
हस्ताभ्यां अभयप्रदां मणिगणैः नानाविधै र्भूषिताम्।
भक्ताभीष्ट फलप्रदां हरिहर ब्रह्मादिभि स्सेवितां-
पार्श्वे पङ्कज शङ्ख मुख्य निधिभिः युक्तां सदा शक्तिभिः ॥

19. वरलक्ष्मी (क्षीरसागरश्री-वाञ्छितप्रदा)

पद्मासनां पद्मकरां पद्ममाला विभूषिताम् ।
क्षीरसागर संभूतां हेमवर्ण समप्रभाम् ॥ 1
शुक्लवस्त्र परीधानां दिव्याभरण भूषिताम् ।
सुरत्न मकुटां रम्यां वरदां हरिवल्लभाम् ॥ 2
मुक्ताहार लस त्तुङ्ग स्तन कञ्चुक संयुताम् ।
रत्नताटंक केयूर काञ्ची कंकण मण्डिताम् ॥ 3
स्त्रैणसौन्दर्य शोभाढ्यां वरलक्ष्मीं विभावयेत्॥ 4

20. पद्मावतीलक्ष्मी (हरिणीश्री-पुष्टिदा-तुष्टिदा)

या रक्तांबुज वासिनी विलसिनी पुष्टाङ्ग तेजस्विनी -
या रक्ता रुधिरांबरा हरिसखी या श्री मनो ह्लादिनी ।
या रत्नाकर मन्थनात् प्रकटिता विष्णोश्च या गेहिणी -
सा मां पातु मनोरमा भगवती लक्ष्मी च पद्मावती ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

21. महालक्ष्मी (सर्वसिद्धिप्रदा) (चण्डीकल्पे) 18 भुजा

अक्षस्रृक् परशुं गदेषु कुलिशं पद्मं धनुः कुण्डिकां-
दण्डं शक्ति मसिं च चर्म जलजं घण्टां सुराभाजनम् ।
शूलं पाश सुदर्शने च दधतीं हस्तैः प्रवालप्रभां-
सेवे सैरिभ मर्दिनी मिह महालक्ष्मीं सरोजस्थिताम् ॥

22. दशसिद्धि लक्ष्म्यः ॥ (दशसिद्धि योगश्रियः)

अणिमा महिमा चैव गरिमा लघिमा तथा ॥
प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट भूतयः ॥
मुक्तिसिद्धि सर्वसिद्धिः भुंक्ति दशसिद्धय ईरिताः ॥
एता देव्य श्चतुर्बाहुः जपाकुसुम सन्निभाः ॥
चिन्तामणिं कपालं च त्रिशूलं सिद्धकज्जलम् ॥
दधानाः दयया पूर्णाः योगिभिश्च निषेविताः ॥

23. वैष्णवी ध्यानम् ॥

वैष्णवी कुङ्कुमाकारां त्रिणेत्रां चैकवक्त्रकाम्।
साभयां वरहस्तां च पद्मद्वयधरां पराम्।
त्रिभङ्ग्या संस्थितां देवीं स्वर्णवस्त्र विभूषिताम्।
सर्वाभरण संयुक्तां वैष्णवीं तां विचिन्तयेत्।।

24. श्रीवैष्णवी ध्यानम् ॥

वैष्णवी तार्क्ष्यगा श्यामा षड्भुजा वनमालिनी ।
वरदा गादिनी दक्षे बिभ्रती च करेंबुजम् ॥
शङ्ख चक्राभयो वामे साचेयं विलसत्भुजा ।
हेमाम्बरधरा लक्ष्मी सर्वसौभाग्यदायिनी।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

25. श्रीमङ्गला ध्यानम्-धनदा-मङ्गलप्रदा)

हेमाभां करुणा भिपूर्ण नयनां माणिक्य भूषोज्वलां-
द्वात्रिंशत् दल षोडशाष्ट दलयुक् पद्मस्थितां सुस्मिताम् ।
भक्तानां धनदां वरंच दधतीं वामेन हस्तेन तत् -
दक्षे णाभय मातुलिङ्ग सुफलं श्रीमङ्गलां भावये ॥

26. श्रीदेवी ध्यानम् ॥ (द्विभुजा-विष्णुपार्श्वस्था)

हरे स्समीपे कर्तव्या लक्ष्मीतु द्विभुजा नृप।
दिव्यरूपा अंबुजकरा सर्वाभरण भूषिता ॥

27. गजलक्ष्मी ध्यानम् (चतुर्भुजा विनायकवदासीना)

लक्ष्मी शुक्लांबरा देवी रूपेणा प्रतिमा भुवि ।
पृथक् चतुर्भुजा कार्या देवी सिह्मासने शुभा ॥ 1

सिह्मासनेऽस्याः कर्तव्यं कमलं चारु कर्णिकम् ।
अष्टपत्रं महाभागा कर्णिकायां सुसंस्थिता ॥ 2

विनायक वदासीना देवी कार्या चतुर्भुजा ।
बृहन्नालं करे कार्यं तस्याश्च कमलं शुभम् ॥ 3

दक्षिणे यादवश्रेष्ठ केयूर प्रान्त संस्थितम् ।
वामे अमृतघटः कार्यः तथा राज न्मनोहरः ॥ 4

तस्या अन्यौ करौ कार्यौ बिल्व शङ्ख धरौ द्विज ।
आवर्जितकरं कार्यं तत्पृष्ठे कुञ्जर द्वयम् ॥ 5

देव्याश्च मस्तके कार्यं पद्मं चापि मनोहरम् ॥ 6 (पाञ्चरात्रे)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

28. श्री देवी ध्यानम् ॥ (मयूखे) ॥

पाशाक्ष मालिकां भोज सृणिभि र्याम्य सौम्ययोः।
पद्मासनस्थां कुर्वीत श्रियं त्रैलोक्य मातरम् ॥

29. महालक्ष्मी ध्यानम्

कोल्लापुरं विना ऽन्यत्र महालक्ष्मी र्यदोच्यते ॥
लक्ष्मीवत् सा तदा कार्या सर्वाभरण भूषिता ॥
दक्षिणाधः करे पात्रं ऊर्द्धे कौमोदकीं ततः ॥
वामोर्द्धे खेटकं चैव श्रीफलं तदधः करे ॥
बिभ्रती मस्तके लिङ्गं पूजनीया विभूतये ॥
(नृसिह्मप्रासादे-विश्वकर्मणोक्तम्)

30. श्रीवत्सलक्ष्मी ध्यानम् (माधवी ध्यानम्)

पद्मस्था पद्मनेत्रा कमलयुग वरा (अ)भीतियुक् दोस्सरोजा-
देहोत्साभिः प्रभाभिः त्रिभुवन मखिलं भासुरा भासयन्ती।
मुक्ताहारा भिरामो न्नत कुच कलशा रत्न मञ्जीर काञ्ची-
विष्णो श्रींवत्स वासा मणिवर मकुटा भाग्यदा माधवी मे ॥

31. नारायणी ध्यानम्

राजीव नेत्रत्रय सुन्दराङ्गीं-
शङ्खं च चक्राऽभय पद्महस्ताम्।
पद्मासनस्थां च त्रिशक्तिरुपां -
नारायणीं तां हृदि भावयामि।।

32. विष्णुकान्ताश्रीध्यानम्

धवल कमल संस्थां हेमवर्णां वराङ्गीं-
कनक मकुट काञ्चीं क्षौमवस्त्रां सुभूष्याम् ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अभय वरद हस्तां हैम पद्म द्वयाढ्यां-
निखिल विबुध वन्द्यां विष्णुकान्तां नमामि ॥

33. प्रसन्नलक्ष्मी पत्यायुता ध्यानम् (अथर्वण रहस्योक्तम्)

वन्दे लक्ष्मीं परशिवमयीं शुद्धजांबून दाभां-
तेजोरूपां कनक वदनां सर्वभूषोज्वलाङ्गीम् ।
बीजापूरं कनक कलशं हेमपद्मं दधानां-
आद्यां शक्तिं सकल जननीं विष्णुवामाङ्क संस्थाम् ॥

34. नारायणी ध्यानम् (द्विभुजाश्रीः) ॥

तप्त काञ्चन संकाशां द्विभुजां लोल लोचनाम् ।
कटाक्ष विशिखो द्दीप्तां अञ्जनाञ्चित लोचनाम् ॥
शुक्लांबर परीधानां सिन्दूर तिलकोज्वलाम् ।
शुक्लपद्मासन गतां ध्याये न्नारायण प्रियाम् ॥

35. विष्ण्वंशी (वैष्णवी) ध्यानम् (कोष्ठस्थाश्रीः)

शङ्खं चक्रधरां वराभयकरां पीताम्बरा लङ्कृतां -
माणिक्याादि किरीटरत्नमकुटां श्यामां शुकाभप्रभाम्।
केयूराभरणैरलङ्कृतवतीं ब्राह्मादिसेव्यां परां -
वैष्णवी मतिशोभनां रजगुणे पद्मासने संस्थिताम्।।

36. पद्मा ध्यानम् ॥

पद्मा पद्मासना सीना पद्माभा पद्म वासिनी ।
हेम रत्नोज्वल न्नक्र कुण्डलं कर्णमण्डनम् ॥ 1

चन्द्रबिंबाऽमल मुखी कर्णपूर युतेक्षणा ।
स यौवना सुरम्याङ्गी कुञ्चितभ्रू सुविभ्रमा ॥ 2

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रक्तोष्ठी पीनगण्डा च कञ्चुकाच्छादित स्तनी ।
शिरसो मण्डनं शङ्खं चक्रसीमन्त पद्मकम् ॥ 3

नागहस्त समौ बाहू केयूर कटकोज्वलौ ।
पङ्कजं श्रीफलं वामे दक्षिणे बिभ्रती परा ॥ 4

शोभनांबर संपन्ना विपुल श्रोणिका तथा ।
मेखला कटि सूत्रांका लक्ष्मी र्लक्ष्मी विवर्धिनी ॥ 5(पाञ्चरात्रे)

37. महालक्ष्मी प्रणतिः

विश्वरूपस्य भार्यासि पद्मे पद्मालये शुभे ।
सर्वतः पाहिमां देवि महालक्ष्मी नमोऽस्तुते ॥ 1

महालक्ष्मि नमस्तेऽस्तु महामाया स्वरूपिणि ।
जगत्पूज्ये जगद्वन्द्ये महालक्ष्मि नमोऽस्तुते ॥ 2

38. आदिलक्ष्मी ध्यानम्॥

बीजापूर फलं गदा मपि करैः पात्रं तथा खेटकं -
बिभ्राणां नवरत्न शोभि मकुटं पीतांबरा लङ्कृताम्।
तप्त स्वर्ण समान कान्ति रुचिरां सौवर्ण भूषोज्वलां -
नागा द्यङ्कित शीर्षकांसकवरा माद्यश्रियं चिन्तये ॥

39. सन्तानलक्ष्मी ध्यानम्॥

गाङ्गेय प्रतिमे शिशौ सकरुणां विन्यस्त वीक्षणां शुभां -
रत्नैःपाणि सरोरुहै स्सुकलशं खड्गं शिशुं चाभयम्।
बिभ्राणां नव मौक्तिका भरणसं राजत्कलां दीपिकां -
शक्तिभ्यां उपसेवितां अनुदिनं सन्तानलक्ष्मीं भजे ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

40. कीर्तिलक्ष्मी ध्यानम्॥

पद्मस्था पद्मनेत्रा कमलयुग वराऽभीतियुग्मा सरोजा -
देहोत्थाभिः प्रभाभिः त्रिभुवन मखिलं भासुरा भासयन्ती।
मुक्ताहारा भिरामो न्नतकुच कलशा रत्न मञ्जीर काञ्ची -
ग्रैवेयो र्म्यङ्गदाढ्या धृत मणि मकुटा श्रेयसे श्री भवेद् वः ॥

41. विद्यालक्ष्मी ध्यानम्॥

अंबोजं जप मालिकां कर तलैः कीरं तथा पुस्तकं -
बिभ्राणां धवळांशुका वृततनुं ज्ञानप्रदा मीश्वरीम्।
सौम्यां पूर्ण सुधाकराभ वदनां रक्तारविन्द स्थितां -
सर्वै स्संस्तुत पादपद्म युगळां विद्याख्य लक्ष्मीं भजे ॥

42. धनलक्ष्मी ध्यानम्॥

कुंभं चक्र शरौ करण्ड धनुषि शङ्खाऽभये पङ्कजं
बिभ्राणां करपल्लवै स्सुरुचिरां सन्तप्त हेमद्युतिम्।
सर्वै राभरणै र्विभूषित तनुं राज त्किरीटां सदा
मान्यां देववरैः धनश्रिय महं वन्दे ऽरविन्द स्थिताम् ॥

43. धान्यलक्ष्मी ध्यानम्॥

राका चन्द्र समान कान्ति मभितः शाल्यादि सस्यै श्शुभैः-
संवीतं कदळीद्रुमै स्सरसिजैः बिभ्राजमानां मुहुः ।
सौवर्णा भरणोज्वलां करतलैः इक्षुं तथा पङ्कजं -
बिभ्राणां वरदाऽभये शुभकरीं धान्यश्रियं नौम्यहम्॥

44. मेधालक्ष्मी ध्यानम्॥

अरुण कमल संस्था तद्रजः पुञ्जवर्णा-
करकमल धृतेष्टा भीति युग्मांबुजा सा।
मणि मकुट विचित्रा ऽलङ्कृता कल्पजातैः -
भवतु भुवन माता सन्ततं श्रीः श्रियै नमः॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

45. गजलक्ष्मी ध्यानम्॥

कान्त्या काञ्चन सन्निभां हिमगिरि प्रख्यै श्चतुर्भि र्गजैः-
हस्तो त्क्षिप्त हिरण्मया मृतघटै रासिच्यमानां श्रियम्।
नाना रत्न ममुज्वलां करलसत् पद्मां किरीटोज्वलां -
क्षौमा बद्ध नितंब बिंब लसितां वन्दे ऽरविन्द स्थिताम्॥

46. कमलात्मिका ध्यानम् (कमला सनाश्रीः)

धृताम्बुजां श्रीफल हस्त युग्मां -
पीतां द्वि नेत्रान्वित वक्त्र शोभाम्।
पार्श्व द्वये हस्तियुतां सुवेषां -
भजामि लक्ष्मीं कमलासनस्थाम्।। (शैवागमे)

47. वीरलक्ष्मी ध्यानम्॥ (सिंहारूढाश्रीः)

तप्तस्वर्ण निभाङ्ग कान्ति ममलां शङ्खं धनु श्चक्रकं-
बिभ्राणं वरदाभये करतलै श्शूलं कपालं शरान्।
वीर्याढ्यै र्विनुतां भटै स्तु समरे भक्त्या किरीटान्वितैः -
सिंह्म स्कन्धगतां नृपेन्द्र विनुतां श्री वीरलक्ष्मीं भजे॥

48. विजयलक्ष्मी ध्यानम्॥ (सिंहासनस्था)

खड्गं खेट वराभयाङ्कुश चलत् पाशान् वहन्तं करैः-
शङ्खं चक्र अतीव कोमळ तनुं रक्ताङ्ग रागोज्वलाम्।
इन्द्राद्यै र्दिविषद्गणैः अभिनुतां भूपाऽभि वन्द्यां सदा -
वन्देऽहं विजयां जयप्रद दृशां सिंह्मासना ध्यासिनीम्॥

49. सौभाग्यलक्ष्मी ध्यानम्॥

अंबोजे च वराऽभये करतलैः संबिभ्रतीं पूजितां-
हस्ताभ्यां अरुणाम्बुजाभ नयनां श्वेतांबरा लङ्कृताम्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भक्तानां सुख जीवनं शुभमतिं आयुश्च दीर्घं यशः -
दातुं चापि कृतादरां शुभकरीं सौभाग्यलक्ष्मीं भजे॥

50. आरोग्यलक्ष्मी ध्यानम्॥ (पद्मकराश्री:)

वन्दे पद्मकरां प्रसन्न वदनां सौभाग्यदां भाग्यदां-
हस्ताभ्यां अभयप्रदां मणिगणै र्नानाविधै र्भूषिताम्।
भक्ताभीष्ट फलप्रदां हरिहर ब्रह्मादिभि स्सेवितां -
पार्श्वे पङ्कज शङ्ख पद्म निधिभि र्युक्तां सदा शक्तिभिः॥

51. वैष्णवीमाताध्यानम्।

चतुर्भुजां मेकमुखीं द्विनेत्रां-
वराभयौ शङ्खमतुल्य चक्रम्।
श्यामां दधानां गरुडासनस्थां -
तां वैष्णवीं शक्तिमहं भजामि।।

52. हरिणीध्यानम् (विष्णुवामस्था भूमिदेवी ध्यानम)

अदक्षिणकरस्फुरत् कुवलयां शुकश्यामळां-
तदेतर कराम्बुजां किमपि वीक्ष्यमाणां हरिम्।
असव्य मवकुञ्चितं चरणमादधानां पदं-
तदन्यदपि सुस्थितं हृदि भजे हरिण्याह्वयाम्।।

53. सिद्धिलक्ष्मी ध्यानम्॥

अभय वरद हस्तां अब्जयुग्मां दधानां-
सरस कमल वासां रत्न ताटङ्क भूष्याम्।
अरुण सदृश वर्णां अच्युत प्राणनाथां -
सकल विबुध वन्द्यां सिद्धिलक्ष्मीं नमामि॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

54. सौन्दर्यलक्ष्मी ध्यानम्॥ (चारुश्री)

सिन्दूरा रत्नकान्तिः सरसिज वसतिः चारु लावण्य भूमिः-
हस्ताब्जे रत्न पात्रं सरसिज युगळं दर्पणं संवहन्ती।
दासीनि स्वाभि प्रीता मणिमय मकुटा भार सत्कुण्डलाढ्या -
काञ्ची प्रोद्यन्नितम्बाऽङ्गद लसित भुजा श्रेयसे सौन्दर्य लक्ष्मी॥

55. साम्राज्यलक्ष्मी ध्यानम्॥

अम्बोजे वरदाभये करतलै स्संबिभ्रती मिष्टदां-
हस्ताभ्यां सुवर्ण कुंभ युगळां आप्लाव्यमानां मुहुः।
चञ्चच्चामर धारिणीभि रमर स्त्रीभि स्सुखं सेवितां -
साम्राज्य प्रद वीक्षणां हृदि सदा श्री राजलक्ष्मीं भजे॥

56. गोलक्ष्मी ध्यानम् ॥ (सुरभिश्रीः धेनुलक्ष्मी)

गोलक्ष्मीं परदेवतां श्रुतिमयीं देवात्मिकां प्रेयसीं -
स्वक्षीरेण जगत्रयं अवनुतां धर्मादि संरक्षणीम्।
श्री रुद्रादि महिम्न मन्त्र विभवै श्शंभो स्तवाराधनं -
गव्ये नैव समस्त जीव सुखदां धेन्वाख्य लक्ष्मीं भजे॥

57. द्वारलक्ष्मी ध्यानम्

द्वारस्य सम्मुखी श्यामां पुष्परत्नघ वर्षिणीम्।
ध्यात्वाऽवाह्य यजेद् धीमान् स्मरेन्मण्डपरूपिणीम्।।

58. ऐश्वर्यलक्ष्मी ध्यानम् ॥ (भूतिलक्ष्मीः)

मुक्ताभां दिव्यवस्त्रां मृगमद तिलकां फुल्ल कल्हारमालां-
केयूरै मेखलाद्यै र्नवमणि खचितै र्भूषितै र्भासमानाम्।
कर्पूरा मोदवक्त्रां अपरिमित कृपा पूर्णनेत्रारविन्दां -
श्रीलक्ष्मीं पद्महस्तां जितपति हृदयां विश्वभूतिं नमामि॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

59. कमलासना ध्यानम्

वराङ्कुशो पाशमभीतिमुद्रां
करैर्वहन्तीं कमलासनस्थाम्।
बालार्ककोटिद्युतिभां त्रिनेत्रां
भजेऽहमाद्यां जगदीश्वरीं ताम्॥

60. हरिसव्यथा श्रीदेवी ध्यानम् (द्विभुजातिष्ठन्ती)

विष्णोर्दक्षिणतः प्रवाळरुचिरां देवीं श्रियं भावयेत्।
किञ्चित्कुञ्चित वामपादकमलां सुस्थापितान्याङ्घ्रिकाम्।
पद्मं दक्षिणपाणिना च दधतीं वामं प्रसार्य स्थितां -
पाणिं वल्लभ मादरेण किमपि व्यालोकमानां दृशा।।

61. मता महालक्ष्मी ध्यानम्

फुल्लाम्भोजाधिवासां परिकलित वराभीति वामान्यहस्तां -
पद्म द्वन्दा भिरामो भयकरकमलां फाल्गुने चोत्तराजाम्।
मौळिस्फूर्जत्करण्डाकृति मणिमकुटां पद्मकिञ्जल्कवर्णां
तादृक् चेलाभिरामां श्रियमिह कलये स्वर्णताटङ्कभूषाम्।।

62. श्रियः षडङ्गदेवीनां समष्टिध्यानम् ॥

हृदयदेवी शिरोदेवी शिखादेवी तथैव च ॥
वर्मदेवी दृष्टिदेवी ह्यस्त्रदेवी षडीरिताः ॥
नवलावण्य पूर्णाङ्ग्यः सावधान धृतायुधाः ॥
परितो बिन्दु पीठं च भ्राम्यन्त्यो दीप्तमूर्तयः ॥

63. विष्णुपरिवार अष्ट शक्तीनां ध्यानम् ॥

स्वर्णनिभ शोभा श्रीः स्यात् सा भू रर्जुन च्छविः ।
सरस्वती सिता रक्ता प्रीतिः श्याम निभा कृतिः ॥
कीर्तिः रक्ता भवेत् शान्तिः स्फटिकाभा समीरिता ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पुष्टिः पीता भवेत् तुष्टिः श्यामा देव्यस्तु ताः स्स्मृताः।।
पद्म द्वय करा श्चैव वराऽभय करा स्तु ताः ॥

64. लक्ष्मीस्तुतिः ॥

लक्ष्म्यै नमोऽस्तु शुभलक्षण लक्षितायै
सिद्ध्यै नमोऽस्तु सुरसिद्ध पूजितायै।
धृत्यै नमोऽस्तु मम दुर्गति भञ्जनायै
गत्यै नमोऽस्तु वर सद्गति दायकायै॥

65. महाश्रीस्तुतिः ॥

समस्त संपत्सुखदां महाश्रियं
समस्त कल्याणकरीं महाश्रियम्।
समस्त सौभाग्यकरीं महाश्रियं
भजाम्यहं ज्ञानकरीं महाश्रियम्॥

66. महालक्ष्मीस्तुतिः ॥

विज्ञान संपत्सुखदां महाश्रियं
विचित्र वाग्भूतिकरीं महाश्रियम्।
आनन्द सौभाग्यसुख प्रदायिनीं
भजाम्यहं भूतिकरीं हरिप्रियाम्॥

67. लक्ष्म्याः अष्टमङ्गलानि

दर्पणं रत्नकुम्भं च कमलं युग्मचामरम्।
छत्रं च स्वस्तिकं शङ्खं दीपं चैवाष्टमङ्गलम्।।

(अन्यत)

छत्रं च रत्नकुम्भं च स्वस्तिकं कमलं तथा।
कार्मुकं शङ्खचक्रं च खट्वाङ्गं चाष्टमङ्गलम्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

68. चक्रकरालक्ष्मी।

नमश्शङ्ख चक्राभयाभीष्ट हस्ते -
नमस्तेऽम्बिके गौरि पद्मासनस्थे।
नमस्तस्वर्णे प्रसन्ने शरण्ये-
नमस्ते महालक्ष्मि कोलापुरेशि।।

69. दशदिग्पतिशक्तय:

शची स्वाहा कालकण्ठी दाहिनी भोगिनी तथा।
घोरा गम्भीरिणी हर्षा सावित्री च श्रिय: स्मृता:।।

70. श्रीस्तुति:

ईशानां जगतोऽस्य वेङ्कटपते विष्णो: परां प्रेयसीं -
तद्वक्षस्थल नित्यवासरसिकां तद् क्षान्ति संवर्धनीम्।
पद्मालङ्कृत पाणिपल्लवयुगां पद्मासनस्थां श्रियं -
वात्सलयादि गुणोज्वलां भगवतीं वन्दे जगन्मातरम्।।

71. प्रार्थना

पद्मप्रिये पद्मिनि पद्महस्ते
पद्मानने पद्मदलायताक्षि।
विश्वप्रिये विष्णुमनोऽनुकूले
त्वत्पादपद्मं मयि सन्निधत्स्व॥

सरसिजनिलये सरोजहस्ते
धवलतरांशुक गन्धमाल्य शोभे।
भगवतिहरिवल्लभे मनोज्ञे
त्रिभुवन भूतिकरि प्रसीदमह्यम्॥

या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गंभीरावर्तनाभि स्तनभरनमिता शुभ्रवस्त्रोत्तरीया।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मीर्दिव्यै र्गजेन्द्रैः मणिगण खचितैः स्नापिता हेमकुंभैः -
नित्यं सा पद्महस्ता मम वसतु गृहे सर्व माङ्गल्य युक्ता ॥

सिद्धलक्ष्मी र्मोक्षलक्ष्मी र्जयलक्ष्मी सरस्वती।
श्रीलक्ष्मी र्वरलक्ष्मीश्च प्रसन्ना वरदास्तुमे॥

लक्ष्मीं क्षीर समुद्रराज तनयां श्रीरङ्गधामेश्वरीं -
दासीभूत समस्त देव वनितां लोकैक दीपाङ्कुराम्।
श्रीमन्मन्द कटाक्षलब्ध विभव ब्रह्मेन्द्र गङ्गाधरां
तां त्रैलोक्य कुटुबिनीं सरसिजां वन्दे मुकुन्द प्रियाम्॥

लक्ष्मीवरप्रार्थना॥

आयुरारोग्य मैश्वर्यं पुत्रपौत्रादिकं वरान्।
शत्रुक्षयं महालक्ष्मि यच्छ मे सर्वसंपदः॥

लक्ष्मी आशीर्वादश्लोकः (श्रीपूजाफलदान पद्यम्)

वक्त्राब्जे भाग्यलक्ष्मी करतल कमले सर्वदा दानलक्ष्मी
दोर्दण्डे वीरलक्ष्मी हृदय सरसिजे पूर्णकारुण्यलक्ष्मी।
सर्वाङ्गे सौम्यलक्ष्मी सरस गुणगणा डंबरे कीर्तिलक्ष्मी
जिह्वाग्रे सत्यलक्ष्मी भवतु तव सदा सर्व साम्राज्यलक्ष्मी ॥

रूपं देहि जयं देहि यशो देहि द्विषो जहि।
देहि सौभाग्य मारोग्यं धन धान्यं प्रयच्छ मे।।

सिद्धलक्ष्मी मोक्षलक्ष्मी जयलक्ष्मी सरस्वती।
वसुलक्ष्मी वरलक्ष्मी च प्रसन्ना वरदाऽस्तु मे।।

शङ्ख चक्रगदा शार्ङ्ग गृहीत परमायुधे।
प्रसीद वैष्णवीरूपे नारायणि नमोऽस्तु ते।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विष्णुशक्तीनां वर्णस्थिति विवरणम्
(मातृकान्यासमूलकारिका)

जीवानां देहबद्धानां तत्तत् सन्मार्गदर्शिका ।
मातृका जायते सेयं विष्णु शक्त्युपबृंहिता ॥ 1

विष्णुवत् तत्र पञ्चाशत् शक्तयः परिकीर्तितः।
अधितिष्ठन्ति ये यां च मातृकां वर्णमालिनीम् ।
वासुदेवादयो व्यूहाः दशद्वौ केशवादयः॥ 2

स्वराधिष्ठायिनो देवाः शक्तीस्तेषा मिमाःश्रृणु ।
मदंशकाः इमाः देव्यः विज्ञेयाः कादिशक्तयः॥ 3

भवोपकरणैश्चेयं मातृकाऽधिष्ठिताःसुरैः।
यथा हि क्षधिताः बालाः मातरं पर्युपासते ॥ 4

एवं सर्वे सुराः देवीं मातृकां पर्युपासते।
इयं योनि र्हि मन्त्राणां विद्यानां जन्मभूरियम् ॥ 5

तत्वानां तात्विकानां च ज्ञानानां प्रसवस्थली।
काद्यधिष्ठायिनो देवाः गदन्त्या मे निशामय ॥ 6

पद्मनाभादि नामानो विष्णवः कादि देवताः।
न्यस्तव्या मातृका स्सर्वाः बहि रन्तश्च वै सदा ॥ 7

(लक्ष्मीतन्त्रे-20)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्मी न्यासप्रयोगः ॥

1. परम व्यूह्यशक्ति न्यासः

ओं ऐं ह्रीं श्रीं क्लीं - महाविष्णुपत्न्यै महालक्ष्म्यै नमः - मूर्ध्नि

ओं ऐं ह्रीं श्रीं क्लीं वासुदेवपत्न्यै लक्ष्म्यै नमः मुखे

ओं ऐं ह्रीं श्रीं क्लीं सङ्कर्षणपत्न्यै कीर्त्यै नमः हृदये

ओं ऐं ह्रीं श्रीं क्लीं प्रद्युंनपत्न्यै जयायै नमः नाभौ

ओं ऐं ह्रीं श्रीं क्लीं अनिरुद्धपत्न्यै मायायै नमः गुह्ये

(इति परम व्यूह्यशक्ति न्यासः)

2. पञ्चकलाध्व न्यासः

ओं ऐं ह्रीं श्रीं क्लीं हौं शान्त्यतीतकलायै नमः मूर्ध्नि

ओं ऐं ह्रीं श्रीं क्लीं ह्यैं शान्तिकलायै नमः वक्त्रे

ओं ऐं ह्रीं श्रीं क्लीं हूं विद्याकलायै नमः हृदये

ओं ऐं ह्रीं श्रीं क्लीं ह्रीं प्रतिष्ठाकलायै नमः नाभौ

ओं ऐं ह्रीं श्रीं क्लीं ह्लां निवृत्तिकलायै नमः पादयोः

(इति पञ्चाध्व गर्भ पञ्चकलान्यासः)

3. परानन्द व्यूहशक्ति न्यासः

ओं ऐं ह्रीं श्रीं क्लीं मं महालक्ष्म्यै नमः मूर्ध्नि

ओं ऐं ह्रीं श्रीं क्लीं लं लक्ष्म्यै नमः वक्त्रे

ओं ऐं ह्रीं श्रीं क्लीं कीं कीर्त्यै नमः हृदये

ओं ऐं ह्रीं श्रीं क्लीं जां जयायै नमः नाभौ

ओं ऐं ह्रीं श्रीं क्लीं मां मायायै नमः गुह्ये

(इति परमानन्द व्यूहशक्तिन्यासः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

4. व्यूहान्तर श्री-हरि न्यासः

1. ओं ऐं ह्रीं श्रीं क्लीं केशवपत्न्यै श्रियै नमः - मूर्ध्नि
2. ओं ऐं ह्रीं श्रीं क्लीं नारायणपत्न्यै वागीश्वर्यै नमः - मूखे
3. ओं ऐं ह्रीं श्रीं क्लीं माधवपत्न्यै कान्त्यै नमः - हृदये
4. ओं ऐं ह्रीं श्रीं क्लीं गोविन्दपत्न्यै क्रियायै नमः - गुह्ये
5. ओं ऐं ह्रीं श्रीं क्लीं विष्णुपत्न्यै शान्त्यै नमः - पादयोः
6. ओं ऐं ह्रीं श्रीं क्लीं मधुसूदनपत्न्यै विभूत्यै नमः - हृदये
7. ओं ऐं ह्रीं श्रीं क्लीं त्रिविक्रमपत्न्यै इच्छायै नमः - शिरसि
8. ओं ऐं ह्रीं श्रीं क्लीं वामनपत्न्यै प्रीत्यै नमः - कचाग्रे
9. ओं ऐं ह्रीं श्रीं क्लीं श्रीधरपत्न्यै रत्यै नमः - वक्षसि
10. ओं ऐं ह्रीं श्रीं क्लीं हृषीकेशपत्न्यै मायायै नमः - नेत्रयोः
11. ओं ऐं ह्रीं श्रीं क्लीं पद्मनाभपत्न्यै बुद्ध्यै नमः कुक्षौ - ज्ञान्यै
12. ओं ऐं ह्रीं श्रीं क्लीं दामोदरपत्न्यै महिमायै नमः - सर्वाङ्गे

(इति द्वादश व्यूहान्त रमूर्तिपत्निन्यासः)

5. देहचक्र अन्तर्मातृका न्यासः (सप्तस्थानेषु)

1. ओं वं शं षं सं चर्तुर्दल पद्मस्थायै श्रियै नमः मूलाधारे- मूले
2. ओं बं भं मं यं रं लं षट् दलपद्मस्थायै श्रियै नमः स्वाधिष्ठने- गुह्ये
3. ओं डं ढं णं तं थं दं धं नं पं फं दशदलपद्मस्थायै श्रियै नमः
   - मणिपूरके- नाभौ
4. ओं कं खं गं घं ङं चं छं जं झं ञं टं ठं द्वादशदलपद्मस्थायै
   श्रियै नमः अनाहते- हृदये

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

5. ओं अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः षोडशदल पद्मस्थायै श्रियै नमः - विशुद्धौ- तालुमूले

6. ओं हं ळं द्विदल पद्मस्थायै श्रियै नमः - आज्ञायां भ्रुवोर्मध्ये

7. ओं सर्ववर्णात्मक सहस्रदल पद्म निवासिन्यै श्रियै नमः - ब्रह्मरन्ध्रे- जालन्धरे

इति अन्तर्मातृकान्यासः

6. बहिर्मातृकान्यासः (बेरे/ देहे / विग्रहे च)

	मातृकाः	न्यास स्थाननि
1.	ओं अं नमः	शिरसि
2.	ओं आं नमः	मुख मण्डले
3.	ओं इं नमः	दक्षिण चक्षुषि
4.	ओं ईं नमः	वाम चक्षुषि
5.	ओं उं नमः	दक्षिण कर्णे
6.	ओं ऊं नमः	वाम कर्णे
7.	ओं ऋं नमः	दक्षिण कपोले
8.	ओं ॠं नमः	वाम कपोले
9.	ओं लृं नमः	दक्षिण नासापुटे
10.	ओं ॡं नमः	वाम नासापुटे
11.	ओं एं नमः	ऊर्ध्वोष्टे
12.	ओं ऐं नमः	अधरोष्टे
13.	ओं ओं नमः	ऊर्द्ध दन्तपङ्क्तौ
14.	ओं औं नमः	अधो दन्तपङ्क्तौ

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मातृका:	न्यासस्थाननि
15. ओं अं नमः	जिह्वायाम्
16. ओं अः नमः	तालुरन्ध्रे
17. ओं कं नमः	दक्षिण बाहौ
18. ओं खं नमः	दक्षिण कूर्परे
19. ओं गं नमः	दक्षिण मणिबन्धे
20. ओं घं नमः	दक्षिण हस्ततले
21. ओं ङं नमः	दक्षिणहस्त तलाङ्गुल्यग्रे
22. ओं चं नमः	वाम बाहौ
23. ओं छं नमः	वाम कूर्परे
24. ओं जं नमः	वाम मणिबन्धे
25. ओं झं नमः	वाम हस्ततले
26. ओं ञं नमः	वामहस्ततलाङ्गुल्यग्रे
27. ओं टं नमः	दक्षिण ऊरुमूले
28. ओं ठं नमः	दक्षिण जानुनि
29. ओं डं नमः	दक्षिण जङ्घायाम्
30. ओं ढं नमः	दक्षिण पादतले
31. ओं णं नमः	दक्षिणपाद तलाङ्गुल्यग्रे
32. ओं तं नमः	वाम ऊरुमूले
33. ओं थं नमः	वाम जानुनि
34. ओं दं नमः	वाम जङघायाम्
35. ओं धं नमः	वाम पादतले

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मातृका:	न्यासस्थाननि
36. ओं नं नमः	वामपाद तलाङ्गुल्यग्रे
37. ओं पं नमः	दक्षिण पार्श्वे
38. ओं फं नमः	वाम पार्श्वे
39. ओं बं नमः	पृष्ठे
40. ओं भं नमः	नाभौ
41. ओं मं नमः	जठरे
42. ओं यं नमः	हृदये
43. ओं रं नमः	दक्षिणांसे
44. ओं लं नमः	वामांसे
45. ओं वं नमः	कण्ठे
46. ओं शं नमः	दक्षिण कक्षे
47. ओं षं नमः	वाम कक्षे
48. ओं सं नमः	दक्षिण पाणिपादान्ते ।
49. ओं हं नमः	वाम पाणि पादान्ते ।
50. ओं ळं नमः	हृदयादि मूर्धान्ते ।
51. ओं क्षं नमः	मूर्धादि पादान्ते ।

(इति एकपञ्चाशत् बहिर्मातृकान्यासः)

7. लोकमातर शक्ति न्यास:

1.	ओं श्रीं ह्रीं क्लीं	ब्रह्माण्यै नमः	मूर्ध्नि
2.	ओं श्रीं ह्रीं क्लीं	माहेश्वर्यै नमः	ललाटे
3.	ओं श्रीं ह्रीं क्लीं	कौमार्यै नमः	आस्ये

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

4.	ओं श्रीं ह्रीं क्लीं	वैष्णव्यै नमः	वक्षसि (स्तनयोः)
5.	ओं श्रीं ह्रीं क्लीं	वाराह्यै नमः	नाभौ
6.	ओं श्रीं ह्रीं क्लीं	इन्द्राण्यै नमः	पादयोः
7.	ओं श्रीं ह्रीं क्लीं	चामुण्डायै नमः	दक्षिणहस्ते
8.	ओं श्रीं ह्रीं क्लीं	दुर्गायै नमः	वामहस्ते
9.	ओं श्रीं ह्रीं क्लीं	महालक्ष्म्यै नमः	सर्वाङ्गे

(इति लोकमातृन्यासः)

8. केशवादि मूर्तिशक्ति न्यासः

1.	ओं	श्रीं ह्रीं क्लीं	केशव	कीर्तिभ्यां नमः	कचान्ते
2.	ओं	श्रीं ह्रीं क्लीं	नारायण	कान्तिभ्यां नमः	ललाटे
3.	ओं	श्रीं ह्रीं क्लीं	माधव	तुष्टिभ्यां नमः	वामचक्षुषि
4.	ओं	श्रीं ह्रीं क्लीं	गोविन्द	पुष्टिभ्यां नमः	दक्षिणचक्षुषि
5.	ओं	श्रीं ह्रीं क्लीं	विष्णु	धृतिभ्यां नमः	वामकर्णे
6.	ओं	श्रीं ह्रीं क्लीं	मधुसूदन	शान्तिभ्यां नमः	दक्षिणकर्णे
7.	ओं	श्रीं ह्रीं क्लीं	त्रिविक्रम	क्रियाभ्यां नमः	दक्षिणनासापुटे
8.	ओं	श्रीं ह्रीं क्लीं	वामन	दयाभ्यां नमः	वामनासापुटे
9.	ओं	श्रीं ह्रीं क्लीं	श्रीधर	मेधाभ्यां नमः	दक्षिणगण्डे
10.	ओं	श्रीं ह्रीं क्लीं	हृषीकेश	हर्षाभ्यां नमः	वामगण्डे
11.	ओं	श्रीं ह्रीं क्लीं	पद्मनाभ	श्रद्धाभ्यां नमः	ऊर्ध्वोष्ठे
12.	ओं	श्रीं ह्रीं क्लीं	दामोदर	लज्जाभ्यां नमः	अधरोष्ठे

इति सशक्तिक द्वादश मूर्तिन्यासः । (यद्वा)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

9. द्वादश व्यूहान्तरमूर्तिन्यासः

1.	ओं	ऐं ह्रीं श्रीं	केशवाय	श्रियै नमः	मूर्ध्नि
2.	ओं	ऐं ह्रीं श्रीं	नारायणाय	धृत्यै नमः	ललाटे
3.	ओं	ऐं ह्रीं श्रीं	माधवाय	पोत्र्यै नमः	वामनेत्रे
4.	ओं	ऐं ह्रीं श्रीं	गोविन्दाय	प्रमोदायिन्यै नमः	दक्षिणनेत्रे
5.	ओं	ऐं ह्रीं श्रीं	विष्णवे	वैष्णव्यै नमः	वामश्रोत्रे
6.	ओं	ऐं ह्रीं श्रीं	मधुसूदनाय	वरारोहायै नमः	दक्षिणश्रोत्रे
7.	ओं	ऐं ह्रीं श्रीं	त्रिविक्रमाय	शार्ङ्गिण्यै नमः	वामनासिकायां
8.	ओं	ऐं ह्रीं श्रीं	वामनाय	देवदेविकायै नमः	दक्षिणनासिकायां
9.	ओं	ऐं ह्रीं श्रीं	श्रीधराय	सुदुसुन्दर्यै नमः	वामकपोले
10.	ओं	ऐं ह्रीं श्रीं	हृषीकेशाय	हरिण्यै नमः	दक्षिणकपोले
11.	ओं	ऐं ह्रीं श्रीं	पद्मनाभाय	महालक्ष्म्यै नमः	ऊर्ध्वोष्ठे
12.	ओं	ऐं ह्रीं श्रीं	दामोदराय	हरिवल्लभायै नमः	अधरोष्ठे

(इति व्यूहान्तर मूर्तिशक्तिस्यासः)

10. महालक्ष्मी मूलमन्त्राक्षर न्यासः (12 वर्णः)

ओं ऐं ह्रीं श्रीं ओं नमः — मूर्ध्नि
ओं ऐं ह्रीं श्रीं श्रीं नमः — शिरःपूर्वे
ओं ऐं ह्रीं श्रीं नं नमः — शिरोदक्षिणे
ओं ऐं ह्रीं श्रीं मों नमः — शिरःपश्चिमे
ओं ऐं ह्रीं श्रीं भं नमः — शिरोत्तरे
ओं ऐं ह्रीं श्रीं गं नमः — नेत्रयोः
ओं ऐं ह्रीं श्रीं वं नमः — आस्ये
ओं ऐं ह्रीं श्रीं त्यै नमः — हृदये
ओं ऐं ह्रीं श्रीं मं नमः — नाभौ

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं ऐं ह्रीं श्रीं ह्रां नमः गुह्ये
ओं ऐं ह्रीं श्रीं लं नमः जान्वोः
ओं ऐं ह्रीं श्रीं क्ष्म्यै नमः चरणयोः

(इति महालक्ष्मी द्वादशाक्षरी विद्या न्यासः)

11. जगन्माताश्रीमन्त्रा वर्णन्यासः (12 अर्णः)

ओं ऐं नमः मूर्ध्नि
ओं ह्रीं नमः मुखे
ओं श्रीं नमः हृदये
ओं क्लीं नमः गुह्ये
ओं सौं नमः पादयोः
ओं जं नमः त्वचि
ओं गत् नमः रुधिरे (रक्ते)
ओं प्रं नमः मांसे
ओं सूं नमः मेदसि
ओं त्यैं नमः अस्थिनि
ओं नं नमः मज्जायाम्
ओं मं नमः शुक्रे (द्वादशाक्षरी न्यासः)

12. जगन्माताश्री षडङ्गमन्त्रन्यासः

ओं ऐं – ज्ञानाय – हृदयदेव्यै नमः -हृदयें
ओं ह्रीं – ऐश्वर्याय - शिरोदेव्यै नमः - शिरसि
ओं श्रीं – शक्तये – शिखादेव्यै नमः - शिखायां (अलके)
ओं क्लीं – बलाय – कवचदेव्यै नमः - सर्वाङ्गे
ओं सौं – वीर्याय – नेत्रशदेव्यै नमः - नेत्रयोः
ओं सौं – जगत्प्रसूत्ये तेजसे - अस्त्रशक्त्यै नमः - हस्तेषु

(इति मन्त्राक्षीषडङ्गन्यासः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

13. महालक्ष्मी मूलमन्त्रपद न्यासः

ओं ऐं ह्रीं श्रीं ओं नमः	मूर्ध्नि
ओं ऐं ह्रीं श्रीं श्रीं नमः	ललाटे
ओं ऐं ह्रीं श्रीं ह्रीं नमः	भ्रूमध्ये
ओं ऐं ह्रीं श्रीं क्लीं नमः	आस्ये
ओं ऐं ह्रीं श्रीं मं नमः	चिबुके
ओं ऐं ह्रीं श्रीं महा नमः	गळे
ओं ऐं ह्रीं श्रीं लक्ष्मि नमः	उरसि (उरोजयोः)
ओं ऐं ह्रीं श्रीं एह्येहि नमः	हृदये
ओं ऐं ह्रीं श्रीं सर्व नमः	नाभौ
ओं ऐं ह्रीं श्रीं सौभाग्यं नमः	जठरे
ओं ऐं ह्रीं श्रीं देहि नमः	हस्तयोः
ओं ऐं ह्रीं श्रीं मे नमः	जान्वोः
ओं ऐं ह्रीं श्रीं स्वाहा नमः	चरणयोः

इति लक्ष्मी मूलमन्त्रपद न्यासः ।

14. लक्ष्मी गायत्रीमन्त्र न्यासः।

ओं ऐं ह्रीं श्रीं महादेव्यैच नमः	शिरसि
ओं ऐं ह्रीं श्रीं विद्महे नमः	मुखे
ओं ऐं ह्रीं श्रीं विष्णुपत्न्यै नमः	हृदये
ओं ऐं ह्रीं श्रीं धीमहि नमः	नाभौ
ओं ऐं ह्रीं श्रीं तन्नो नमः	ऊर्वोः
ओं ऐं ह्रीं श्रीं लक्ष्मी नमः	जान्वोः
ओं ऐं ह्रीं श्रीं प्रचोदयान् नमः	पादयोः

इति गायत्रीमन्त्रपद न्यासः ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

15. श्रीसूक्तनाममन्त्र न्यासः

ओं ऐं ह्रीं श्रीं	हिरण्यवर्णायै नमः	मूर्ध्नि (शिरसि / कचान्ते)
ओं ऐं ह्रीं श्रीं	हरिण्यै नमः	मुखे (ललाटे / निटिले)
ओं ऐं ह्रीं श्रीं	सुवर्णरजतस्त्रजायै नमः	दक्षिणनेत्रे
ओं ऐं ह्रीं श्रीं	चन्द्रायै नमः	वामनेत्रे
ओं ऐं ह्रीं श्रीं	हिरण्मय्यै नमः	दक्षिणकर्णे
ओं ऐं ह्रीं श्रीं	लक्ष्म्यै नमः	वामकर्णे
ओं ऐं ह्रीं श्रीं	अनपगामिन्यै नमः	दक्षिणनासापुटे
ओं ऐं ह्रीं श्रीं	रथ अश्वपूर्वायै नमः	वामनासापुटे
ओं ऐं ह्रीं श्रीं	रथमध्यायै नमः	दक्षिणगण्डे
ओं ऐं ह्रीं श्रीं	हस्तिनाद प्रबोधिन्यै नमः	वामगण्डे
ओं ऐं ह्रीं श्रीं	श्रियै नमः	ऊर्ध्वोष्ठे
ओं ऐं ह्रीं श्रीं	मायै नमः	अधरोष्ठे
ओं ऐं ह्रीं श्रीं	देव्यै नमः	ऊर्ध्वदन्तपङ्क्तौ
ओं ऐं ह्रीं श्रीं	कायै नमः	अधोदन्तपङ्क्तौ
ओं ऐं ह्रीं श्रीं	सोस्मितायै नमः	जिह्वाग्रे
ओं ऐं ह्रीं श्रीं	हिरण्यप्राकारायै नमः	कण्ठे (ग्रीवायां / गले)
ओं ऐं ह्रीं श्रीं	आर्द्रायै नमः	दक्षिणबाहुमूले
ओं ऐं ह्रीं श्रीं	ज्वलन्त्यै नमः	दक्षिणबाहुकूर्परे
ओं ऐं ह्रीं श्रीं	तृप्तायै नमः	दक्षिणबाहु मणिबन्धे
ओं ऐं ह्रीं श्रीं	तर्पयन्त्यै नमः	दक्षिण हस्ततले
ओं ऐं ह्रीं श्रीं	पद्मेस्थितायै नमः	दक्षिण हस्ततलाङ्गुल्यग्रे
ओं ऐं ह्रीं श्रीं	पद्मवर्णायै नमः	वामबाहुमूले

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं ऐं ह्रीं श्रीं चन्द्रायै नमः	वामबाहुकूर्परे
ओं ऐं ह्रीं श्रीं प्रभासायै नमः	वामबाहु मणिबन्धे
ओं ऐं ह्रीं श्रीं यशसाज्वलन्त्यै नमः	वाम हस्ततले
ओं ऐं ह्रीं श्रीं देवजुष्टायै नमः	वामहस्ततलाङ्गुल्यग्रे
ओं ऐं ह्रीं श्रीं उदारायै नमः	दक्षिणपाद ऊरूमूले
ओं ऐं ह्रीं श्रीं तायै नमः	दक्षिणपाद जानुनी
ओं ऐं ह्रीं श्रीं पद्मनेम्यै नमः	दक्षिणपादजङ्घायां
ओं ऐं ह्रीं श्रीं आदित्यवर्णायै नमः	दक्षिणपादाङ्गुलि मूले (पादतले)
ओं ऐं ह्रीं श्रीं कीर्त्यै नमः	दक्षिण पादाङ्गुलि अग्रे (पादाग्रे)
ओं ऐं ह्रीं श्रीं ऋद्ध्यै नमः	वामपादोरूमूले
ओं ऐं ह्रीं श्रीं गन्धद्वारायै नमः	वामपाद जानुनी
ओं ऐं ह्रीं श्रीं दुराधर्षायै नमः	वामपादजङ्घायां
ओं ऐं ह्रीं श्रीं नित्यपुष्टयै नमः	वामपादतले (अङ्गुलिमूले)
ओं ऐं ह्रीं श्रीं करीषिण्यै नमः	वामपादतलाग्रे (अङ्गुल्यग्रे)
ओं ऐं ह्रीं श्रीं सर्वभूतानामीश्वर्यै नमः	दक्षिणपार्श्वे
ओं ऐं ह्रीं श्रीं मनसःकामायै नमः	वामपार्श्वे
ओं ऐं ह्रीं श्रीं वाच आकूत्यै नमः	पृष्ठे
ओं ऐं ह्रीं श्रीं सत्याय नमः	नाभौ
ओं ऐं ह्रीं श्रीं पशूनांरूपाय नमः	उदरे
ओं ऐं ह्रीं श्रीं अन्नस्यमयिश्रियै नमः	हृदये
ओं ऐं ह्रीं श्रीं यशसे नमः	दक्षांसे
ओं ऐं ह्रीं श्रीं मात्रे नमः	वामांसे
ओं ऐं ह्रीं श्रीं पद्ममालिन्यै नमः	ककुदि

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं ऐं ह्रीं श्रीं	पुष्करिण्यै नमः	हृदयादि दक्षकराङ्गुल्यन्तं
ओं ऐं ह्रीं श्रीं	यष्ट्ये नमः	हृदयादि वामाकराङ्गुल्यन्तं
ओं ऐं ह्रीं श्रीं	पिङ्गलायै नमः	हृदयादि दक्षपादाङ्गुल्यन्तं
ओं ऐं ह्रीं श्रीं	तुष्ट्यै नमः	हृदयादि वामपादाङ्गुल्यन्तं
ओं ऐं ह्रीं श्रीं	सुवर्णायै नमः	कट्यादि पादाङ्गुल्यन्तं
ओं ऐं ह्रीं श्रीं	हेममालिन्यै नमः	कट्यादि मस्तकान्तं
ओं ऐं ह्रीं श्रीं	सूर्यायै नमः	पादादिमूर्धान्तम्
ओं ऐं ह्रीं श्रीं	श्रियै नमः	मूर्धादिपादान्तम्

इति श्रीसूक्तनाम मन्त्रन्यासः

16. लक्ष्मीनारायण मातृका न्यासः (कीर्त्यादि न्यासः)

ओं ह्रीं श्रीं अं केशव कीर्तिभ्यां नमः	शिरसि
ओं ह्रीं श्रीं आं नारयण कान्तिभ्यां नमः	मुखे
ओं ह्रीं श्रीं इं माधव तुष्टिभ्यां नमः	दक्षिण नेत्रे
ओं ह्रीं श्रीं ईं गोविन्द पुष्टिभ्यां नमः	वाम नेत्रे
ओं ह्रीं श्रीं उं विष्णु धृतिभ्यां नमः	दक्षिण कर्णे
ओं ह्रीं श्रीं ऊं मधुसूदन शान्तिभ्यां नमः	वाम कर्णे
ओं ह्रीं श्रीं ऋं त्रिविक्रम क्रियाभ्यां नमः	दक्षिण नासापुटे
ओं ह्रीं श्रीं ॠं वामन दयाभ्यां नमः	वाम नासापुटे
ओं ह्रीं श्रीं ऌं श्रीधर मेधाभ्यां नमः	दक्षिण कपोले
ओं ह्रीं श्रीं ॡं हृषीकेश हर्षाभ्यां नमः	वाम कपोले
ओं ह्रीं श्रीं एं पद्मनाभ श्रद्धाभ्यां नमः	ऊर्ध्वोष्ठे
ओं ह्रीं श्रीं ऐं दामोदर लज्जाभ्यां नमः	अधरोष्ठे
ओं ह्रीं श्रीं ओं वासुदेव लक्ष्मीभ्यां नमः	ऊर्ध्व दन्तपङ्क्तौ

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं ह्रीं श्रीं औं सङ्कर्षण सरस्वतीभ्यां नमः	अधो दन्तपङ्क्तौ
ओं ह्रीं श्रीं अं प्रद्युंन प्रीतिभ्यां नमः	जिह्वाग्रे
ओं ह्रीं श्रीं अः अनिरुद्ध रतिभ्यां नमः	कण्ठे
ओं ह्रीं श्रीं कं चक्री जयाभ्यां नमः	दक्षिण बाहूमूले
ओं ह्रीं श्रीं खं गदी दुर्गाभ्यां नमः	दक्षिण बाहुकूर्परे
ओं ह्रीं श्रीं गं शार्ङ्गी प्रभाभ्यां नमः	दक्षिण मणिबन्धे
ओं ह्रीं श्रीं घं खड्गी सत्याभ्यां नमः	दक्षिण कराङ्गुलिमूले
ओं ह्रीं श्रीं ङं शङ्खी चण्डाभ्यां नमः	दक्षिण कराङ्गुल्यग्रे
ओं ह्रीं श्रीं चं हली वाणीभ्यां नमः	वाम बाहूमूले
ओं ह्रीं श्रीं छं मुसली विलासिनीभ्यां नमः	वाम बाहुकूर्परे
ओं ह्रीं श्रीं जं शूली विजयाभ्यां नमः	वाम बाहुमणिबन्धे
ओं ह्रीं श्रीं झं पाशी वीरजयाभ्यां नमः	वाम कराङ्गुलिमूले
ओं ह्रीं श्रीं ञं अङ्कुशी विश्वाभ्यां नमः	वाम कराङ्गुल्यग्रे
ओं ह्रीं श्रीं टं मुकुन्द विनताभ्यां नमः	दक्ष पादोरूमूले
ओं ह्रीं श्रीं ठं नन्दज सुनन्दाभ्यां नमः	दक्ष पाद जानुनी
ओं ह्रीं श्रीं डं नन्दी सत्याभ्यां नमः	दक्ष पाद जङ्घायां
ओं ह्रीं श्रीं ढं नर ऋद्धीभ्यां नमः	दक्ष पादाङ्गुलिमूले
ओं ह्रीं श्रीं णं नरकजित् समृद्धीभ्यां नमः	दक्ष पादाङ्गुल्यग्रे
ओं ह्रीं श्रीं तं हरि शुद्धिभ्यां नमः	वाम पादोरूमूले
ओं ह्रीं श्रीं थं कृष्ण बुद्धिभ्यां नमः	वाम जानुनी
ओं ह्रीं श्रीं दं सत्य भुक्तिभ्यां नमः	वाम जङ्घायां
ओं ह्रीं श्रीं धं सात्वत मतिभ्यां नमः	वाम पादाङ्ग्युलिमूले
ओं ह्रीं श्रीं नं शौरि क्षमाभ्यां नमः	वाम पादाङ्गुल्यग्रे

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं ह्रीं श्रीं पं शूर रमाभ्यां नमः	दक्षिण पार्श्वे
ओं ह्रीं श्रीं फं जनार्दन उमाभ्यां नमः	वाम पार्श्वे
ओं ह्रीं श्रीं बं भूधर क्लेदिनीभ्यां नमः	पृष्ठे
ओं ह्रीं श्रीं भं विश्वमूर्ति क्लिन्नाभ्यां नमः	नाभौ
ओं ह्रीं श्रीं मं वैकुण्ठ वसुधाभ्यां नमः	उदरे
ओं ह्रीं श्रीं यं त्वगात्मभ्यां पुरुषोत्तम वसुधाभ्यां नमः	हृदये
ओं ह्रीं श्रीं रं अमृतात्मभ्यां बली पराभ्यां नमः	दक्षांसे
ओं ह्रीं श्रीं लं मांसात्मभ्यां बलानुज परायणाभ्यां नमः	वामांसे
ओं ह्रीं श्रीं वं मेदात्मभ्यां बाल सूक्ष्माभ्यां नमः	ककुदि
ओं ह्रीं श्रीं शं अस्थात्मभ्यां वृषघ्न सन्ध्याभ्यां नमः	हृदयादि दक्षकरान्ते
ओं ह्रीं श्रीं षं मज्जात्मभ्यां वृष प्रज्ञाभ्यां नमः	हृदयादि वामकरान्ते
ओं ह्रीं श्रीं सं शुक्रात्मभ्यां हंस प्रभाभ्यां नमः	हृदयादि दक्षपादान्ते
ओं ह्रीं श्रीं हं असुवात्मभ्यां वराह निशाभ्यां नमः	हृदयादि वामपादान्ते
ओं ह्रीं श्रीं ळं शक्त्यात्मभ्यां विमल मेधाभ्यां नमः	कट्यादि पादाङ्गुल्यन्ते
ओं ह्रीं श्रीं क्षं क्रोधात्मभ्यां नृसिंह विद्युताभ्यां नमः	कट्यादिमस्तकान्ते

इति कीर्त्यादि विष्णुशक्ति मातृकान्यासः

17. विष्णुशक्ति न्यासः (54) (पाञ्चरात्रे लक्ष्मीतन्त्रोक्तः)

अं ओं ह्रीं श्रीं	नमो वासुदेवाय	लक्ष्म्यै नमः	शिरसि
आं ओं ह्रीं श्रीं	नमो सङ्कर्षणाय	कीर्त्यै नमः	मुखे
इं ओं ह्रीं श्रीं	नमो प्रद्युंनाय	जयायै नमः	दक्षिण नेत्रे
ईं ओं ह्रीं श्रीं	नमो अनिरुद्धाय	मायायै नमः	वाम नेत्रे
उं ओं ह्रीं श्रीं	नमो केशवाय	श्रियै नमः	दक्षिण कर्णे
ऊं ओं ह्रीं श्रीं	नमो नारायणाय	वागीश्वर्यै नमः	वाम कर्णे

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ॠं ओं ह्रीं श्रीं	नमो माधवाय	कान्त्यै नमः	दक्षिण नासापुटे
ॠं ओं ह्रीं श्रीं	नमो गोविन्दाय	क्रियायै नमः	वाम नासापुटे
ऌं ओं ह्रीं श्रीं	नमो विष्णवे	शान्त्यै नमः	दक्षिण कपोले
ॡं ओं ह्रीं श्रीं	नमो मधुदनाय	विभूत्यै नमः	वाम कपोले
एं ओं ह्रीं श्रीं	नमो त्रिविक्रमाय	इच्छायै नमः	ऊर्ध्वौष्ठे
ऐं ओं ह्रीं श्रीं	नमो वामनाय	प्रीत्यै नमः	अधरोष्ठे
ओं ओं ह्रीं श्रीं	नमो श्रीधराय	रत्यै नमः	ऊर्ध्व दन्तपङ्क्तौ
औं ओं ह्रीं श्रीं	नमो हृषीकेशाय	मायायै नमः	अधो दन्तपङ्क्तौ
अं ओं ह्रीं श्रीं	नमो पद्मनाभाय	ज्ञान्यै नमः	जिह्वाग्रे
अः ओं ह्रीं श्रीं	नमो दामोदराय	महिमायै नमः	कण्ठे
कं ओं ह्रीं श्रीं	नमो पद्मनाभाय	धीदेव्यै नमः	दक्षिण बाहुमूले
खं ओं ह्रीं श्रीं	नमो ध्रुवाय	तारायै नमः	दक्षिण बाहुकूर्परे
गं ओं ह्रीं श्रीं	नमो अनन्ताय	वारुण्यै नमः	दक्षिण मणिबन्धे
घं ओं ह्रीं श्रीं	नमो शक्तीशाय	शक्त्यै नमः	दक्ष कराङ्गुलिमूले
ङं ओं ह्रीं श्रीं	नमो मधुसूदनाय	पद्मायै नमः	दक्षिण कराङ्गुल्यग्रे
चं ओं ह्रीं श्रीं	नमो विद्याधिदेवाय	विद्यायै नमः	वाम बाहुमूले
छं ओं ह्रीं श्रीं	नमो कपिलाय	सञ्ज्ञायै नमः	वाम बाहुकूर्परे
जं ओं ह्रीं श्रीं	नमो विश्वरूपाय	विश्वायै नमः	वाम बाहुमणिबन्धे
झं ओं ह्रीं श्रीं	नमो विहङ्गमाय	खगायै नमः	वाम कराङ्गुलिमूले
ञं ओं ह्रीं श्रीं	नमो क्रोडात्मने	भूदेव्यै नमः	वामं कराङ्गुल्यग्रे
टं ओं ह्रीं श्रीं	नमो बडबावक्त्राय	गौर्देव्यै	दक्ष पादोरुमूले
ठं ओं ह्रीं श्रीं	नमो धर्माय	लक्ष्म्यै नमः	दक्ष पाद जानुनि
डं ओं ह्रीं श्रीं	नमो वागीश्वराय	वागीश्वर्यै नमः	दक्ष पाद जङ्घायाम्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ढं ओं ह्रीं श्रीं नमो एकार्णवशायिने अमृतायै नमः दक्ष पादाङ्गुलिमूले
णं ओं ह्रीं श्रीं नमो पातालधारकाय धारिण्यै नमः दक्ष पादाङ्गुल्यग्रे
तं ओं ह्रीं श्रीं नमो वराहाय छायायै नमः वाम पादोरुमूले
थं ओं ह्रीं श्रीं नमो नरसिंहाय नारसिंह्यै नमः वाम पादजानुनि
दं ओं ह्रीं श्रीं नमो अमृताहरणाय सुधायै नमः वाम पादजङ्घायाम्
धं ओं ह्रीं श्रीं नमो दिव्यदेहश्रीपतये श्रियै नमः वाम पादाङ्गुलिमूले
नं ओं ह्रीं श्रीं नमःकान्तात्मने कीर्तिमय्यै नमः वाम पादाङ्गुल्यग्रे
पं ओं ह्रीं श्रीं नमो अमृतधारकाय विश्वकामायै नमः दक्षिण पार्श्वे
फं ओं ह्रीं श्रीं नमः कालनेमिघ्नाय मादेव्यै नमः वाम पार्श्वे
बं ओं ह्रीं श्रीं नमःपारिजातहरमहते सत्यायै नमः पृष्ठे
भं ओं ह्रीं श्रीं नमो लोकनाथ शान्तात्मने कान्त्यै नमः नाभौ
मं ओं ह्रीं श्रीं नमो दत्तात्रेयमहाप्रभवे सरोरुहायै नमः उदरे
यं ओं ह्रीं श्रीं नमो न्यग्रोधशायिने मायायै नमः हृदये
रं ओं ह्रीं श्रीं नमो एकश्रृङ्गतनवे पद्मासनायै नमः दक्षाम्से
लं ओं ह्रीं श्रीं नमो वामनदेवाय खर्वायै नमः वामाम्से
वं ओं ह्रीं श्रीं नमो त्रिविक्रमाय विक्रान्त्यै नमः ककुदि
शं ओं ह्रीं श्रीं नमो नरनारायणाय नरसम्भवायै नमः
हृदयादि दक्षकरान्ते
षं ओं ह्रीं श्रीं नमो हरये हरिप्रीत्यै नमः हृदयादि वामकरान्ते
सं ओं ह्रीं श्रीं नमो कृष्णाय गान्धार्यै नमः हृदयादि दक्षपादान्ते
हं ओं ह्रीं श्रीं नमो परशुरामाय काश्यप्यै नमः हृदयादि वामपादान्ते
ळं ओं ह्रीं श्रींनमो धनुर्धररामाय वैदेह्यै नमः कट्यादि पादाङ्गुल्यन्ते
क्षं ओं ह्रीं श्रीं नमो वेदविदेप्रभवे वेदविद्यायै नमः कट्यादि मस्तकान्ते

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सं ओं ह्रीं श्रीं नमःप्रभवे वैदेह्यै नमः नाभ्यादि पादान्तम्
सां ओं ह्रीं श्रीं नमःकल्किने पद्मिन्यै नमः नाभ्यादि मूर्धान्तम्
क्षां ओं ह्रीं श्रीं नमःपातालशयनाय नागशयिन्यै नमः पादादि मूर्धान्तम्
(इति सशक्तिक वैष्णव बहिर्मातृका न्यासः समाप्तः) 54 नामन्यासः

18. श्री कलादिमातृका न्यासः (शाक्ते देव्यार्चने)

ओं अस्य श्रीकलादि मातृकान्यास मन्त्रस्य, प्रजापतिः ऋषिः, गायत्रीछन्दः, शारदा देवता, हल्भ्यो बीजानि, स्वराः शक्तयः, बिन्दुः कीलकं, सर्वार्थसिद्ध्यर्थे न्यासे विनियोगः ॥

ऋष्यादि न्यासः

ओं ऐं ह्रीं श्रीं	प्रजापतये ऋषये नमः	शिरसि न्यस्यामि
ओं ऐं ह्रीं श्रीं	गायत्री छन्दसे नमः	मुखमण्डले न्यस्यामि
ओं ऐं ह्रीं श्रीं	शारदा देवतायै नमः	हृदये न्यस्यामि
ओं ऐं ह्रीं श्रीं	हल्भ्यो बीजेभ्यो नमः	गुह्ये न्यस्यामि
ओं ऐं ह्रीं श्रीं	स्वरेभ्यो शक्तिभ्यो नमः	पादयोः न्यस्यामि
ओं ऐं ह्रीं श्रीं	बिन्दुरूप कीलकाय नमः	नाभौ न्यस्यामि
ओं ऐं ह्रीं श्रीं	शारदादेवतायै नमः	सर्वाङ्गे न्यस्यामि

करन्यासः

ओं ऐं ह्रीं श्रीं अं ओं आं अङ्गुष्ठाभ्यां नमः	हृदयाय नमः
ओं ऐं ह्रीं श्रीं इं ओं ईं तर्जनीभ्यां नमः	शिरसे स्वाहा
ओं ऐं ह्रीं श्रीं उं ओं ऊं मध्यमाभ्यां नमः	शिखायै वषट्
ओं ऐं ह्रीं श्रीं एं ओं ऐं अनामिकाभ्यां नमः	कवचाय हुं
ओं ऐं ह्रीं श्रीं ओं ओं औं कनिष्ठिकाभ्यां नमः	नेत्रत्रयाय वौषट्
ओं ऐं ह्रीं श्रीं अं ओं अः करतल करपृष्ठभ्यां नमः	अस्त्राय फट्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

षडङ्गन्यासः

शारदामातृ ध्यानम्

शङ्ख चक्राब्ज परशु कपाला न्यक्ष मालिकां-
पुस्तका मृत कुंभौ च त्रिशूलं दधतीं करैः ।
सित पीता ऽसित श्वेत रक्त वर्णै स्त्रिलोचनैः-
पञ्चास्यै संयुतां चन्द्र सकान्तिं शारदां भजे ॥

एवं वर्णरूपां शारदां ध्यात्वा हृदि संपूज्य - बेंरे - मातृकाः न्यसेत् ॥

1.	ओं ऐं ह्रीं श्रीं	अं	निवृत्ति कलायै नमः	शिरसि
2.	ओं ऐं ह्रीं श्रीं	आं	प्रतिष्ठा कलायै नमः	मुखे
3.	ओं ऐं ह्रीं श्रीं	इं	विद्या कलायै नमः	दक्षिणनेत्रे
4.	ओं ऐं ह्रीं श्रीं	ईं	शान्ति कलायै नमः	वामनेत्रे
5.	ओं ऐं ह्रीं श्रीं	उं	इन्धिका कलायै नमः	दक्षिणकर्णे
6.	ओं ऐं ह्रीं श्रीं	ऊं	दिपिका कलायै नमः	वामकर्णे
7.	ओं ऐं ह्रीं श्रीं	ऋं	रोचिका कलायै नमः	दक्षिणनासापुटे
8.	ओं ऐं ह्रीं श्रीं	ॠं	मोचिका कलायै नमः	वामनासापुटे
9.	ओं ऐं ह्रीं श्रीं	ऌं	पराकलायै नमः	दक्षिणकपोले
10.	ओं ऐं ह्रीं श्रीं	ॡं	सूक्ष्मा कलायै नमः	वामकपोले
11.	ओं ऐं ह्रीं श्रीं	एं	अमृता कलायै नमः	ऊर्ध्वोष्ठे
12.	ओं ऐं ह्रीं श्रीं	ऐं	ज्ञानामृता कलायै नमः	अधरोष्ठे
13.	ओं ऐं ह्रीं श्रीं	ओं	आप्यायिनी कलायै नमः	ऊर्ध्वदन्तपङ्क्तौ
14.	ओं ऐं ह्रीं श्रीं	औं	व्यापिनी कलायै नमः	अधोदन्तपङ्क्तौ
15.	ओं ऐं ह्रीं श्रीं	अं	व्योमरूपी कलायै नमः	जिह्वाग्रे
16.	ओं ऐं ह्रीं श्रीं	अः	अनन्ता कलायै नमः	कण्ठे

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

17.	ओं ऐं ह्रीं श्रीं	कं	सृष्टि कलायै नमः	दक्षिणबाहुमूले
18.	ओं ऐं ह्रीं श्रीं	खं	ऋद्धि कलायै नमः	दक्षिणकूर्परे
19.	ओं ऐं ह्रीं श्रीं	गं	स्मृति कलायै नमः	दक्षिणमणिबन्धे
20.	ओं ऐं ह्रीं श्रीं	घं	मेधा कलायै नमः	दक्षकराङ्गुलिमूले
21.	ओं ऐं ह्रीं श्रीं	ङं	कान्ति कलायै नमः	दक्षकराङ्गुल्यग्रे
22.	ओं ऐं ह्रीं श्रीं	चं	लक्ष्मी कलायै नमः	वामबाहुमूले
23.	ओं ऐं ह्रीं श्रीं	छं	द्यूती कलायै नमः	वामकूर्परे
24.	ओं ऐं ह्रीं श्रीं	जं	स्थिरा कलायै नमः	वाममणिबन्धे
25.	ओं ऐं ह्रीं श्रीं	झं	स्थिति कलायै नमः	वामकराङ्गुलिमूले
26.	ओं ऐं ह्रीं श्रीं	ञं	सिद्धि कलायै नमः	वामकराङ्गुल्यग्रे
27.	ओं ऐं ह्रीं श्रीं	टं	जरा कलायै नमः	दक्षिणोरौ
28.	ओं ऐं ह्रीं श्रीं	ठं	पालिनी कलायै नमः	दक्षजानुनि
29.	ओं ऐं ह्रीं श्रीं	डं	क्षान्ति कलायै नमः	दक्षजङ्घायां
30.	ओं ऐं ह्रीं श्रीं	ढं	ईश्वरी कलायै नमः	दक्षपादाङ्गुलिमूले
31.	ओं ऐं ह्रीं श्रीं	णं	रति कलायै नमः	दक्षपादाङ्गुल्यग्रे
32.	ओं ऐं ह्रीं श्रीं	तं	कामिनी कलायै नमः	वामोरौ
33.	ओं ऐं ह्रीं श्रीं	थं	वरदा कलायै नमः	वामजानुनि
34.	ओं ऐं ह्रीं श्रीं	दं	आह्लादिनी कलायै नमः	वामजङ्घायां
35.	ओं ऐं ह्रीं श्रीं	धं	प्रीति कलायै नमः	वामपादाङ्गुलिमूले
36.	ओं ऐं ह्रीं श्रीं	नं	दीधिती कलायै नमः	वामपादाङ्गुल्यग्रे
37.	ओं ऐं ह्रीं श्रीं	पं	तीक्ष्णा कलायै नमः	दक्षपार्श्वे
38.	ओं ऐं ह्रीं श्रीं	फं	रौद्री कलायै नमः	वामपार्श्वे

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

39. ओं ऐं ह्रीं श्रीं बं भया कलायै नमः पृष्ठे
40. ओं ऐं ह्रीं श्रीं भं निद्रा कलायै नमः नाभौ
41. ओं ऐं ह्रीं श्रीं मं तन्त्रिका कलायै नमः उदरे
42. ओं ऐं ह्रीं श्रीं यं त्वगात्मिकायै क्षुधाकलायै नमः हृदये
43. ओं ऐं ह्रीं श्रीं रं असृगात्मिकायै क्रोधिनी कलायै नमः दक्षांसे
44. ओं ऐं ह्रीं श्रीं लं मांसात्मिकायै क्रियाकलायै नमः ककुदि
45. ओं ऐं ह्रीं श्रीं वं मेधात्मिकायै उत्कारी कलायै नमः वामांसे
46. ओं ऐं ह्रीं श्रीं शं अस्थ्यात्मिकायै - मृत्युकारीकलायै नमः हृदयादि दक्षकराङ्गुल्यन्तम्
47. ओं ऐं ह्रीं श्रीं षं मज्जात्मिकायै - पीताकलायै नमः हृदयादि वामकराङ्गुल्यन्तम्
48. ओं ऐं ह्रीं श्रीं सं शुक्रात्मिकायै - श्वेताकलायै नमः हृदयादिदक्षपादाङ्गुल्यन्तम्
49. ओं ऐं ह्रीं श्रीं हं आत्मिकायै - अरुणाकलायै नमः हृदयादि वामपादाङ्गुल्यन्तम्
50. ओं ऐं ह्रीं श्रीं ळं परमात्मिकायै - सिताकलायै नमः कट्यादिपादाङ्गुल्यन्तम्
51. ओं ऐं ह्रीं श्रीं क्षं ज्ञानशक्त्यात्मिकायै - अनन्ताकलायै नमः कट्यादि मस्तकान्तम्

इति श्रीकलादिमातृकान्यासः समाप्त

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीसूक्तऋचां श्रीपूजाकर्मणि विनियोग विधिः
(लक्ष्मीतन्त्रे)

तत्र संप्रति मत्सूक्त विधानं विहितं श्रुणु ।

मामेवास्य मुनिं विद्यात् छन्दः श्रीर्नामकथ्यते ।

देवता सकलाब्धारा विष्णु पत्न्यहमीश्वरी ।

विनियोगोऽस्य सूक्तस्य लक्ष्मीनारायणार्चने।

अङ्कस्थां भावयेल् लक्ष्मीं विष्णो र्मां परमेश्वरीम्।

वामेनालिङ्गिता शश्वद् बाहुना परमात्मना।

तदम्स लग्न बाहुं च दिव्य पङ्कजव्धारिणीम्।

अथ मां अर्चयेद् ऋग्भिः प्रयतः परमेश्वरीम्।

वामोत्सङ्ग निषण्णी मां देवदेवस्य शार्ङ्गिणः ।

कुर्यात् प्रथमया चर्चा त्वावाहन मतन्द्रितः।

द्वितीययाऽऽसनं दद्यात् देवदेवस्य शार्ङ्गिणः

तृतीययाऽर्घ्यं मीशाने पाद्यं चापि प्रकल्पयेत्।

चतुर्थ्याऽचमनं चैव पञ्चम्या चोपहारकम्।

षष्ठ्या स्नानं प्रकुर्वीत सह नौ साधकोत्तमः।

सप्तम्या वाससी दद्याद् अष्टम्या भूषणानि च ।

गन्धं दद्याद् नवम्या तु दशम्या सुमनश्चयम्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पराभ्यां धूपदीपौ तु परया मधुपर्कक्रम्।

प्रापणं च चतुर्दश्या पञ्चदश्या नमस्क्रियाः ।

तारिकां अनुतारं च प्रयुञ्जीयाख्यान्ततः।

प्रत्यृचं नियतो मन्त्री जपेच्छक्त्या यथाविधि ।

सूक्तस्य विलयं पश्चात् तारिकायां अनुस्मरेत्।

तारिकास्थौ च नौ ध्यात्वा स्मरेत् सर्वगतिं च नौ ।

(प्रकारान्तराष्ट्र्चांविनियोगक्रमः)

ऋग्भिश्चतसृभिर्यद्वा पूर्वं आवाहन क्रिया।

पञ्चम्या तु प्रपद्येत श्रियं मां शुद्ध चेतसा ।

आप इत्यनया कुर्याद् अर्घ्यं पाद्याचमन क्रियाः ।

आद्रामिति च मत्स्नानं कर्दमेनेति चाम्बरम्।

गन्धद्वारेति गन्धाः स्युः उपैतु स्या दलङ्कृतिः ।

कां सोऽस्मि धूपदीपौ च षष्ठ्या चैवोपहारकम्।

मनसः काम मित्येवं मधुपर्कं प्रकल्पयेत्।

क्षुत्पिपासा मिति ह्येषा प्रापण प्रतिपादिका।।

अन्त्यया तु नमस्कारः शिष्टं पूर्ववदाचरेत्।

सूक्तेऽस्मिन् मम नामानि पञ्चाशत् त्रीणि चाप्युत।

(इति पाञ्चरात्रागमे - लक्ष्मीतन्त्रे-श्रीसूक्तसपर्या विधिस्समाप्तः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मीपूजायाः विशेष सङ्कल्पप्रकारः

शुभे शोभने मुहूर्ते --- नक्षत्रे--- राशौ --- लको जातस्य-(अमुक- :शर्मणः मम-जन्माभ्यासात् अपारे अस्मिन् संसारसागरे-अतीतेषु अनन्तेषु जन्मसु अस्मिन् च जन्मनि बुद्धिपूर्वकं- अबुद्धिपूर्वकं च मनसा वचसा कर्मणाच कृतानां अकृतप्रायश्चित्ततया फलप्रदानोन्मुखानां इदानीं अस्मिन् जन्मनि प्रारब्धफलानां प्रारप्स्यमानफलानां च पापानां सद्यः अपनोदनार्थं - परस्वापहरण रूपपापफलत्वेन अनुभूयमान, अस्थानद्रव्यव्यय प्राप्तव्यद्रव्य अप्राप्ति, चोरकृत द्रव्यापहारादिजन्य दुःखनिवृत्यर्थं - कुलस्त्री पातिव्रत्य भङ्गरूप पापफलत्वेन अनुभूयमान ञ्शश्वत् कलत्रनाशन कलत्र प्रातिकूल्य प्रयुक्त कामानुपशमन जनितताप पुत्रादि प्रातिकूल्य प्रयुक्त कृत क्रियमाण करिष्यमाण कर्मफल अननुभवरूप खेदनिवृत्यर्थं, वापी कूप नदी तटाकोद्देश्यक पांसु लोष्टेष्टका खण्डादि प्रक्षेपण रूप पापफलत्वेन अनुभूयमान - क्षेत्रारामादि समुचित फलागमाभाव, विपत्कालिकसुहृन्मित्राद्य पेक्षण, धर्मकर्मप्रवृत्ति विघ्नादि दुःखनिवृत्यर्थं अस्माकं जन्म लग्न वशात् राशि चन्द्र लग्ने वशात् ग्रहाणां शुभफल पुदातृत्व सिद्ध्यर्थं – अनन्त कल्याणगुणाभिवृद्ध्यत्यर्थः ऋणत्रयविमुक्त्यर्थं अष्टैश्वर्यावाप्त्यर्थं - पुत्र पौत्रनप्तृदर्शनद्वारा आचन्द्रार्कवंशाभिवृध्यर्थं - अष्टलक्ष्मी कृपाकटाक्ष सिद्ध्यर्थं - गृहाराम‌नन्दनोद्यान केळी भवनादि सकल सौभाग्य प्राप्त्यर्थं – सर्वविध दुःखोपशमनार्थं - विशालकीर्त्यावाप्त्यर्थं सर्वदागृहे धनधान्य समृद्ध्यर्थं - कुबेर इव सम्पदामभिवृध्यर्थं - श्रीमहाविष्णु वक्षस्थलस्थितायाः - सकलजगज्जनन्याः, कमलवासिन्याः, पङ्कजधारिण्याः-त्रिगुणात्मिकायाः श्री महालक्ष्म्याः पुरश्चरणविधानेन पूजाहोमादि महा मङ्गळकर्म करिष्ये - इति संकल्प्य पूजयेत्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी आराधन क्रमः
(श्रीसूक्त विधान षोडशोपचारयुक्तः)

लक्ष्मी पीठपूजा - पीठस्य अधोभागे-भूमौ-

1. ओं मूलप्रकृत्यै नमः
2. ओं आधारशक्त्यै नमः
3. ओं कालाग्निरुद्राय नमः
4. ओं महामण्डूकाय नमः
5. ओं आदिकूर्माय नमः
6. ओं महावराहाय नमः
7. ओं अनन्ताय नमः
8. ओं भूम्यै नमः
9. ओं अमृतार्णवाय नमः
10. ओं रत्नद्वीपाय नमः
11. ओं हेमगिरये नमः
12. ओं नन्दनोद्यानाय नमः
13. ओं मणिभूम्यै नमः
14. ओं हिरण्यप्राकारायै नमः
15. ओं रत्नमण्टपाय नमः
16. ओं कल्पवृक्षाय नमः
17. ओं नवरत्न सिंहासनाय नमः
18. ओं सर्वशक्ति योग पीठाय नमः

इति संपूज्य -

पीठस्य-आग्नेयादि कोणेषु-

1. ओं धर्माय नमः
2. ओं ज्ञानाय नमः
3. ओं वैराग्याय नमः
4. ओं ऐश्वर्याय नमः

तत्पीठ पूर्वादि दिक्षु-

1. ओं अधर्माय नमः
2. ओं अज्ञानाय नमः
3. ओं अवैराग्याय नमः
4. ओं अनैश्वर्याय नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तन्मध्ये-

1. ओं तं तमसे नमः
2. ओं रं रजसे नमः
3. ओं सं सत्वाय नमः
4. ओं मं मायायै नमः
5. ओं विं विद्यायै नमः
6. ओं आं आत्मने नमः
7. ओं उं अन्तरात्मने नमः
8. ओं पं परमात्मने नमः
9. ओं ज्ञां ज्ञानात्मने नमः
10. ओं कन्दाय नमः
11. ओं बीजाय नमः
12. ओं अङ्कुराय नमः
13. ओं नाळाय नमः
14. ओं कण्टकेभ्यो नमः
15. ओं दलेभ्यो नमः
16. ओं उपदलेभ्यो नमः
17. ओं कर्णिकायै नमः
18. ओं केसरेभ्यो नमः
19. ओं बीजेभ्यो नमः
20. ओं कमलाय नमः

इत्येवं समुदितरूपं साष्टदलाब्जं-पद्मासनाय नमः इत्यभ्यर्च्य

1. ओं वह्निमण्डलाय नमः
2. ओं सूर्यमण्डलाय नमः
3. ओं सोममण्डलाय नमः
4. ओं श्रीपीठ पङ्कजाय नमः- इति संपूज्य-

पूर्वादि अष्टदलेषु-

1. ओं विभूत्यै नमः
2. ओं उन्नत्यै नमः
3. ओं कीर्त्यै नमः
4. ओं सन्तान्यै नमः
5. ओं बुद्ध्यै नमः
6. ओं पुष्ट्यै नमः
7. ओं उत्कर्षिण्यै नमः
8. ओं ऋद्ध्यै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

इति अष्टदलशक्तीः संपूज्य ॥ "ओं सर्वशक्ति कमलासनाय नमः" - एवं पूजिते पीठे-स्वहृदयस्थितां-मूलमन्त्रमूर्तिमयीं-गुरुस्वरूपां-ज्योतिर्मयीं-सपरिवारां-सर्वलोकजननीं-श्रीमहालक्ष्मीं- विष्णु वामाङ्गे समासीनां ध्यायेत् ॥

अरुण कमल संस्था तद्रजःपुञ्ज वर्णा -
करकमल धृतेष्टाभीतियुग्मांबुजा च ।
मणिमकुट विचित्रा लङ्कृता कल्पजालैः -
सकल भुवन माता सन्ततं श्रीः श्रियै नः ॥

इति ध्यात्वा - ओं हिरण्यवर्णां हरिणीं इति श्रीसूक्त मन्त्रमुच्चार्य -

"ओं ऐं ह्रीं श्रीं क्लीं सौं जगत्प्रसूत्यै नमः" इति मूलेन - ओं श्रीं श्रियै नमः - इति-आवाहनीमुद्रया आवाह्य - स्थापिन्या संस्थाप्य - गायत्र्या पद्मासने संस्थाप्य - सन्निधान्या सन्निधाप्य - संबोधनीमुद्रया (निष्ठुरया) संबोध्य - (निरुध्य) - संमुखीकरण्या अभिमुखीकृत्य - दिग्बन्धन, अवकुण्ठन, योनि, धेनुमुद्राः पद्ममुद्रां च प्रदर्श्य ॥

आगच्छ वरदे देवि नारायण मनोरमे ।
पूजां गृहाण हरिणी नमस्ते माधव प्रिये ॥
देवेशी भक्तसुलभे सर्वावरण संयुते ।
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिराभव ॥ इति प्रार्थ्य ॥

स्वागतन्ते महालक्ष्मि-इति विज्ञाप्य, स्वागतार्घ्यं दत्वा, सुप्रसन्नाभव - वरदाभव - देवि प्रसीद प्रसीद - इति विज्ञाप्य - ततः तस्याः - हृदयादि करान्तस्थानेषु - षडङ्गमन्त्रै रभ्यर्चयेत् - तद्यथा -

1. ओं हिरण्मय्यै-हृदयाय नमः-इति हृदये -
2. ओं चन्द्रायै-शिरसे स्वाहा-इति शिरसि-
3. ओं रजतस्रजायै-शिखायै वषट्-इति शिखायां -

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

4. ओं हिरण्यस्त्रजायै-कवचाय हुं-इति सर्वाङ्गे -
5. ओं हिरण्यायै-नेत्रेभ्यो वौषट्-इति नेत्रेषु -
6. ओं हिरण्यवर्णायै-अस्त्राय फट्-इति हस्तेषु-

एवं अङ्गानि विन्यस्य-धेनुमुद्रया अमृतीकृत्य - संआराधयेत्

ततो देव्याः श्रीसूक्तऋग्भिः आसनाद्युपचाराणि विदध्यात्-तद्यथा

2. ओं तांम आवह.....+.....पुरुषानहम् ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति दिव्यरत्नमयमासनं अर्पयित्वा ॥

3. ओं अश्वपूर्वां.....+.....जुषताम् ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति अर्घ्यं दत्वा ॥

4. ओं कां सोस्मितां.....+.....श्रियम् ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति पाद्यं दत्वा ॥

5. ओं चन्द्रां प्रभासां.....+.....त्वां वृणे ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति आचमनीयं दत्वा ॥

6. ओं आदित्यवर्णे.....+.....अलक्ष्मीः ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति मधुपर्कं दत्वा-

7. ओं उपैतुमां.....+.....दधातु मे ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति अभिषेकं विधाय ॥ (स्नानं विधाय)
आचमनार्घ्यौंच दत्वा-

8. ओं क्षुत्पिपासां.....+.....गृहात् ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-दुकूल हेमांबर वस्त्रयुगल कञ्चुकादीनि समर्प्य समलङ्कृत्य ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

9. ओं गन्धद्वारां.....+.....श्रियम् ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति मणिमकुट हार-केयूरा
द्याभरणानि समर्प्य ॥

10. ओं मनसः कामं.....+.....यशः ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति गन्धादि सुगन्ध परिमलद्रव्याणि समर्प्य-कस्तूरीमृगमदादिना तिलकं कृत्वा-शोभनाक्षतादिभिः सह स्त्रैणसौन्दर्यं दायकानि सौभाग्यद्रव्याणि च दत्वा ॥

11. ओं कर्दमेन प्रजा.....+.....पद्ममालिनीम् ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति पुष्पमालादिभिरलंकृत्य, पद्ममालाभि बिल्वमालादिभिरलंकृत्य॥

12. ओं आपः सृजन्तु.....+.....मे कुले ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति अगरु गुग्गुलादिना धूपं धूपयित्वा ॥

13. ओं आर्द्रां पुष्करिणीं.....+.....मआवह ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति गव्याज्य दीपं प्रदर्श्य ॥

14. ओं आर्द्रां यःकरिणीं.....+.....मआवह ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति परमान्नं नैवेद्यं निवेद्य ॥

15. ओं तां मआवह.....+.....पुरुषानहम् ॥ इति मन्त्रेण ॥
ओं श्रीं श्रियै नमः-इति फ़लवर्ग मुखवास तांबूलादिकं निवेद्य॥

पीठपद्म कर्णिकायां - षट्कोणेषु -

आग्नेय्यां	ओं हिरण्मय्यै - हृदयदेव्यै नमः
ऐशान्यां	ओं चन्द्रायै - शिरोदेव्यै नमः
नैरृत्यां	ओं रतजस्त्रजायै - शिखादेव्यै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वायव्यां	ओं हिरण्यस्रजायै - कवचदेव्यै नमः
पुरोभागे	ओं हिरण्यायै-नेत्रदेव्यै नमः
पद्मपत्रेषु दिक्षु	ओं हिरण्यवर्णायै-अस्त्रदेव्यै नमः

इति षडङ्गदेवीः संपूज्य ॥ नमस्कारमुद्रां प्रदशर्य ॥

प्रथमावरणे - प्रागादि चतुर्दिक्षु - पद्म अष्टदलेषु

पूर्वे	ओं ह्रीं वां वासुदेवाय नमः
दक्षिणे	ओं ह्रीं सं सङ्कर्षणाय नमः
पश्चिमे	ओं ह्रीं प्रं प्रद्युंनाय नमः
उत्तरे	ओं ह्रीं अं अनिरुद्धाय नमः इति संपूज्य -

आग्नेयादिकोणेषु - क्रमेण -

आग्नेये	ओं दमनकाय श्रीगजाय नमः
नैरृते	ओं सन्तानाय श्रीगजाय नमः
वायव्ये	ओं गुग्गुलाय श्रीगजाय नमः
ऐशाने	ओं कुरण्टकाय श्रीगजाय नमः-

इति मन्त्रेण श्रियः चतुर्गजान् संपूज्य- तत्रैव पार्श्वयोः -

देव्याः दक्षिणे	ओं शङ्खनिधये नमः
देव्याः वामभागे	ओं पद्मनिधये नमः

इति द्वारे निधिद्वयं संपूज्य -

ततः द्वितीयावरणे - पूर्वादि दलाष्टकेषु क्रमेण -

1. ओं बलायै नमः	5. ओं विभीषिकायै नमः
2. ओं बलाकिन्यै नमः	6. ओं मल्लिकायै नमः
3. ओं विमलायै नमः	7. ओं शङ्कर्यै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

4. ओं वनमालिकायै नमः　8. ओं वसुमालिकायै नमः

इति संपूज्य ॥ ततो तृतीयावरणं पूजयेत् ।।

(अथवा / प्रकारान्तरेण / पूजयेत् तद्यथा-)

प्रथमावरणे - षट्कोणेषु आग्नेयादिषु -

1. ओं हिरण्यायै नमः　4. ओं पद्मवर्णायै नमः

2. ओं चन्द्रायै नमः　5. ओं पद्मस्थायै नमः

3. ओं रजतस्त्रजायै नमः　6. ओं हिरण्यवर्णायै नमः -

इतिसंपूज्य -

द्वितीयावरणे अष्टदलेषु क्रमेण -

1. ओं पद्मायै नमः　5. ओं तर्पयन्त्यै नमः

2. ओं पद्मवर्णायै नमः　6. ओं तृप्त्यै नमः

3. ओं पद्मस्थायै नमः　7. ओं ज्वलन्त्यै नमः

4. ओं आर्द्रपद्मायै नमः　8. ओं स्वर्णप्राकारायै नमः

इति संजयेत् ॥ ततो लोकपालान् तदायुधानि च संपूजयेत् -

तृतीयावरणे दशदिक्षु - क्रमेण -

1. ओं इन्द्राय नमः　6. ओं वायवे नमः

2. ओं अग्नये नमः　7. ओं कुबेराय नमः

3. ओं यमाय नमः　8. ओं ईशानाय नमः

4. ओं निर्ऋतये नमः　9. ओं ब्रह्मणे नमः

5. ओं वरुणाय नमः　10. ओं अनन्ताय नमः

इति संपूज्य - अर्घ्यंदत्वा - नमस्कारमुद्रां दर्शयेत्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

चतुर्थावरणे - तत्रैव दशदिक्षु - क्रमेण -

1. ओं वज्राय नमः
2. ओं शक्तये नमः
3. ओं दण्डाय नमः
4. ओं खड्गाय नमः
5. ओं पाशाय नमः
6. ओं ध्वजाय नमः
7. ओं गदायै नमः
8. ओं त्रिशूलाय नमः
9. ओं पद्माय नमः
10. ओं चक्राय नमः

इति संपूज्य -अर्घ्यं दत्वा - नमोमुद्रां दर्शयेत्॥

ततो पञ्चमावरणे- अष्टदिक्षु दिग्गजयुगळ मर्चयेत्-तद्यथा-

1. पूर्वे -	ओं ऐरावताय नमः -	अभ्रमवे नमः
2. आग्नेय्यां -	ओं पुण्डरीकाय नमः -	कपिलायै नमः
3. दक्षिणे -	ओं पुष्पदन्ताय नमः -	पिङ्गलायै नमः
4. नैरृते -	ओं वामनाय नमः -	अनुपमायै नमः
5. वारुणे -	ओं सार्वभौमाय नमः -	ताम्रकर्ण्यैनमः
6. वायव्ये -	ओं अञ्जनाय नमः -	शुभ्रदन्त्यै नमः
7. उत्तरे -	ओं नीलाय नमः -	अङ्गनायै नमः
8. ऐशान्यां -	ओं कुमुदाय नमः -	अंजनावत्यै नमः

एवं अष्टदिग्वारणयुगलं संपूज्य - अर्घ्यंदत्वा - श्रियं मूलेनाभ्यर्च्य - ततो देवीं विस्तरेण सर्वोपचारैः संपूज्य संतोषयेत् ॥

ओं तां म आवह....+....पुरुषानहम् ॥ इति श्रीसूक्त मन्त्रेण॥
ओं श्रीं श्रियै नमः - इतिमन्त्रेण स्वर्णपुष्पं स्वर्ण दक्षिणां च समर्प्य।

16. महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि ।
तन्नो लक्ष्मी प्रचोदयत् - श्रीं श्रियै नमः:- इति श्रीगायत्री मन्त्रेण मङ्गलनीराजनं विधाय-पुष्पाञ्जलित्रयं समर्प्य।

ओं यश्शुचिः प्रयतो.....+.....इत्यादिभिः इति श्रीसूक्त ऋग्भिः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

विविधस्तोत्रैश्च स्तुत्वा-प्रदक्षिणं कृत्वा-नमस्कारान् विधाय-मूलमन्त्रजपं निवेद्य-प्रार्थयेत् ॥

ततः कुण्डेवा स्थण्डिलेवा अग्नौ-पञ्चदश ऋग्भिराज्येन हुत्वा-घृत मधु शर्करेति त्रिमधुराक्तैः-पद्मैः- बिल्वसमिद्भिः-पायसेन घृतेन च यथाशक्ति मूलेन शतं अङ्गमन्त्रै: तद्दशाम्श संख्यया आहुतीः हुत्वा-ततो पूर्णां जुहुयात् ॥ श्रीमखान्ते तत्र द्वादश विप्रभोजनं च कारयित्वा-तेषामाशिषश्च गृह्णीयात्-एवं कृतश्रीयज्ञः स सिद्धो भवति ॥

पञ्चचत्वारिंशत् शुक्रवारेषु श्रीसूक्तस्य अन्त्यां ऋचं अष्टोत्तरशतं जप्त्वा, नवनीताक्तानि पद्मानि तत्संख्ययैव जुहुयात् ,कांसोस्मितामिति च दशाहुती घृताक्तान्नेन नित्यं- जुहुयात् ॥ एवं षण्मासान् प्रत्यहं होमं तर्पणं च विदध्यात्॥ तत्र श्रियः तर्पणं तु श्रियं तर्पयामित्यादि) (शारदा तिलकोक्तवत् कुर्यात्॥

(इति श्रीसूक्तमन्त्रै: कृतश्रीसपर्यासमाप्ता।)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्म्याः चतुष्षष्टि उपचारपूजा

आवाहनादिकम्

अथ श्री महालक्ष्म्याः अमृतचैतन्यमूर्तिं सर्वाङ्ग सौन्दर्यमण्डितं दिव्यवपुषं विचिन्त्य - (ध्यात्वा)

देवेशि भक्तिसुलभे सर्वावरण संवृते ।
यावत् त्वां पूजयिष्यामि तावत् त्वं सुस्थिरा भव ।।

इति श्रीमन्नारायणाङ्के श्री महालक्ष्मीं जगन्मातरं आवाहयामि नमः इति परदेवतां मूलमन्त्रेण आवाहयेत्। ततः आवाहनादि मुद्राः दर्शयेत्। तद्यथा।

1. औं श्रीं लक्ष्म्यै नमः आवाहिता भव।।
2. औं श्रीं लक्ष्म्यै नमः संस्थापिता भव॥
3. औं श्रीं लक्ष्म्यै नमः सन्निधापिता भव।।
4. औं श्रीं लक्ष्म्यै नमः सन्निरुद्धा भव।।
5. औं श्रीं लक्ष्म्यै नमः सम्मुखी भव॥
6. औं श्रीं लक्ष्म्यै नमः अवकुण्ठिता भव।।
7. औं श्रीं लक्ष्म्यै नमः सुप्रसन्ना भव ।।
8. औं श्रीं लक्ष्म्यै नमः सुप्रीता भव ।।
9. औं श्रीं लक्ष्म्यै नमः वरदा भव ॥

धेनुमुद्रां - योनिमुद्रां पद्ममुद्रां – चक्रमुद्रां - नमस्कारमुद्रां च प्रदर्शयेत्।। (प्रदर्शयेत्)

अथ लक्ष्म्याः चतुष्षष्ठ्युपचार पूजा (64भोगाः)

श्रीपरदेवतायाः नारायणकुटुम्बिन्याः महालक्ष्म्याः चतुष्षष्टि उपचारान् आचरेत् । अशक्तानां उपचाराणां मनसा भावनया सामन्यार्घ्योदक बिन्दुना पुष्पमेकं अम्बाचारणाम्बुजे समर्पणबुद्ध्या पुष्पाक्षतान् वा समर्पयेत् ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

1. औं श्रीं लक्ष्म्यै पद्मं कल्पयामि नमः
2. औं श्रीं लक्ष्म्यै अर्घ्यं कल्पयामि नमः
3. औं श्रीं लक्ष्म्यै आचमनीयं कल्पयामि नमः
4. औं श्रीं लक्ष्म्यै आभरणा अवरोपणं कल्पयामि नमः
5. औं श्रीं लक्ष्म्यै सुगन्धि तैलाभ्यङ्गं कल्पयामि नमः
6. औं श्रीं लक्ष्म्यै मज्ञनशालाप्रवेशं कल्पयामि नमः
7. औं श्रीं लक्ष्म्यै मज्ञनशालामणिपीठोपवेशनं कल्पयामि नमः
8. औं श्रीं लक्ष्म्यै दिव्यस्नानीयोद्वर्तनं कल्पयामि नमः
9. औं श्रीं लक्ष्म्यै उष्णोदक स्नानं कल्पयामि नमः
10. औं श्रीं लक्ष्म्यै कनक कलशच्युत सकल तीर्थाभिषेकं कल्पयामि नमः
11. औं श्रीं लक्ष्म्यै धौतवस्त्र परिमार्जनं कल्पयामि नमः
12. औं श्रीं लक्ष्म्यै धवळतरदुकूलपरिधानं कल्पयामि नमः
13. औं श्रीं लक्ष्म्यै धवळकञ्चुककुचोत्तरीयं कल्पयामि नमः
14. औं श्रीं लक्ष्म्यै आलेपमण्टपप्रवेशनं कल्पयामि नमः
15. औं श्रीं लक्ष्म्यै आलेपमण्टपमणिपीठोपवेशनं कल्पयामि नमः
16. औं श्रीं लक्ष्म्यै चन्दन -अगरु कुङ्कुम मृगमद कर्पूर कस्तूरी गोरोचनादि दिव्यगन्ध सर्वाङ्गीन विलेपनं कल्पयामि नमः
17. औं श्रीं लक्ष्म्यै केशभारस्य कालागरुधूपं कल्पयामि नमः
18. औं श्रीं लक्ष्म्यै मल्लिका, मालती, जाती, चम्पक अशोक, शतपत्र, पूग, कुडळी पुन्नाग कल्हार मुख्यसर्वर्तुकुसुममालाः कल्पयामि नमः
19. औं श्रीं लक्ष्म्यै भूषणमण्टपप्रवेशनं कल्पयामि नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

20. औं श्रीं लक्ष्म्यै भूषणमण्टपमणिपीठोपवेशनं कल्पयामि नमः
21. औं श्रीं लक्ष्म्यै नवमणिमकुटं कल्पयामि नमः
22. औं श्रीं लक्ष्म्यै चन्द्रशकलं कल्पयामि नमः
23. औं श्रीं लक्ष्म्यै सीमन्तसिन्दूरं कल्पयामि नमः
24. औं श्रीं लक्ष्म्यै तिलकरत्नं कल्पयामि नमः
25. औं श्रीं लक्ष्म्यै कालाञ्जनं कल्पयामि नमः
26. औं श्रीं लक्ष्म्यै वाळीयुगलं कल्पयामि नमः
27. औं श्रीं लक्ष्म्यै मणिकुण्डलयुगलं कल्पयामि नमः
28. औं श्रीं लक्ष्म्यै नासाभरणं कल्पयामि नमः
29. औं श्रीं लक्ष्म्यै अधरयावकं कल्पयामि नमः
30. औं श्रीं लक्ष्म्यै प्रथमभूषणं (माङ्गल्यसूत्रं) कल्पयामि नमः
31. औं श्रीं लक्ष्म्यै कनकचिन्ताकं कल्पयामि नमः
32. औं श्रीं लक्ष्म्यै पदकं कल्पयामि नमः
33. औं श्रीं लक्ष्म्यै महापदकं कल्पयामि नमः
34. औं श्रीं लक्ष्म्यै मुक्तावलिं कल्पयामि नमः
35. औं श्रीं लक्ष्म्यै एकावलिं कल्पयामि नमः
36. औं श्रीं लक्ष्म्यै छन्नवीरं कल्पयामि नमः
37. औं श्रीं लक्ष्म्यै केयूरयुगलचतुष्टयं कल्पयामि नमः
38. औं श्रीं लक्ष्म्यै वलयावलिं कल्पयामि नमः
39. औं श्रीं लक्ष्म्यै ऊर्मिकावलिं कल्पयामि नमः
40. औं श्रीं लक्ष्म्यै काञ्चीदामम् कल्पयामि नमः
41. औं श्रीं लक्ष्म्यै कटिसूत्रं कल्पयामि नमः
42. औं श्रीं लक्ष्म्यै सौभाग्याभरणं कल्पयामि नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

43. औं श्रीं लक्ष्म्यै पादकटकं कल्पयामि नमः
44. औं श्रीं लक्ष्म्यै रत्ननूपुरं कल्पयामि नमः
45. औं श्रीं लक्ष्म्यै पादाङ्गुलीयकं कल्पयामि नमः
46. औं श्रीं लक्ष्म्यै एककरे पद्मं कल्पयामि नमः
47. औं श्रीं लक्ष्म्यै अन्यकरे रक्तपद्मं कल्पयामि नमः
48. औं श्रीं लक्ष्म्यै इतरकरे निधिपात्रयुक्तवरदं कल्पयामि नमः
49. औं श्रीं लक्ष्म्यै अपरकरे अभयमुद्रां (श्रीफलं) कल्पयामि नमः
50. औं श्रीं लक्ष्म्यै श्री माणिक्य पादुके कल्पयामि नमः
51. औं श्रीं लक्ष्म्यै स्वसमानवेषाभिः रावरणदेवताभिः सह महा (सिंहासन) चक्राधिरोहणं कल्पयामि नमः
52. औं श्रीं लक्ष्म्यै नारायणाङ्क पर्यङ्कोपवेशनं कल्पयामि नमः
53. औं श्रीं लक्ष्म्यै अमृतासवचषकं कल्पयामि नमः
54. औं श्रीं लक्ष्म्यै आचमनीयं कल्पयामि नमः
55. औं श्रीं लक्ष्म्यै कर्पूरवीटिकां कल्पयामि नमः
56. औं श्रीं लक्ष्म्यै आनन्दोल्लास विलास हासं कल्पयामि नमः
57. औं श्रीं लक्ष्म्यै मङ्गळ आरात्रिकं कल्पयामि नमः

नारायणाङ्क निलये सर्वशक्ति समावृते।
आरात्रिकमिदं तुभ्यं गृहाण मम सिद्धये ॥

इति नववारं श्रीदेव्याः आचूडं आचरणाब्जं परिभ्राम्य दक्षभागे स्थापयेत्।

58. औं श्रीं लक्ष्म्यै छत्रं कल्पयामि नमः
59. औं श्रीं लक्ष्म्यै चामरयुगलं कल्पयामि नमः
60. औं श्रीं लक्ष्म्यै दर्पणं कल्पयामि नमः
61. औं श्रीं लक्ष्म्यै तालवृन्तं कल्पयामि नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

62. औं श्रीं लक्ष्म्यै गन्धं कल्पयामि नमः
63. औं श्रीं लक्ष्म्यै पुष्पं कल्पयामि नमः
64. औं श्रीं लक्ष्म्यै धूपं कल्पयामि नमः
65. औं श्रीं लक्ष्म्यै दीपं कल्पयामि नमः

देव्याः पुरतः स्वदक्षिणे चतुरश्रमण्डलं निर्माय - तत्र -आधारोपरि नैवेद्यं निधाय - मूलेन प्रोक्ष्य - वं इति धेनुमुद्रया - अमृतीकृत्य मूलेन त्रिवारं अभिमन्त्र्यय - (आपोशनं दत्वा) हविर्निवेदयेत् ।

66. औं श्रीं लक्ष्म्यै नैवेद्यं कल्पयामि नमः
67. औं श्रीं लक्ष्म्यै उत्तरापोशनं कल्पयामि नमः
68. औं श्रीं लक्ष्म्यै पानीयं कल्पयामि नमः
69. हस्तप्रक्षालनं गण्डूषं - आचमनं - ताम्बूलं च कल्पयामि नमः
70. औं श्रीं लक्ष्म्यै नमः इति मन्त्रेण दशमुद्राः प्रदर्शयेत् ।
71. औं श्रीं महालक्ष्मि श्रीपादुकां पूजयामि तर्पयामि नमः

इति त्रिवारं संतर्पयेत् ।

72. लक्ष्म्याः षडङ्गदेवताः संतर्पयेत् तद्यथा

1. औं श्रीं हृदयाय नमः - हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि नमः।
2. औं श्रीं शिरसे स्वाहा-शिरःशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः।
3. औं श्रीं शिखायै वषट्-शिखाशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः।
4. औं श्रीं कवचाय हुं - कवचशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः।
5. औं श्रीं नेत्रत्रयाय वौषट्-नेत्रशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः।
6. औं श्रीं अस्त्राय फट् - अ स्त्रशक्ति श्रीपादुकां पूजयामि तर्पयामि नमः।

एवं अङ्गानि विन्यस्य-सुरभिमुद्रां प्रदर्श्य - महामुद्रया परमीकुर्यात्। ततः अवारण पूजां कुर्यात् ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री सुक्तेन लक्ष्मीपूजा प्रयोगः (संक्षिप्तक्रमः)

तत्र पूर्वं श्री गणेशं संपूज्य - संप्रार्थ्य - सङ्कल्पयेत् तत्र आदौ-देशकालौ संकीर्त्य-मम श्रुति स्मृति पुराणोक्त फलप्राप्त्यर्थं-आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं-यथोपचारैः लक्ष्मीपूजन महं करिष्ये-इति संकल्प्य ॥

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मताम् ॥

इति हृदि कृत्वा - महालक्ष्मीं ध्यात्वा-वाह्ययजेत्॥ ततो लक्ष्मीप्रतिमायां-स्वर्णाब्जे - कुंभे - यन्त्रे - दीपादिषु वा - श्रीसूक्तस्य - पञ्चदश ऋग्भिः गायत्र्या च - षोडशोपचारैः भगवतीं लक्ष्मीं संपूजयेत् ॥ तद्यथा -

1. हिरण्यवर्णां..... इत्यनेन आवहनम् कृत्वा- ततो -
2. तांम आवह..... इत्यनेन आसनम् दत्वा-
3. अश्वपूर्वां..... इत्यनेन पाद्यम् दत्वा-
4. कांसोस्मितां.....इत्यनेन अर्घ्यम् दत्वा-
5. चन्द्रांप्रभासां.....इत्यनेन आचमनीयम् दत्वा-
6. आदित्यवर्णे..... इत्यनेन ततः पञ्चामृतम् पञ्चोपचारै स्संपूज्य - ततः तेनञ्चमृतेन अभिषेकं कृत्वा - ततः-
7. उपैतुमां......इत्यनेन वस्त्रयुगळं समर्प्य -
8. क्षुत्पिपासां......इत्यनेन कञ्चुकं परिधानं भूषणानि च समर्प्य -
9. गन्धद्वारां..... इत्यनेन गन्धै र्विलिप्य -
10. मनसः कामं....इत्यनेन अक्षतान् सौभाग्यद्रव्याणि च दत्वा-
11. कर्दमेन.......इत्यनेन पुष्पमालां पुष्पार्चणां च विधाय-
12. आपःसृजन्तु.......इत्यनेन धूपं दत्वा आघ्रापयेत्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

13. आर्द्रांपुष्करिणीं..... इत्यनेन दीपं दर्शयेत् -

14. आर्द्रां यःकरिणीं..... इत्यनेन नैवेद्यं फलवर्ग-तांबूलं च निवेद्य-

15. तांम आवह.....इत्यनेन स्वर्णदक्षिणां देव्यैसमर्प्य - ततः

16. श्रीगायत्र्या - (तांम आवह इत्यनेन च) कर्पूरनीराजनं - विधाय

17. तांम आवह.....इत्यनेन मन्त्रपुष्पाञ्जलिम् दत्वा -

18. पूर्णेन्दु प्रतिमद्युतिं निजवतंसेन्द्वंश धाराप्लुता -
भक्तानां कृपया कराग्र विलसद् दिव्यायुधै रापदः।
कूरारि ग्रह भूत रोग विपुल त्रासप्रदां स्तत्क्षणात् -
संह्रुत्याशु तदिष्टदा मिह महालक्ष्मीं सदा भावये ।। इति स्तुत्वा-

19. यः शुचिः प्रयतो इत्यनेन देव्यै प्रदक्षिण नमस्कारं च विधाय

20. नारायणाय जपं निवेदयेत्।।

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु ॥
न्यूनं संपूर्णतां यातु सद्यो वन्दे तमच्युतम् ॥

इत्युक्त्वा "ओं विष्णवे नमः" इति त्रिर्वदेत् ॥ सर्वं ब्रह्मार्पणं इति नारायणाय समर्पयेत् ॥

(इति श्रियः लघुपूजा समाप्ता)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भगवती लक्ष्मी आराधन क्रमः

सर्वालङ्कार संयुक्तः आचार्यः आसनमभ्यर्च्य आसनस्य मेरुपृष्ठ ऋषिः - अतलः छन्दः - कूर्मो देवता - आसने विनियोगः।

पृथ्वी त्वया धृता लोकाः देवि त्वं विष्णु नाधृता।
त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥

ओं श्रीमत् अनन्तासनाय नमः ओं योगासनाय नमः
ओं कमलासनाय नमः ओं वीरासनाय नमः
ओं विमलासनाय नमः ओं कूर्मासनाय नमः

इत्यासनमभ्यर्च्य। त्रिदर्भकृत कूर्चम् आसने निक्षिप्य । तदुपरि उपविश्य । ओं अस्त्राय फट् इति तर्जन्या अग्निप्राकार मुद्रया दशदिग्बन्धनं कृत्वा । ओं रं नमः पराय इति अग्निप्राकारं ध्यात्वा । ओं सहस्त्रार हुं फट् इति चक्रमुद्रया आकाशम् आच्छाद्य ।

ओम् ओम् ओम् इति श्रोत्राचमन पूर्वकं विष्णु गायत्र्या प्राणानायम्य।

ओं नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ॥

सङ्कल्पः

श्री भगवदाज्ञया भगवत् कैङ्कर्यम् श्री गोविन्द गोविन्द गोविन्द अस्य श्री भगवतः महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीय परार्धे श्रीश्वेतवराहकल्पे वैवस्वत मन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतःखण्डे मेरोः दक्षिणेपार्श्वे दण्डकारण्ये शकाब्दे अस्मिन् वर्तमाने व्यावहारिके प्रभवादि षष्ठि संवत्सराणां मध्ये श्री ...... नाम ...... वासरः संवत्सरे ...... ऋतौ ...... मासे ...... शुभतिथौ .... वासर युक्तायां .... नक्षत्र युक्तायां - श्रीविष्णुयोग - श्रीविष्णु करण, शुभयोग - शुभकरण एवङ्गुण सकल विषेशण विशिष्टायां अस्यां - वर्तमानायां .... शुभतिथौ - श्री भगवदाज्ञया - भगवत् कैङ्कर्य -

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अस्य देवदेवस्य, भगवतो नारायणस्य, श्रीमतः पुरुषोत्तमस्य, समस्त जगदुदय समृद्धिविधि विलय विधायकारण कर्तृभूत पुण्डरीकाक्षस्य - श्रीमत् त्रैलोख्यनायकस्य - कर्मोत्सव बलि स्नान तीर्थ शयनेति षड्वेर स्वरूपस्य - आदिमध्यान्त रहितस्य - सकल मनुज नयन विशताङ्गत अभिमत अर्चारूपेण अवतीर्णस्य - परब्रह्मणो वासुदेवस्य - अनन्त - गरुड - विष्वक्सेन - सुदर्शनाद्यपरिमित नित्यसूरि परिवार सेव्यमानस्य - पराङ्कुश - परकाल - यतिवरादि - समस्त भक्तकोटि नमित पादपद्मस्य - अस्मिन्क्षेत्रे - विराजमानस्य - श्री भूमि नीला .... नायिका समेत श्री .... स्वामि सन्निधौ, राज राष्ट्र अभिवृद्ध्यर्थं, लोकक्षेमार्थं, नित्याराधनं करिष्ये - तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये इति सङ्कल्प्य । अप उपस्पृश्य ।।

महालक्ष्म्युत्सव करणे फलम्

एवं बहुविधा देवि ह्युत्सवाः सन्ति भामिनि।
प्राधान्यतोऽहमवदतेष्वन्यतमं तु यः ॥ 63॥

करोति भक्त्या तस्याहं प्रसन्नः सम्पदायुषम्।
पुत्रपौत्रादिवृद्धिं च ज्ञानं चापि महत्तरम् ।
ददामि चान्ते मल्लोकं वैकुण्ठपदमाप्नुयात् ॥64 ॥ - श्रीप्रश्ने-48

वीरलक्ष्मीपूजा - विशेषदिन निरूपणम्

अष्टंयांच चतुर्दश्यां नवम्यां भृगुवासरे।
पूर्णिमायाममायांच वीरलक्ष्म्याः प्रपूजने॥ 155॥

सहस्रनामभिस्तस्या हरिद्राचूर्ण कुङ्कुमैः।
धनधान्याभिवृद्धिश्च वैकुण्ठ प्राप्तिच ध्रुवम् ॥ 156॥ परमपुरुषे-4

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अर्घ्यादि पात्र स्थापन क्रमः



स्नपन कलश स्थापन क्रमः

क्षीरम् 6	आचमनम् 3	मधु 7
अर्घ्यम् 2	घृतम् 9	पञ्चगव्यम् 4
दधि 5	पाद्यम् 1	फलाम्बु 8

स्नपन कलश उत्तापन क्रमः

6	3	7
2	9	4
5	1	8

प्राची



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मूलबेर महाविष्णोः पूजनम्

सुरसिद्धादिपूजितं हृदयस्थं हरिम् ओं नमो भगवते वासुदेवाय इति तुलसीं मूलबेरस्य मूर्ध्नि समर्प्य। सुस्थितो भव। अभिमुखो भव। इति प्रार्थ्य। प्रतिमामुद्रां प्रदर्श्य। नाभ्यादि हृदयान्तं द्वादशाक्षरेण स्थितिन्यासं कृत्वा। किरीट – कुण्डल – वनमाल - चक्र - शङ्ख - श्रीवत्स - कौस्तुभ - पद्म - गदा – मुसल – खड्ग – शार्ङ्ग - अनन्त - गरुड - विष्वक्सेनमुद्राः प्रदर्श्य। मूलबेरस्य वक्षस्थले योगलक्ष्मीं सम्पूज्य। ओं योगलक्ष्म्यै नमः इत्यभ्यर्च्य। ओं श्रामित्यादि षडङ्गन्यासं कृत्वा। किरीट-कमल-वनमाल मुद्राः प्रदर्श्य।

मूलबेर श्रीदेव्याः पूजनम्

ओं श्रीं श्रियै नमः इति पूर्ववत् हृदयस्थां बिम्बे विचिन्त्य। सुस्थिता भव। अभिमुखी भव। इति प्रार्थ्य। प्रतिमा मुद्रां प्रदर्श्य।

ओं श्रां हृदयाय नमः — ओं श्रैं कवचाय हुं

ओं श्रीं शिरसे स्वाहा — ओं श्रौं नेत्राभ्यां वौषट्

ओं श्रूं शिखायै वषट् — ओं श्रः अस्त्राय फट्

इति षडङ्गन्यासं कृत्वा। किरीट – कमल - वनमाल मुद्राः प्रदर्श्य।

मूलबेर भूमिदेव्याः पूजनम्

ओं ह्रीं भूम्यै नमः इति पूर्ववत् हृदयस्थां बिम्बे विचिन्त्य। सुस्थिता भव। अभिमुखी भव। इति प्रार्थ्य। प्रतिमामुद्रां प्रदर्श्य।

ओं ह्रां हृदयाय नमः — ओं ह्रैं कवचाय हुं

ओं ह्रीं शिरसे स्वाहा — ओं ह्रौं नेत्राभ्यां वौषट्

ओं ह्रूं शिखायै वषट् — ओं ह्रः अस्त्राय फट्

इति षडङ्गन्यासं कृत्वा। किरीट – कमल - वनमाल मुद्राः प्रदर्श्य।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री आदिलक्ष्मी

श्री धान्यलक्ष्मी

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



श्री धैर्यलक्ष्मी



श्री गजलक्ष्मी

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



श्री सन्तानलक्ष्मी



श्री विजयलक्ष्मी

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



श्री विद्यालक्ष्मी

श्री धनलक्ष्मी

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

देव्यालये लक्ष्म्याः आराधन क्रमः

अथ परतन्त्रवीरलक्ष्म्याः समाराधन विधिरुच्यते। आचार्यः पूर्ववत् नित्यकर्मादिकं कृत्वा। महालक्ष्म्यालयमासाद्य । द्वाराद्बहिः गरुडं – चण्डीं – प्रचण्डीं ध्यात्वा। हस्ततालत्रय पूर्वकम् ओं यं वायवे नमः इति कवाटमुद्धाट्य । दक्षिणाङ्घ्रिणा अन्तः प्रविश्य । दीपान् प्रज्वाल्य । ओं श्रीं श्रियै नमः इति महालक्ष्मीं साष्टाङ्गं प्रणम्य। पूर्वदिनार्पित गन्धमाल्यादीनि परिहृत्य । ओं श्रीं श्रियै नमः उत्तिष्ठ उत्तिष्ठ इति शयनदेवीं उत्थाप्य । तत् शक्तिं मूले नियोज्य। विविधैः स्तोत्रैः स्तुत्वा । स्थलशुद्ध्यादीनि कृत्वा । द्वारपरिवारार्चनं कुर्यात्॥

गर्भगृहद्वारे - ओं चण्ड्यै नमः | ओं प्रचण्ड्यै नमः

अर्धमण्डपद्वारे - ओं बलाकिन्यै नमः | ओं वनमालायै नमः

महामण्डपद्वारे - ओं जयायै नमः | ओं विजयायै नमः

विमाने - ओं महालक्ष्म्यै प्रासादरूपिण्यै हुं फन्नमः

विमानस्य प्रागादि चतुर्दिक्षु - 1. तुष्ट्यै नमः 2. पुष्ट्यै नमः
3. ओं सावित्र्यै नमः 4. ओं वाग्देव्यै नमः

अग्रे - ओं गरुडाय नमः ।

ऐशान्ये- ओं सुमुख्यै नमः ।

इति गन्ध - पुष्प - धूप - दीपैः अभ्यर्च्य । आसनं कल्पयित्वा। तदुपरि उपविश्य। प्रणायामपूर्वकं सङ्कल्प्य । श्रीगोविन्द .... अस्याः देवदेव्याः - जगज्जनन्याः - श्रीवत्स वासिन्याः - पुरुषाकार स्वरूपिण्याः - भगवत्याः - महालक्ष्म्याः .... नायक्याः सन्निधौ - राजराष्ट्राभिवृद्ध्यर्थं - लोकक्षेमार्थं - नित्याराधनं करिष्ये - तदङ्गं भूतशुद्ध्यादि मानसयागान्तं करिष्ये - इति सङ्कल्प्य । पूर्ववत् भूतशुद्धिं कुर्यात् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

चतुरश्रभूमण्डलाय अनन्ताय नमः । ओं भूं भूम्यै नमः । ओं धर्माय नमः । ओं ज्ञानाय नमः। ओं वैराग्याय नमः । ओं ऐश्वर्याय नमः । ओं अव्यक्तपद्माय नमः इत्यभ्यर्च्य । धूपदीपै समर्प्य।

मन्त्रासनम्

पद्मासने सुखासीनां पूर्णचन्द्रायुतप्रभाम् ।
मन्दस्मित मुखाम्भोजां पीतवर्णां चतुर्भुजाम् ।
भक्तानां मुख्यहस्ताभ्यां अभीति वरदायिनीम् ।
लीलार्थमन्य हस्ताभ्यां दिव्यपङ्कज धारिणीम् ॥

इति ध्यात्वा - मूलबेरे ओं श्रीं श्रियै नमः सुस्थिता भव - अभिमुखी भव - इति प्रार्थ्य - प्रतिमामुद्रां प्रदर्श्य - ओं श्रामित्यादि षडङ्गन्यासं कृत्वा - किरीट- कमल – वनमाला मुद्राः प्रदर्श्य - ओं श्रीं श्रियै नमः मन्त्रासनं - समर्पयामि इति प्रार्थ्य - पूर्ववत् अर्घ्यादिभिरभ्यर्च्य - हस्त मुख पाद शाटीं समर्प्य - मधुपर्कं साष्टाङ्गप्रणामञ्च कृत्वा - योगासनाब्जपत्रेषु पूर्वादिषु अष्टदलेषु

1. ओं वीरलक्ष्म्यै नमः
2. ओं धनलक्ष्म्यै नमः
3. ओं सन्तानलक्ष्म्यै नमः
4. ओं जयलक्ष्म्यै नमः
5. ओं धान्यलक्ष्म्यै नमः
6. ओं धैर्यलक्ष्म्यै नमः
7. ओं राजलक्ष्म्यै नमः
8. ओं महालक्ष्म्यै नमः

इत्यभ्यर्च्य । धूपदीपं समर्प्य ।

श्रियाः कर्मार्चादिविम्बानां पूजनम्

पूर्ववत् अर्घ्यपात्रात् श्रीमन्त्रेण आवाहनपात्रे जलमादाय । तुलसीं निक्षिप्य । नासिकाग्रान्तमुद्धृत्य।

सर्वलक्षणसम्पन्नां सद्रत्नमकुटोज्वलाम् ।
पद्म ताटङ्क विकसत्कर्णद्वय मनोहराम्।
अर्धचन्द्रप्रतीकाश ललाटतिलकोज्ज्वलाम्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

चतुर्भुजां सुन्दराङ्गीं मन्दस्मितमनोहराम् ।
पद्मगर्भप्रतीकाशां नानाभूषणभूषिताम् ।
हस्ताभ्यामाश्रितवताम् अभीष्टवरदायिनीम् ।
अपराभ्यां च हस्ताभ्यां दधानां रक्तपङ्कजे ।
पद्मासने सुखासीनां तस्मात् कर्मणि कौतुके ॥

ओं श्रीं श्रियै नमः आगच्छ आगच्छ इति मूलबेरादावाह्य । पात्रस्थां कर्मबिंबे विचिन्त्य। तुलसीं कर्मबिम्बस्य मूर्ध्नि समर्प्य । आवाहनादि षण्मुद्राः प्रदर्श्य । आवाहिता भव। स्थापिता भव । सन्निधा (हिता) भव । सन्निरुद्धा भव । साम्मुख्या भव । प्रार्थिता भव । प्रतिमामुद्रां प्रदर्श्य । ओं श्रामित्यादि षडङ्गन्यासं कृत्वा । किरीट- कमल - वनमाल मुद्राः प्रदर्श्य । मखार्चायाम् - ओं पद्ममालिन्यै नमः । बलिबेरे - ओं कीर्त्यै नमः । स्नपनबेरे - ओं जयायै नमः । तीर्थबिम्बे - ओं मायायै नमः । शयनबिम्बे - ओं श्रियै नमः इति क्रमेणावाह्य । ओं श्रीं श्रियै नमः मन्त्रासनं समर्पयामि इति सर्वत्र प्राथ्यं । पूर्ववत् अर्घ्यं पाद्यादि परिवारार्चनान्तं सर्वं कृत्वा । धूपदीपै समर्प्य ।

स्नानासनम्

नमामि देवीं लोकानां जननीं अब्धिसम्भवे ।
सर्व लोकेश्वरश्रीश-वल्लभे दुर्लभोपमे ।
वासुदेवाङ्गसंस्पर्श-सुखैक-रसभाजिते ।
आसादयाशु स्नानार्थं मदनुग्रहकाम्यया ॥

ओं श्रीं श्रियै नमः स्नानासनं समर्पयामि इति सर्वत्र प्राथ्यं । पूर्ववत् पादुकारोहणं स्मृत्वा " इदं विष्णुः" इति मन्त्रेण पादुकां अभिषिच्य । स्नपनदेवीं स्नानासन वेदिकायां निवेश्य । भगवदाराधनवत् दन्तधावनं-जिह्वानिर्लेखनं - हस्त मुख पादशाटीं - गण्डूषं - मुखमञ्जनं - हरिद्रास्नानं - गन्धाभिषेचनं – कुङ्कुमाभिषेचनं महाभिषेचनं सहस्रधारास्नपनञ्च -

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीसूक्तमुच्चरन् सर्वं कृत्वा - प्लोतवस्त्र - अङ्गाम्बुमार्जनं - धौत - निर्मलवस्त्रद्वय समर्पणञ्च तत्तन्मन्त्रेण समर्प्य - अर्घ्यादिभिः अभ्यर्च्य ।

अलङ्कारासनम्

ओं श्रीं श्रियै नमः अलङ्कारासनं समर्पयामि इति सर्वत्र प्रार्थ्य - सर्वेभ्यः अर्घ्यादिभिः अभ्यर्च्य - भगवदाराधनवत् गन्धं पुष्पं-अक्षतारोपणं - सर्वाभरणम् – अञ्जनं – दर्पणदर्शनञ्च भूसूक्तमुच्चरन् कृत्वा - धूप-दीप- नक्षत्रदीपञ्च तत्तन्मन्त्रेण समर्प्य । मन्त्रपुष्पं पठित्वा । घटदीपै समर्प्य । अर्घ्यादिभिः अभ्यर्च्य ।

भोज्यासनम्

ओं श्रीं श्रियै नमः भोज्यासनं समर्पयामि इति सर्वत्र प्रार्थ्य । सर्वेभ्यः अर्घ्यादिभिः अभ्यर्च्य । मधुपर्कं समर्प्य । ओं इति अर्हणं दत्वा । देव्याः पुरतः स्थलानि संशोध्य। तन्मध्ये सर्वविध भक्ष्य भोज्यानि विनिवेश्य। अस्त्रायफट् इति प्रोक्ष्य। शोषणादीनि कृत्वा । ओं सुं सुरभ्यै नमः इति सुरभिमुद्रया अमृतीकृत्य । कवचाय हुं इति परिषिच्य । तुलसीं निक्षिप्य । अन्वारब्ध सव्येन प्रगृहीत अर्घ्यपुष्पेण दक्षिण करेण दर्शित ग्रासमुद्रया सह

ओं देवस्यत्वा सवितुः प्रसवे - अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णातु ॥ ओं श्रीं श्रियै नमः क्षीरगुलपायसान्नं गृहाण स्वाहा इति मूलबेरात् सर्वेभ्यः निवेद्य । पानकपानीयं – ताम्बूलम् - आचमनीयञ्च समर्प्य । हस्तमुख पादशाटीं समर्प्य । नीराज्य । मखार्चया सह पचनालयं प्रविश्य। पूर्ववत् अग्न्याराधनं कुर्यात्। ओं श्रीं श्रियै स्वाहा इति समिधा शतवारं तदर्थं तदर्थं वा हुत्वा। पुरुषसूक्तेन चरुणा षोडशाहुतीर्हुत्वा । सर्पिषा श्रीमन्त्रेण पूर्वोक्त सङ्ख्यां हुत्वा । स्विष्टकृद्धवनं – प्रायश्चित्तहवनं पूर्णाहुतीञ्च हुत्वा । सन्निधौ – देव्याः पादयोः होमफलं

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

समर्प्य। ततः बलिबेरदेवीं शिबिकायां आरोप्य। सर्वविध वाद्य वेद घोषेण सह नित्योत्सवाख्यबलिं कारयेत्।

गर्भगृहद्वारे - ओं चण्ड्यै नमः

अर्धमण्डपद्वारे - ओं विभीषिकायै नमः & ओं वनमालायै नमः

महामण्डपद्वारे - ओं जयायै नमः & ओं विजयायै नमः

महाबलिपीठे - ओं सर्वाभ्यो श्रीमहालक्ष्मि पार्षदाभ्यो नमः

इति निरवशिष्टं बलिं दद्यात्। भगवन्नित्योत्सववत् बलिदान - बलिबेरनिवेदन - घटदीप - नीराजनञ्च कुर्यात्। बलिबेरदेवीं गर्भगृहे निवेश्य। पूर्ववत् अक्षमालया श्रीमन्त्रं जप्त्वा । नीराज्य। वेद इतिहास पुराण दिव्यप्रबन्धादीन् समर्पणं कृत्वा । सर्वेभ्यः तीर्थं पादुकाञ्च दत्त्वा। एवं त्रिसन्ध्यां संपूज्य । इतरकालेषु यथाशक्ति होमान्तपूजनं कृत्वा।

शयनासनम्

अर्धरात्रौ पूजासमये होमान्तं सम्पूज्य । कर्मार्चादि बिम्बगत शक्तिं मूले नियोज्य। ओं श्रीं श्रियै नमः शयनासनं समर्पयामि इति सर्वत्र प्रार्थ्य। भगवत्पर्यङ्कवत् शयनं कल्पयित्वा । पूर्ववत् संपूज्य । तस्यां शयनदेवीं शाययित्वा। मङ्गलवाद्यानि वादयित्वा । कवचमन्त्रेण शनैः शनैः कवाटबन्धनं कुर्यात्। द्वारे सुदर्शनात्मिकां विजयां ध्यात्वा । प्रादक्षिण्येन स्वगृहं प्रविशेत्॥

इति श्रियालय वीरलक्ष्म्याः समाराधनं सम्पूर्णम्

(पाञ्चरात्रागमे - श्रीप्रश्नसंहितायाम्)



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्मीसंक्षेपार्चनम् (लघुपूजा)

आवाहने लक्ष्मीरूप ध्यानम्

पूजाङ्गम्

अरुण कमल संस्था तत्रजःपुञ्ज वर्णा-
करकमल धृतेष्टा अभीति युग्मांबुजा च ।
मणिमकुट विचित्रा लङ्कृता कल्पजालैः-
भवतु भुवन माता सन्ततं श्री श्रियै नः ॥

आवाहये महालक्ष्मी चैतन्य स्तन्य दायिनी ।
विष्णुपत्नी जगन्मातः पूजां गृह्णीष्व ते नमः ॥ 1
ओं श्रीं महालक्ष्म्यै नमः आवाहयामि ॥

तप्तकाञ्चन वर्णाभं मुक्तामणि विराजितम् ।
अमलं कमलं दिव्यं आसनं प्रतिगृह्यताम् ॥ 2
ओं श्रीं महालक्ष्म्यै नमः आसनं समर्पयामि ॥

गङ्गादि सर्वतीर्थेभ्यो मया प्रार्थनयाऽऽहृदम् ।
तोयमेतत् सुखस्पर्शं पाद्यार्थं प्रतिगृह्यताम् ॥ 3
ओं श्रीं महालक्ष्म्यै नमः पाद्यं समर्पयामि ॥

अष्टगन्ध समायुक्तं स्वर्णपात्र प्रपूरितम् ।
अर्घ्यं गृहाण मद्दत्तं महालक्ष्मि नमोऽस्तु ते ॥ 4
ओं श्रीं महालक्ष्म्यै नमः अर्घ्यं समर्पयामि ॥

कर्पूरेण सुगन्धेन सुरभि स्वादु शीतलम् ।
तोय माचमनीयार्थं देवि त्वं प्रतिगृह्यताम् ॥ 5
ओं श्रीं महालक्ष्म्यै नमः आचमनीयं समर्पयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मधुपर्कं मया दत्तं काञ्ची नूपुर शोभिते ।
स्वीकृत्य दयया देवि कुरु मह्यं तु मङ्गलम् ॥ 6
ओं श्रीं महालक्ष्म्यै नमः मधुपर्कं समर्पयामि ॥

पञ्चामृतं इदं दिव्यं पञ्च पातक नाशनम् ।
पञ्चभूतात्मिके देवि पाहि स्वीकृत्य शङ्करी ॥ 7
ओं श्रीं महालक्ष्म्यै नमः (श्रीमज्जनंकारयित्वा-भावनया
वा कृत्वार्चयेत्) पञ्चामृत स्नानं समर्पयामि ॥

स्नास्य तां पापनाशाय - या प्रवृत्त सुरापहाम् ।
मयाऽर्पिता त्वं गृह्णीष्व प्रीता भव दयानिधे ॥ 8
ओं श्रीं महालक्ष्म्यै नमः शुद्धोदक स्नानं समर्पयामि॥

दिव्यांबरयुगं सूक्ष्मं कञ्चुकं च मनोहरम् ।
महालक्ष्मि महादेवि गृहणेदं मयार्पितम् ॥
(अथवा)
सर्वभूषादिके सौम्ये लोकलज्जा निवारणे ।
वाससि प्रतिगृह्येतां मया तुभ्यं समर्पिते ॥ 9
ओं श्रीं महालक्ष्म्यै नमः वस्त्र कञ्चुकांबर युगलं समर्पयामि ॥

उपवीतं मया प्रीत्या काञ्चनेन विनिर्मितम् ।
गृहीत्वा त्वयि भक्तिं मे प्रयच्छ करुणानिधे ॥ 10
ओं श्रीं महालक्ष्म्यै नमः हैमयज्ञोपवीतं समर्पयामि॥

श्रीकण्ठ चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
सुलेपनं सुरश्रेष्ठे प्रीत्यर्थे प्रतिगृह्यताम् ।। 11
ओं श्रीं महालक्ष्म्यै नमः सुगन्धलेपनं समर्पयामि।।

सिन्दूरारुण वर्णा च सिन्दूर तिलकप्रिये ।
अतो दत्तं मया देवि सिन्दूरं प्रतिगृह्यताम् ॥ 12

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं श्रीं महालक्ष्म्यै नमः सिन्दूर कस्तूरि मृगमद –
कुंकुम तिलकं कल्पयामि ॥

माङ्गल्यं मणिसंयुक्तं मुक्ताविद्रुम संयुतम् ।
दत्तं मङ्गलसूत्रं ते गृहाण हरिवल्लभे ॥ 13
ओं श्रीं महालक्ष्म्यै नमः मङ्गलसूत्रं समर्पयामि ॥

रत्नकंकण वैडूर्यं मुक्ताहारादिकानि च ।
सुप्रसन्नेन मनसा दत्तानि त्वं गृहाण मे ॥ 14
ओं श्रीं महालक्ष्म्यै नमः कङ्कणाद्याभरणानि-समर्पयामि ॥

जाती चंपक पुन्नाग केतकी वकुलानि च ।
मायार्पितानि सुभगे गृहाण जगदंबिके ॥ 15
ओं श्रीं महालक्ष्म्यै नमः पुष्पाणि समर्पयामि ॥

मन्दार पारिजाताद्या पाटली केतकी तथा ।
मघदं कुरवं चैव गृहाण सुमनोहरम् ॥ 16
ओं श्रीं महालक्ष्म्यै नमः पुष्पैः सर्वाङ्गानि-पूजयामि ॥

लक्ष्मीअङ्गपूजा तद्यथा –

1. ओं चपलायै नमः पादौ पूजयामि ॥
2. ओं चञ्चलायै नमः जानुनी पूजयामि ॥
3. ओं कमलायै नमः कटिं पूजयामि ॥
4. ओं पद्मायै (कात्यायन्यै)नमः नाभिं पूजयामि ॥
5. ओं जगन्मात्रे नमः जठरं पूजयामि ॥
6. ओं विष्णुवल्लभायै नमः वक्षः पूजयामि ॥
7. ओं कमलवासिन्यै नमः भुजद्वयं पूजयामि ॥
8. ओं पद्मनिलयायै नमः मुखं पूजयामि ॥
9. ओं कमलपत्राक्ष्यै नमः नेत्रद्वयं पूजयामि ॥
10. ओं श्रियै नमः शिरः पूजयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सर्वाण्यङ्गानि पूजयामि अत्र विशेष नामार्चनानि विधाय ॥
8/12/24/54/108/300/324/329/1000/1108)
लक्ष्मीं अष्टोत्तरशतनामभिः अर्चयेत् ॥

केतकि मालती जाती चम्पको त्पल केसरैः ।
मल्लिका तुलसी जातैः नन्द्यावर्त कदम्बकैः ॥
एतै रन्यैश्च कुसुमैः लक्ष्मीं संपूजयेत् सदा ।
इति वचनप्रकारेण विविधपुष्पैः श्रियमर्चयेत् ।

वनस्पति रसोत्पन्नो गन्धाढ्यो गन्ध उत्तमम् ।
आघ्रेयस्सर्व देवानां धूपोऽयं प्रतिगृह्यताम्। 17
ओं श्रीं महालक्ष्म्यै नमः सुगन्ध धूपं आघ्रापयामि ॥

कर्पूर वर्तिसंयुक्तं घृतयुक्तं मनोहरम् ।
तमोनाशकरं दीपं गृहाण परमेश्वरी ॥ 18
ओं श्रीं महालक्ष्म्यै नमः दीपं दर्शयामि ॥

नैवेद्यं गृह्यतां लक्ष्मि भक्ष्य भोज्य समन्वितम् ।
षड्रसै रचितं दिव्यं लक्ष्मिदेवि नमोऽस्तु ते ॥

(अथवा)

बहुभक्ष्य समायुक्तं नाना फल समन्वितम् ।
नैवेद्यं गृह्यतां देवि नारायण कुटुंबिनि ॥
ओं श्रीं महालक्ष्म्यै नमः गुडान्नादिकं फल-
भक्ष्यादिकं निवेदयामि निवेदनानन्तरं आचमनीयं - समर्पयामि ॥

पूगीफल समायुक्तं नागवल्ली दलैर्युतम् ।
कर्पूरचूर्ण संयुक्तं तांबूलं प्रतिगृह्यताम् ॥ 20
ओं श्रीं मुखवास तांबूलं समर्पयामि ॥

नीराजनं नीरजाक्षि नारायण विलासिनी ।
गृह्यता मर्पितं भक्त्या गरुडध्वज भामिनी ॥ 21

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं श्रीं महालक्ष्म्यै नमः कर्पूर नीराजनं दर्शयामि
नीराजनानन्तरं आचमनीयं समर्पयामि ॥

पुष्पाञ्जलिं गृहाणेमं पुरुषोत्तम वल्लभे ।
भक्त्या समर्पितं देवि सुप्रीता भव सर्वदा ॥ 22
ओं श्रीं महालक्ष्म्यै नमः पुष्पाञ्जलिं समर्पयामि ॥

नमोऽस्तु नालीक निभाननायै
नमोऽस्तु नारायण वल्लभायै ॥
नमोऽस्तु रत्नाकर संभवायै
नमोऽस्तु लक्ष्म्यै जगतां जनन्यै ॥ 23
ओं श्रीं महालक्ष्म्यै नमः स्तोत्रवन्दनं समर्पयामि ॥

सर्वमङ्गल लाभाय सर्वपाप निवृत्तये ।
प्रदक्षिणं करोम्यद्य प्रसीद परमेश्वरी ॥ 24
ओं श्रीं महालक्ष्म्यै नमः प्रदक्षिण नमस्कारान्-समर्पयामि ॥

आयु रारोग्य मैश्वर्यं पुत्र पौत्रादिकान् वरान्
शत्रुक्षयं महालक्ष्मि प्रयच्छ करुणानिधे ॥

पद्मासने पद्मकरे सर्वलोकैक पूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥ 25
ओं श्रीं महालक्ष्म्यै नमः अभीष्ठप्रार्थनां निवेदयामि॥

पञ्च चत्वारिम्शदहं एवं कुर्यात् दिनेदिने ।
तां म आवहमन्त्रेण कृत्वाऽवाहनमादितः ॥
उपचारैः षोडशाभिः यथा विभवविस्तरम् ।
नीराजयेन्नमस्कुर्यात् ततो देवीं विसर्जयेत् ॥
इत्युक्तवत् - पूजान्तेश्रियं विसृज्यध्यायेत्
(इति लक्ष्मी संक्षेपार्चनं सम्पूर्णम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रियः क्षीर तर्पणविधिः प्रयोगः।

(एतत् विस्तरस्तु शारदातिलके द्रष्टव्यः)

परिषिञ्चत् शिरो नित्यं श्रीसूक्तैः स्नान कर्मणि ॥
आदित्याभिमुखो जप्त्वा यावत् तावच्च तर्पयेत् ॥

ओं श्रियं	तर्पयामि	ओं ईश्वरीं	तर्पयामि
ओं लक्ष्मीं	तर्पयामि	ओं भुक्तिं	तर्पयामि
ओं वरदां	तर्पयामि	ओं प्रभूतिं	तर्पयामि
ओं विष्णुपत्नीं	तर्पयामि	ओं विश्वभूतिं	तर्पयामि
ओं वल्लभां	तर्पयामि	ओं ऋद्धिं	तर्पयामि
ओं हिरण्यरूपां	तर्पयामि	ओं समृद्धिं	तर्पयामि (20)
ओं सुवर्णमालिनीं	तर्पयामि	ओं तुष्टिं	तर्पयामि
ओं पद्मवासिनीं	तर्पयामि	ओं धनेश्वरीं	तर्पयामि
ओं पद्महस्तां	तर्पयामि	ओं शुद्धां	तर्पयामि
ओं पद्मप्रियां	तर्पयामि (10)	ओं भोगिनीं	तर्पयामि
ओं मुक्तालंकारां	तर्पयामि	ओं भोगतां	तर्पयामि
ओं सूर्यां	तर्पयामि	ओं धात्रीं	तर्पयामि
ओं चन्द्रां	तर्पयामि	ओं हरिणीं	तर्पयामि (27)
ओं विश्वप्रियां	तर्पयामि		

इति कुर्चे आवाह्य श्रियं संतर्पयेत्। ततो विसृजेत्।

(इति श्रियः क्षीरतर्पणं समाप्तम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्म्याः पञ्चावरण देवता नामार्चनम्

ओं श्रीं लक्ष्म्यै नमः श्री देव्याः श्रीपादुकां पूजयामि- तर्पयामि नमः एवं सर्वासां देवतानां, नाममन्त्रेण संपूज्य - तदन्ते कीर्तयेत् - प्रति आवरण पूजान्ते पुष्पाञ्जलिमादाय मूलमन्त्रमुच्चार्य -

ओं अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।।

इति पठित्वा - पुष्पाञ्जलिं च दत्वा पूजिता: तर्पिताः सन्तु इति वदेत्॥ (एवं सर्वत्र वदेयुः)

प्रथमावरणे पूजनीयाः

1. प्रथम: पक्ष: (षडङ्गदेवता:)

1. ओं श्रां हृदयदेव्यै नमः
2. ओं श्रीं शिरोदेव्यै नमः
3. ओं श्रूं शिखादेव्यै नमः
4. ओं श्रैं कवचदेव्यै नमः
5. ओं श्रौं नेत्रदेव्यै नमः
6. ओं श्रः अस्त्रदेव्यै नमः

2. द्वितीय: पक्ष: (षडङ्गमन्त्रा: 6)

1. ओं श्रां हृदयाय नमः
2. ओं श्रीं शिरसे नमः
3. ओं श्रूं शिखायै नमः
4. ओं श्रैं कवचाय नमः
5. ओं श्रौं नेत्रेभ्यो नमः
6. ओं श्रः अस्त्राय नमः

3. तृतीय: पक्ष: (श्रीसूक्तश्रिय: 6)

1. ओं हिरण्मय्यै नमः
2. ओं चन्द्रायै नमः
3. ओं रजतस्रजायै नमः
4. ओं हिरण्यस्रजायै नमः
5. ओं हिरण्यायै नमः
6. ओं हिरण्यवर्णायै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

4. चतुर्थः (सूक्तनामानि 6)

1. ओं हिरण्यायै नमः
2. ओं चन्द्रायै नमः
3. ओं रजतस्रजायै नमः
4. ओं पद्मवर्णायै नमः
5. ओं पद्मस्थायै नमः
6. ओं हिरण्यवर्णायै नमः

5. पञ्चमः पक्षः (उपाङ्गमूर्तयः 6)

1. ओं हेमाब्ज युगलाय नमः
2. ओं बिल्वफलाय नमः
3. ओं रत्नकुंभाय नमः
4. ओं धनपूरित पात्राय नमः
5. ओं वाहन हंसाय नमः
6. ओं करधृतशस्त्रेभ्यो नमः

6. षष्ठः पक्षः (6)

1. ओं शङ्खनिधये नमः
2. ओं पद्मनिधये नमः
3. ओं कल्पवृक्षाय नमः
4. ओं बिल्ववृक्षाय नमः
5. ओं श्री गजेभ्यो नमः
6. ओं दीपचामर नारीभ्यो नमः

अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्।।
(इत्युक्त्वा पुष्पाञ्जलिं दत्वा पूजितास्तर्पितास्सन्तु इति वदेत्)

द्वितीयावरणे पूजनीयाः

1. प्रथमः पक्षः

1. ओं श्रीं विभूत्यै नमः
2. ओं श्रीं उन्नत्यै नमः
3. ओं श्रीं कान्त्यै नमः
4. ओं श्रीं हृष्ट्यै नमः
5. ओं श्रीं कीर्त्यै नमः
6. ओं श्रीं सन्नत्यै नमः
7. ओं श्रीं व्युष्टयै नमः
8. ओं श्रीं उत्कृष्टयै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

2. द्वितीयः पक्षः (अष्टदळेषु अष्टसिद्धयः)

1. ओं अणिमायै नमः
2. ओं महिमायै नमः
3. ओं गरिमायै नमः
4. ओं लघिमायै नमः
5. ओं प्राप्त्यै नमः
6. ओं प्राकाम्यै नमः
7. ओं ईशिन्यै नमः
8. ओं वशिन्यै नमः

3. तृतीयपक्षः (बलादिशक्तयः)

1. ओं बलायै नमः
2. ओं बलाकिन्यै नमः
3. ओं विमलायै नमः
4. ओं वनमालिकायै नमः
5. ओं विभीषिकायै नमः
6. ओं मल्लिकायै नमः
7. ओं शङ्कर्यै नमः
8. ओं वसुमालिकायै नमः

4. चतुर्थः पक्षः (पद्मादि मन्त्रश्रीः)

1. ओं पद्मायै नमः
2. ओं पद्मवर्णायै नमः
3. ओं पद्मस्थायै नमः
4. ओं आर्द्रपद्मायै नमः
5. ओं तर्पयन्त्यै नमः
6. ओं तृप्त्यै नमः
7. ओं ज्वलन्त्यै नमः
8. ओं स्वर्णप्राकारायै नमः

5. पञ्चमः पक्षः (धरादिमूर्तयः (कोणेविदिक्षु) श्रीधरा

1. ओं श्रीं श्रीधराय नमः
2. ओं श्रीं हृषीकेशाय नमः
3. ओं श्रीं वैकुण्ठाय नमः
4. ओं श्रीं विश्वरूपाय नमः
5. ओं श्रीं वासुदेवाय नमः
6. ओं श्रीं सङ्कर्षणाय नमः
7. ओं श्रीं प्रद्युम्नाय नमः
8. ओं श्रीं अनिरुद्धाय नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

6. षष्ठः पक्षः (अष्टलक्ष्म्यः)

1. ओं आदिलक्ष्म्यै नमः
2. ओं धान्यलक्ष्म्यै नमः
3. ओं धैर्यलक्ष्म्यै नमः
4. ओं गजलक्ष्म्यै नमः
5. ओं सन्तानलक्ष्म्यै नमः
6. ओं विजयलक्ष्म्यै नमः
7. ओं धनलक्ष्म्यै नमः
8. ओं सिद्धिलक्ष्म्यै नमः

7. सप्तमःपक्षः (व्याप्त्यादिशक्तयः 8)

1. ओं व्याप्त्यै नमः
2. ओं कान्त्यै नमः
3. ओं तृप्त्यै नमः
4. ओं श्रद्धायै नमः
5. ओं विद्यायै नमः
6. ओं जयायै नमः
7. ओं क्षमायै नमः
8. ओं पुष्ट्यै नमः

8. अष्टमः पक्षः (आकर्षणीशक्तयः 8)

1. ओं धनाकर्षिण्यै नमः
2. ओं सर्वाकर्षिण्यै नमः
3. ओं संपदाकर्षिण्यै नमः
4. ओं सौभाग्याकर्षिण्यै नमः
5. ओं स्वर्णाकर्षिण्यै नमः
6. ओं शक्त्याकर्षिण्यै नमः
7. ओं मङ्गलाकर्षिण्यै नमः
8. ओं सर्वजनाकर्षिण्यै नमः

9. नवमः पक्षः (अष्टलक्ष्म्यः)

1. ओं आदिलक्ष्म्यै नमः
2. ओं विद्यालक्ष्म्यै नमः
3. ओं सौभाग्यलक्ष्म्यै नमः
4. ओं अमृतलक्ष्म्यै नमः
5. ओं कामलक्ष्म्यै नमः
6. ओं सत्यलक्ष्म्यै नमः
7. ओं भोगलक्ष्म्यै नमः
8. ओं योगलक्ष्म्यै नमः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkata.

10. दशमःपक्षः (प्रभादिशक्तय: 8)

1. ओं प्रभायै नमः
2. ओं महामायायै नमः
3. ओं द्रुहिण्यै नमः
4. ओं विश्वमोहिन्यै नमः
5. ओं विशालिन्यै नमः
6. ओं द्विनेत्रायै नमः
7. ओं शङ्खिन्यै नमः
8. ओं सुगन्धिन्यै नमः

11. एकादशः पक्षः (पीठशक्तयोष्टौ) मध्ये - अनुग्रहा ।

1. ओं विमलायै नमः
2. ओं उत्कर्षिण्यै नमः
3. ओं ज्ञानायै नमः
4. ओं क्रियायै नमः
5. ओं योगायै नमः
6. ओं प्रह्वायै नमः
7. ओं सत्यायै नमः
8. ओं ईशानायै नमः

12. द्वादशः पक्षः (लक्ष्म्यादिशक्तय: 8)

1. ओं लक्ष्म्यै नमः
2. ओं ह्रियै नमः
3. ओं कीर्त्यै नमः
4. ओं प्रीत्यै नमः
5. ओं जयायै नमः
6. ओं अमृतायै नमः
7. ओं मायायै नमः
8. ओं वारुण्यै नमः

13. त्रयोदशः पक्षः (पूर्वाद्यष्टदिक्षु व्यूहमूर्तयः श्रीगजाश्च 8)

1. ओं वासुदेवाय नमः
2. ओं दमनकश्रीगजाय नमः
3. ओं सङ्कर्षणाय नमः
4. ओं सन्तानश्रीगजाय नमः
5. ओं प्रद्युंनाय नमः
6. ओं गुग्गुळायश्रीगजाय नमः
7. ओं अनिरुद्धाय नमः
8. ओं कुरण्डकश्रीगजाय नमः

14. चतुर्दश पक्षः (मङ्गळादिशक्तय: 8)

1. ओं मङ्गळायै नमः
2. ओं विजयायै नमः
5. ओं अपराजितायै नमः
6. ओं नन्दिन्यै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

3. ओं भद्रायै नमः
4. ओं जयन्त्यै नमः
7. ओं शोभनायै नमः
8. ओं दिव्यायै नमः

15. पञ्चदश: पक्ष: (अष्टनदीदेव्य:)

1. ओं गङ्गायै नमः
2. ओं यमुनायै नमः
3. ओं गोदावर्यै नमः
4. ओं सरस्वत्यै नमः
5. ओं नर्मदायै नमः
6. ओं सिन्धवे नमः
7. ओं कावेर्यै नमः
8. ओं ताम्रपर्ण्यै नमः

16. षोडशः पक्ष: (पृथिव्यादय:)

1. पूर्व-ओं पृथिव्यै नमः
2. दक्षिणे ओं आग्नेये नमः
3 पश्चिमे ओं जलाय नमः
4. उत्तरे - ओं मारुताय नमः
5. आग्नेये ओं निवृत्यैनम:
6. नैऋते–ओं प्रतिष्ठायै नमः
7. वायव्ये -ओं विद्यायै नमः
8. ऐशाने - ओं शान्त्यै नमः

अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ।।
इति पुष्पाञ्जलिं दत्वा सर्वाः संपूजिताः संतर्पिता: सन्तु इति विज्ञापयेत्।

तृतीयावरणे पूजनीयदेवताः ॥

1. प्रथमःपक्षः (बलाकी प्रमुखा: 8) (श्रीगणशक्तय:)

1. ओं श्रीं बलाक्यै नम:
2. ओं श्रीं विमलायै नम:
3. ओं श्रीं कमलायै नम:
4. ओं श्रीं वनमालिकायै नम:
5. ओं श्रीं विभीषिकायै नम:
6. ओं श्रीं द्राविकायै नम:
7. ओं श्रीं शाङ्कर्यै नम:
8. ओं श्रीं वसुमालिकायै नम:

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

2. द्वितीयः पक्षः (भारत्यादयो श्रीगजाश्च)

1. पूर्वे – ओं भारत्यै नमः
2. दक्षिणे – ओं पार्वत्यै नमः
3. पश्चिमे – ओं चन्द्रायै नमः
4. उत्तरे – ओं शचीदेव्यै नमः
5. आग्नेये – ओं दमक श्रीगजाय नमः
6. नैऋते - ओं शलभ श्रीगजाय नमः
7. वायै – ओं गुग्गुलु श्रीगजाय नमः
8. ऐशाने - ओं कुरण्डक श्रीगजाय नमः

3. तृत्तीयः पक्षः (निधिगणाः)

1. ओं शङ्खनिधये नमः
2. ओं पद्मनिधये नमः
3. ओं मकरनिधये नमः
4. ओं कच्छपनिधये नमः
5. ओं मुकुन्दनिधये नमः
6. ओं कुन्दनिधये नमः
7. ओं नीलनिधये नमः
8. ओं वरनिधये नमः
9. ओं महानिधये नमः
10. ओं सर्वनिधये नमः

4. चतुर्थः पक्षः (लोकमातरशक्तयः)

1. ओं ब्राह्म्यै नमः
2. ओं माहेश्वर्यै नमः
3. ओं कौमार्यै नमः
4. ओं वैष्णव्यै नमः
5. ओं वाराह्यै नमः
6. ओं नारसिह्म्यै नमः
7. ओं माहेन्द्र्यै नमः
8. ओं चामुण्डायै नमः
9. ओं श्री दुर्गायै नमः
10. ओं चण्डिकायै नमः

5. पञ्चमः पक्षः (कान्त्यादिशक्तयः)

1. ओं कान्त्यै नमः
2. ओं वाण्यै नमः
3. ओं प्रीत्यै नमः
4. ओं कीर्त्यै नमः
5. ओं शान्त्यै नमः
6. ओं तुष्ट्यै नमः
7. ओं दुर्गायै नमः
8. ओं पुष्ट्यै नमः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

6. षष्ठः पक्षः (हेतिधारिणः 8)

1. ओं शङ्खधराय नमः
2. ओं चक्रधराय नमः
3. ओं मुसलधराय नमः
4. ओं खड्गधराय नमः
5. ओं गदाधराय नमः
6. ओं शार्ङ्गधराय नमः
7. ओं पद्मधराय नमः
8. ओं वज्रधराय नमः

7. सप्तमः पक्षः (अष्टदिक्पालकाः)

1. ओं इन्द्राय नमः
2. ओं अग्नये नमः
3. ओं यमाय नमः
4. ओं निऋऋतये नमः
5. ओं वरुणाय नमः
6. ओं वायवे नमः
7. ओं सोमाय नमः
8. ओं ईशानाय नमः

8. अष्टमः पक्षः (दिगीश शक्तयः)

1. ओं कादंबर्यै नमः
2. ओं उल्कायै नमः
3. ओं करालिन्यै नमः
4. ओं रक्ताक्ष्यै नमः
5. ओं श्वेतरूपायै नमः
6. ओं हरितमृगवाहिन्यै नमः
7. ओं सिह्मवाहिन्यै नमः
8. ओं कङ्काल्यै नमः

9. नवमः पक्षः (श्रीपरिवाराष्टकशक्तयः)

1. ओं उमायै नमः
2. ओं श्रियै नमः
3. ओं सरस्वत्यै नमः
4. ओं दुर्गायै नमः
5. ओं धरण्यै नमः
6. ओं गायत्र्यै नमः
7. ओं देव्यै नमः (सावित्र्यै)
8. ओं उषायै नमः

अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ।।

इति पुष्पाञ्जलिं दत्वा सर्वाः संपूजिताः संतर्पिताः सन्तु इति विज्ञापयेत्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

चतुर्थावरणे पूजनीयाः

1. प्रथमःपक्षः ॥ (दशलोकपालकाः)

1. ओं इन्द्राय नमः
2. ओं अग्नये नमः
3. ओं यमाय नमः
4. ओं निर्ऋतये नमः
5. ओं वरुणाय नमः
6. ओं वायवे नमः
7. ओं सोमाय नमः
8. ओं ईशानाय नमः
9. ओं ब्रह्मणे नमः
10. ओं अनन्ताय नमः

2. द्वितीयःपक्षः ॥ (दशलोकेशशक्तयः)

1. ओं शचीदेव्यै नमः
2. ओं स्वाहादेव्यै नमः
3. ओं सधर्मदादेव्यै नमः
4. ओं विलासिनीदेव्यै नमः
5. ओं विरूपिणीदेव्यै नमः
6. ओं यामिनीदेव्यै नमः
7. ओं सुमुखीदेव्यै नमः
8. ओं निर्मलीदेव्यै नमः
9. ओं सरस्वतीदेव्यै नमः
10. ओं सर्पिणीदेव्यै नमः

3. तृतीयः पक्षः (अनुरागादयाष्टौ)

1. ओं अनुरागाय नमः
2. ओं विसंवादाय नमः
3. ओं विजयाय नमः
4. ओं वल्लभाय नमः
5. ओं मदाय नमः
6. ओं हर्षाय नमः
7. ओं बलाय नमः
8. ओं तेजसे नमः

4. चतुर्थः पक्षः (अष्टवसवः)

1. ओं धराय नमः
2. ओं ध्रुवाय नमः
3. ओं सोमाय नमः
4. ओं सुस्वापाय नमः
5. ओं अनिलाय नमः
6. ओं अजलाय नमः
7. ओं प्रत्यूषाय नमः
8. ओं प्रभासाय नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

5. पञ्चमः पक्षः.

1. ओं अनुरागाय नमः
3. ओं विसंवादाय नमः
4. ओं विजयाय नमः
8. ओं वल्लभाय नमः
5. ओं मदाय नमः
6. ओं हर्षाय नमः
7. ओं बलाय नमः
8. ओं तेजसे नमः

अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ।।
इति पुष्पाञ्जलिं दत्वा सर्वाः संपूजिताः संतर्पिताः सन्तु इति विज्ञापयेत्।

पञ्चमावरणे पूजनीयाः

1. प्रथमः पक्षः (दशलोकपालकाः)

1. ओं इन्द्राय नमः
2. ओं अग्नये नमः
3. ओं यमाय नमः
4. ओं निऋत्रऋतये नमः
5. ओं वरुणाय नमः
6. ओं वायवे नमः
7. ओं सोमाय नमः
8. ओं ईशानाय नमः
9. ओं ब्रह्मणे नमः
10. ओं अनन्ताय नमः

2. द्वितीयः पक्षः (दशलोकेश शक्तयः)

1. ओं शच्यै नमः
2. ओं स्वाहायै नमः
3. ओं कालकण्ठ्यै नमः
4. ओं दाहिन्यै नमः
5. ओं भोगिन्यै नमः
6. ओं घोरायै नमः
7. ओं गम्भीरिण्यै नमः
8. ओं हर्षिण्यै नमः
9. ओं सावित्र्यै नमः
10. ओं श्रियै नमः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

3. तृतीयःपक्षः (अष्टदिग्गजाः)

1. ओं ऐरावताय नमः
2. ओं पुण्डरीकाय नमः
3. ओं वामनाय नमः
4. ओं कुमुदाय नमः
5. ओं अञ्जनाय नमः
6. ओं पुष्पदन्ताय नमः
7. ओं सार्वभौमाय नमः
8. ओं सुप्रतीकाय नमः

4. चतुर्थः पक्षः (अष्टवसवः)

1. ओं धराय नमः
2. ओं ध्रुवाय नमः
3. ओं सोमाय नमः
4. ओं सुस्वापाय नमः
5. ओं अनिलाय नमः
6. ओं अनलाय नमः
7. ओं प्रत्यूषाय नमः
8. ओं प्रभासाय नमः

5. पञ्चमः पक्षः

1. ओं पूर्वे - ओं सूर्याय नमः
2. ओं आग्नेये - ओं चन्द्राय नमः
3 ओं दक्षिणे -ओं अङ्गारकाय नमः
4 ओं नैऋते - ओं बुधाय नमः
5. ओं पश्चिमे- ओं बृहस्पतये नमः
6. ओं वायव्ये-ओं शुक्राय नमः
7. ओं उत्तरे–ओं शनैश्चराय नमः
8. ओं ऐशान्ये–ओं राहु केतुभ्यां नमः

6. षष्टः पक्षः

1. ओं वज्राय नमः
2. ओं शक्तये नमः
3. ओं दण्डाय नमः
4. ओं खड्गाय नमः
5. ओं पाशाय नमः
6. ओं अंकुशाय नमः (ध्वजाय)
7. ओं गदायै नमः
8. ओं त्रिशूलाय नमः
9. ओं पद्माय नमः
10. ओं चक्राय नमः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

7. सप्तमः पक्षः (अष्टमरुतः)

1. ओं आवह मरुते नमः
2. ओं विवह मरुते नमः
3. ओं उद्वह मरुते नमः
4. ओं संवह मरुते नमः
5. ओं सुवह मरुते नमः
6. ओं निवह मरुते नमः
7. ओं अनुवह मरुते नमः
8. ओं प्रवह मरुते नमः

8. अष्टमः पक्षः (अष्टवायु गणः)

गगनः स्पर्शनो वायुः अनिलो मारुतस्तथा ।
प्राणः प्राणेश जीवेशौ मरुतोष्टौ प्रकीर्तितः।।

1. ओं गगनाय नमः
2. ओं स्पर्शनाय नमः
3. ओं वायवे नमः
4. ओं अनिलाय नमः
5. ओं मारुताय नमः
6. ओं प्राणाय नमः
7. ओं प्राणेशाय नमः
8. ओं जीवेशाय नमः

एवं क्रमेण श्रियं आवरणत्रयेन, आवरणपञ्चकेन वा -
यथाविधि यथाविभवविस्तरं परिवृतां संपूजयेत्।।
अभीष्टसिद्धिं मे देहि शरणागत वत्सले ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम्।।
इत्युक्त्वा पुष्पाञ्जलिंदत्वा- पूजितास्तर्पितास्सन्तु इतिविज्ञापयेत्।।

(इति लक्ष्म्याः पञ्चावरणार्चनम् सम्पूर्णम्)



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वरलक्ष्मी पूजा कल्पः

"वरलक्ष्मी व्रत निर्णयः"

तदुक्तं स्कान्दे = पार्वतीं प्रति ईश्वरः उवाच ॥

शुक्ले श्रावणिके मासि पूर्णिमोपान्त्य भार्गवे ।
नूतनैस्तण्डुलैः पूर्णे कुंभेचावाह्य पद्मजाम् ॥ 1

स्त्रियः प्रसन्न हृदयाः निर्मला श्चित्तवाससः ।
साय श्चारुमती मुख्या श्चक्रुः पूजां प्रयत्नतः ॥ 2

धारयेत् दक्षिणे हस्ते नवसूत्रं सुगन्धिकम् ।
सिध्यन्ति सर्वकार्याणि वरलक्ष्मी प्रसादतः ॥ 3

अथ वरलक्ष्मी पूजाकल्पः ॥

स्वगृहे - चतुरश्रं मण्टपं निर्माय-तन्मध्ये-वेदिकां कृत्वा-रङ्गवल्यादिभिरलंकृत्य - तन्मध्ये - धान्यं तदुपरि तण्डुलैः स्थण्डिलं विधाय - पद्मरेखामुल्लिख्य - तदुपरि-तण्डुलपूरित कुंभं निधाय - पञ्चपल्लवैः - दर्भकूर्चैः - नाळिकेरफलेन चालंकृत्य - प्राणप्रतिष्ठां कृत्वा - अनुज्ञा पूर्वकं पूजां कुर्यात् ॥

सङ्कल्पः

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशान्तये ॥
तदेव लग्नं सुदिनं तदेव-
ताराबलं चन्द्रबलं तदेव ।
विद्याबलं दैवबलं तदेव-
लक्ष्मीपते ते अंघ्रियुगं स्मरामि ॥

इति विघ्नेशं प्रार्थ्य - मम उपात्त समस्त दुरितक्षयद्वारा + श्रीपरमेश्वर

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

प्रीत्यर्थं करिष्यमाणस्य कर्मणः अविघ्नेन परिसमाप्त्यर्थं आदौ विघ्नेश्वरपूजां करिष्ये ॥ इति संकल्प्य - गणेशंनैवेद्यान्तं संपूज्य - सङ्कल्पयेत्।।

शुभे शोभने---+---शुभतिथौ ॥

अस्माकं सह कुटुंबानां-क्षेम स्थैर्य वीर्य विजय आयुरारोग्यैश्वर्याभि वृद्ध्यर्थं, इष्टकाम्यार्थ सिद्ध्यर्थं, सत्सन्तान सौभाग्य शुभफलावाप्त्यर्थं, दीर्घसौमङ्गल्याऽवाप्त्यर्थं, वरलक्ष्मी प्रसाद सिद्ध्यर्थं, कल्पोक्तप्रकारेण- ध्यानावाहनादि षोडशोपचारैः वरलक्ष्मीपूजां करिष्ये - इति संकल्प्य॥

विघ्नेश्वर मुद्वास्य - तदङ्गं कलशपूजां कृत्वा - तज्जलेन पूजाद्रव्याण्यात्मानञ्च प्रोक्ष्य - प्रधान कलशं करे गृहीत्वा - कलशमन्त्रं उच्चार्य स्थापयेत् ।

कलशस्थापने श्लोकः -

वरलक्ष्मि महादेवि सर्वाभरण भूषिते ।
कलशेऽस्मिन् वसे दस्मात् गेहे सौभाग्यकारिणी॥

इति वदन् कलशस्थापनं कृत्वा, तस्मिन् वरलक्ष्मीं पूजयेत् तद्यथा-

वरलक्ष्मी ध्यानम् ॥

लक्ष्मीं क्षीर समुद्रराज तनयां श्रीरङ्ग धामेश्वरीं -
दासीभूत समस्त देव वनितां लोकैक दीपांकुराम् ।
श्रीमन् मन्द कटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधरां-
त्वां त्रैलोक्य कुडुंबिनीं सरसिजां वन्दे मुकुन्द प्रियाम् ॥

(अन्यत् ध्यानम्)

या सा पद्मासनस्था विपुल कटितटी पद्मपत्रायताक्षी -
गंभीरावर्त नाभि स्तनभर नमिता शुभ्र वस्त्रोत्तरीया ।
लक्ष्मी र्दिव्यै र्गजेन्द्रैः मणिगण खचितैः स्नापिता हेमकुंभैः -
नित्यं सा पद्महस्ता मम वसतु गृहे सर्व माङ्गल्ययुक्ता ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी आवाहनम्

पद्मासने पद्मकरे सर्वलोकैक पूजिते-
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥

क्षीरोधार्णव संभूते कमले कमलालये -
सुस्थिता भव मे गेहे सुरासुर नमस्कृते ॥

एवं श्री वरलक्ष्मीं ध्यात्वा-अथ प्राणप्रतिष्ठां कृत्वा-नवतन्तु विनिर्मितं दोरकं गृहीत्वा ॥ ततो प्रतिसरतन्तुनिर्मित दोरकस्थापनं कुर्यात् ॥

बाल भानु प्रतीकाशे पूर्णचन्द्र निभानने ॥
सूत्रेऽस्मिन् सुस्थिता भूत्वा प्रयच्छबहुलान्वरान्॥

इति सुगन्धिकं नवतन्तुविनिर्मितं दोरकं नव ग्रन्थियुतं वा वरलक्ष्म्याः कलशोपरि स्थापयेत् ॥ ततो लक्ष्मीं पूजयेत्॥

1. आवाहनम्

सर्वमङ्गल माङ्गल्ये विष्णु वक्ष स्थलालये ।
आवाहयामि देवि त्वां कलशेऽस्मिन् मनोहरे ॥

अस्मिन् कलशे ओं श्रीं वरलक्ष्म्यै नमः इति श्री वरलक्ष्मीं आवाहयामि - इति आवाह्य - (अभीष्ट फलदा भव)

2. आसनम्

अनेकरत्न खचितं मुक्ताहारै र्विभूषितम् ।
स्वर्णसिंह्मासनं चारु प्रीत्यर्थं प्रतिगृह्यताम् ॥

(देवि स्वीकुरुष्व हरिप्रिये) ओं श्री वरलक्ष्म्यै नमः
आसनं समर्पयामि॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

3. पाद्यम्

महानदी समानीतं गन्धपुष्पादि मिश्रितम् ।
पाद्यं ददाम्यहं देवि सर्वदेव नमस्कृते ॥
ओं श्री वरलक्ष्म्यै नमः पाद्यं समर्पयामि ॥

4. अर्घ्यम्

गङ्गानदी समानीतं सुवर्ण कलशेस्थितम् ।
अर्घ्यं गृहाण देवि त्वा माश्रितेष्ट प्रदायिनि ॥
गृहाणार्घ्यं मयादत्तं पुत्रपौत्र फलप्रदे ॥
ओं श्री वरलक्ष्म्यै नमः अर्घ्यं समर्पयामि ॥

5. आचमनम्

वैष्णवी विष्णुसंयुक्ता असंख्य आयुध धारिणी ।
आचम्यतां देवपूज्ये वरदे असुरमर्दिनी ॥
(अथवा)
प्रसन्नं शीतलं तोयं प्रसन्न मुखपङ्कजे ।
गृहाण आचमनार्थाय गरुडध्वज वल्लभे ॥
ओं श्री वरलक्ष्म्यै नमः आचमनीयं समर्पयामि ॥

6. मधुपर्कम्।

महालक्ष्मि महादेवि मध्वाज्य दधि संयुतम् ।
मधुपर्कं गृहाणेमं मधुसूदन वल्लभे ॥
ओं श्री वरलक्ष्म्यै नमः मधुपर्कं प्रदास्यामि ॥

7. पञ्चामृतम्

पयोदधि घृतोपेतं शर्करा मधु संयुतम् ।
पञ्चामृतं गृहाणेदं वरलक्ष्मि नमोऽस्तुते ॥
(पञ्चामृत स्नान मिदं गृहाण हरि वल्लभे)
ओं श्री वरलक्ष्म्यै नमः पञ्चामृतस्नानं समर्पयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

8. शुद्धोदकस्नानम्

रत्नकुंभ समानीतं सर्व तीर्थाहृतं जलम् ।
स्नानार्थं वः प्रयच्छामि गृहाण हरि वल्लभे ॥
(अथवा)
शुद्धोदकं स्वर्णपात्र स्थितं सागर संभवे ।
स्नानार्थं ते प्रयच्छामि गृहाण परमेश्वरि ॥
ओं श्री वरलक्ष्म्यै नमः शुद्धोदकस्नानं समर्पयामि ॥
ओं श्री वरलक्ष्म्यै नमः स्नानानन्तरं आचमनीयं समर्पयामि ॥

9. वस्त्रयुगलम्।

दिव्यांबरयुगं सूक्ष्मं कञ्चुकञ्च मनोहरम् ।
त्रैलोक्य जननि त्वन्तु गृहाणेदं मयार्पितम् ॥
ओं श्री वरलक्ष्म्यै नमः वस्त्रयुगलं कञ्चुकं च समर्पयामि ॥

10. माङ्गल्यसूत्रम्

माङ्गल्यमणि संयुक्तं मुक्ताफल समन्वितम् ।
दत्तं मङ्गलसूत्रं ते गृहाण हरिवल्लभे ॥
ओं श्री वरलक्ष्म्यै नमः कण्ठसूत्रं माङ्गल्यं समर्पयामि ॥

11. भूषणम्

रत्न ताटंक केयूर हार कंकण मण्डिते ।
भूषणं गृह्यतां देवि नमस्ते विष्णुवल्लभे ॥
(भूषणं संगृहाणाद्य रत्नाकर समुद्भवे)
ओं श्री वरलक्ष्म्यै नमः हाराद्यनेक आभरणानि समर्पयामि

12. सुगन्धलेपनम्

कर्पूरागरु कस्तूरी कुंकुमादि समन्वितं ।
गन्धं ददाम्यहं देवि सर्वमङ्गल दायिनी ॥
(लेपनार्थं महादेवि दास्यामि हरिवल्लभे)
ओं श्री वरलक्ष्म्यै नमः सुगन्ध परिमल श्रीचन्दनं समर्पयामि॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

13. हरिद्राचूर्णं कुङ्कुमम्।

हरिद्रा कुंकुमं चैव सिन्दूरं कज्जलान्वितम् ।
सौभाग्य द्रव्य संयुक्तं गृहाण परमेश्वरी ॥

ओं श्री वरलक्ष्म्यै नमः हरिद्रा कुंकुम सिन्दूरादि स्त्रैण सौन्दर्य सकलसौभाग्य शोभनद्रव्यानि समर्पयामि ॥

14. अक्षतारोपणम्

अक्षतान् धवलान् देवि शालीयान् तण्डुलान् शुभान् ।
अक्षतान् प्रतिगृह्णीष्व भक्ताना मिष्टदायिनि ॥
(शालीयान् चन्द्रवर्णांश्च स्निग्धमौक्तिक सन्निभान्)

ओं श्री वरलक्ष्म्यै नमः शुक्लान् अक्षतान् समर्पयामि ॥

15. पुष्पार्चनम्

मन्दार पारिजाताब्ज केतक्युत्पल पाटलैः ॥
मरु मल्लिक जात्यादि पुष्पै स्त्वां पूजयाम्यहम् ॥

(अष्टपुष्पार्चनम्)

मन्दार पारिजाताब्जैः मल्लिका वकुलै रपि ।
केतक्युत्पल कल्हारैः पूजयामि हरिप्रिये ॥

ओं श्री वरलक्ष्म्यै नमः पुष्पमालां समर्पयामि ॥

ओं श्री वरलक्ष्म्यै नमः अष्टविधैः पद्मादिभिः (नानाविधैः) सुगन्धपुष्पैः संपूजयामि ॥ इत्युच्चार्य - पद्मादि विविधकुसुमैः श्रियः अङ्गपूजां कुर्यात् ॥

16. देव्याः अङ्गपूजा।

ओं वरलक्ष्म्यै नमः पादौ पूजयामि ॥
ओं पद्मालयायै नमः गुल्फौ पूजयामि ॥
ओं जलजासनायै नमः जङ्घे पूजयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं लोकजनन्यै नमः	जानुनी पूजयामि ॥
ओं क्षीराब्धितनयायै नमः	ऊरू पूजयामि ॥
ओं पीतांबरधारिण्यै नमः	कटिं पूजयामि ॥
ओं हरिप्रियायै नमः	गुह्यं पूजयामि ॥
ओं नारायणप्रियायै नमः	नाभिं पूजयामि ॥
ओं इन्दिरायै नमः	उदरं पूजयामि ॥
ओं विष्णुवक्षःस्थितायै नमः	वक्षःस्थलं पूजयामि॥
ओं सुस्तन्यै नमः	स्तनौ पूजयामि ॥
ओं कंबुकण्ठ्यै नमः	कण्ठं पूजयामि ॥
ओं सुन्दर्यै नमः	स्कन्धौ पूजयामि ॥
ओं पद्महस्तायै नमः	हस्तान् पूजयामि ॥
ओं बहुप्रदायै नमः	बाहून् पूजयामि ॥
ओं सुमुख्यै नमः	मुखं पूजयामि ॥
ओं चञ्चलायै नमः	चुबुकं पूजयामि ॥
ओं बिंबोष्ठ्यै नमः	ओष्ठं पूजयामि ॥
ओं श्रियै नमः	अधरं पूजयामि ॥
ओं कमलवासिन्यै नमः	कपोलौ पूजयामि ॥
ओं सुनासायै नमः	नासिकां पूजयामि ॥
ओं लोकमात्रे नमः	नेत्रे पूजयामि ॥
ओं लोलेक्षणायै नमः	ललाटं पूजयामि ॥
ओं रमायै नमः	कर्णौ पूजयामि ॥
ओं नीलकुन्तलायै नमः	अळकान् पूजयामि ॥
ओं चन्द्रसोदर्यै नमः	शिरः पूजयामि ॥
ओं सर्वेश्वर्यै नमः	सर्वाण्यङ्गानि पूजयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

17. विशेष नामार्चना

(अथ श्रियः अष्टोत्तरशत सहस्र नामाभिः पुष्पैः पूजयेत्) (108/1008)

"ओं श्रीं वरलक्ष्म्यै नमः" नानाविध पत्रपुष्पाणि समर्पयामि ॥

इति विविध पुष्पार्चनं समर्पयामि। इति अर्चयित्वा -

18. धूपम्।

धूपं दास्यामि ते देवि गुग्गुला गरु संयुतम् ।
गृहाण त्वं महालक्ष्मि भक्ताना मिष्टदायिनि ॥

ओं श्रीं वरलक्ष्म्यै नमः धूपं आघ्रापयामि ॥

19. दीपम्

साज्यं त्रिवर्तिसंयुक्तं वह्निना योजितं मया ।
गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापहम् ॥
(गृहाण मङ्गलं दीपं वरलक्ष्मि नमोऽस्तुते)

ओं श्री वरलक्ष्म्यै नमः आज्यदीपं दर्शयामि ॥

20. नैवेद्यम्

नानाभक्ष्य समायुक्तं नानाफल समन्वितम् ।
षड्रसोपायनै र्युक्तं नैवेद्यं प्रतिगृह्यताम् ॥
(लड्डुकै र्मोदकै र्युक्तं नारायण कुटुंबिनि)

ओं श्रीं वरलक्ष्म्यै नमः विविध भक्ष्य भोज्य
हविष्य फलादि नैवेद्यं निवेदयामि॥

21. पानीय दानम्

उशीर वासितं दैवं घनसार विमिश्रितम् ।
पानीयं गृह्यतां देवि एला गन्ध सुशीतलम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

(पानीयं शीतलं तोयं गृह्यतां श्रीधरप्रिये)

ओं श्रीं वरलक्ष्म्यै नमः पानीयं समर्पयामि ॥

अथ-नैवेद्यानन्तरं आचमनीयं समर्पयामि ॥

22. ताम्बूलदानम्

पूगीफल समायुक्तं नागवल्लीदलैर्युतम् ।
कर्पूरचूर्ण संयुक्तं तांबूलं प्रतिगृह्यताम् ॥

ओं श्रीं वरलक्ष्म्यै नमः मुखवास तांबूलं समर्पयामि ॥

23. नीराजनम्

नीराजनं सुमाङ्गल्यं कर्पूरेण समन्वितम् ।
चन्द्रार्क वह्नि सदृशं गृहाण हरिवल्लभे ॥

(अथवा)

नीराजनं समानीतं क्षीरसागर संभवे ।
गृह्यता मर्पितां भक्त्या गरुडध्वज भामिनी ॥

ओं श्रीं वरलक्ष्म्यै नमः मङ्गळ नीराजनं दर्शयामि,
नीराजनानन्तरं आचमनीयं समर्पयामि ॥

24. पुष्पाञ्जलिः

पुष्पाञ्जलिं गृहाणेमं पुरुषोत्तम वल्लभे ।
सर्वदुःख हरे देवि इष्ट सौख्य प्रदायिनि ॥

&

सर्वपाप हरे देवि सर्वशक्ति स्वरूपिणि ।
भक्त्या समर्पिते देवि सुप्रीता भव सर्वदा ॥

ओं श्रीं वरलक्ष्म्यै नमः पुष्पाञ्जलिं समर्पयामि ॥

(स्वर्णपुष्पं समर्पयामि इति वदन् धनं च समर्प्य)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

25. स्तोत्रवन्दनम्

वन्दे पद्मकरां प्रसन्नवदनां सौभाग्यतां भाग्यतां-
हस्ताभ्या मभयप्रदां मणिगणै र्नानाविधै र्भूषिताम् ।
भक्ताभीष्ट फलप्रदां हरिहर ब्रह्मादिभिः सेवितां-
पार्श्वे पङ्कज शङ्खपद्मनिधिभि र्युक्तां सदा शक्तिभिः ॥

ओं श्रीं वरलक्ष्म्यै नमः स्तोत्रेण प्रीणयामि ॥

26. प्रदक्षिणम्

यानि कानि च पापानि जन्मान्तर कृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिण पदे पदे ॥

&

प्रकृष्ट पापानाशाय प्रकृष्ट फलसिद्धये ।
प्रदक्षिणं करोम्यत्र वरलक्ष्मि नमोऽस्तुते ॥

&

सर्वमङ्गल लाभाय सर्वपाप निवृत्तये ।
प्रदक्षिणं करोम्यत्र प्रसीद हरिवल्लभे ॥

ओं श्रीं वरलक्ष्म्यै नमः प्रदक्षिणं समर्पयामि ॥

27. नमस्कारः

नमस्ते सर्वजननी नमस्त्रैलोक्य मोहिनि ।
हरिकान्ते नमस्तुभ्यं त्राहिमां परमेश्वरि ॥

&

नमोस्तु नालीक निभाननायै
नमोस्तु नारायण वल्लभायै-
नमोस्तु रत्नाकर संभवायै ।
नमोऽस्तु लक्ष्म्यै जगतां जनन्यै ॥

ओं श्रीं वरलक्ष्म्यै नमः इति नमस्कारान् समर्पयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

28. वर प्रार्थना

आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिकान् वरान् ॥
शत्रुक्षयं महालक्ष्मि प्रयच्छ करुणानिधे ॥

&

पद्मासने पद्मकरे सर्वलोकैक पूजिते ॥
नारायण प्रिये देवि सुप्रीता भव सर्वदा ॥

ओं श्री वरलक्ष्म्यै नमः अभीष्टवर प्रार्थनां समर्पयामि ॥

29. दोरक ग्रन्थि पूजा (प्रतिसरार्चना) सूत्रपुजा

1. ओं कमलायै नमः प्रथमग्रन्थिं पूजयामि ॥
2. ओं रमायै नमः द्वितीयग्रन्थिं पूजयामि ॥
3. ओं लोकमात्रे नमः तृतीयग्रन्थिं पूजयामि ॥
4. ओं विश्वजनन्यै नमः चतुर्थग्रन्थिं पूजयामि ॥
5. ओं महालक्ष्म्यै नमः पञ्चमग्रन्थिं पूजयामि ॥
6. ओं क्षीराब्धितनयायै नमः षष्ठग्रन्थिं पूजयामि ॥
7. ओं विश्वसाक्षिण्यै नमः सप्तमग्रन्थिं पूजयामि ॥
8. ओं चन्द्रसहोदर्यै नमः अष्टमग्रन्थिं पूजयामि ॥
9. ओं हरिवल्लभायै नमः नवमग्रन्थिं पूजयामि ॥

एवं दोरकं संपूज्य ॥

30. दोरग्रहणम्

सर्वमङ्गल माङ्गल्ये सर्वपाप प्रणशिनि ॥
दोरकं प्रतिगृह्णामि सुप्रीता भव सर्वदा ॥

इति दोरकं लक्ष्मीकलशात् हस्ते गृहीत्वा ॥

31. दोरकबन्धनम्

नवतन्तु समायुक्तं नवग्रन्थि समन्वितम् ।
बध्नामि दक्षिणे हस्ते दोरकं हरिवल्लभे ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

(अथवा)

नवतन्तु समायुक्तं नवसूत्रमिदं शुभम् ।
कुंकुमाक्तं महालक्ष्मि बध्नीयां दक्षिणे करे ॥

इति श्लोकेन स्त्रियः दक्षिणहस्ते पूजित दोरकं बध्नीयात् ॥

32. वरलक्ष्म्याः अर्घ्यप्रदानम् ॥

अद्य पूर्वोक्त एवंगुण--+--श्री वरलक्ष्मी प्रीत्यर्थं +++ वरलक्ष्मी पूजान्ते क्षीरार्घ्य प्रदानं उपायनदानं च करिष्ये- इति संकल्प्य ॥

गोक्षीरेण युतं देवि गन्धपुष्प समन्वितम् ।
अर्घ्यं गृहाण वरदे वरलक्ष्मि नमोस्तुते ॥
(गृहाणार्घ्यं मया दत्तं सुप्रीता भव सर्वदा) -
ओं श्री वरलक्ष्म्यै नमः इदमर्घ्यं- एवं त्रिवारं तर्पयेत् ॥

33. छत्रादिराजोपचार समर्पणम्

ओं श्री वरलक्ष्म्यै नमः छत्रादिसर्वोपचार पूजाः समर्पयामि ॥ छत्रं समर्पयामि - चामरं वीजयामि इति छत्रं, चामरं, व्यजनं, ध्वजं, पताकादिकं वाहनं आन्दोलिकां च क्रमेण समर्पयेत् ॥

34. ब्राह्मण पूजा (विप्रपूजा)

(ब्राह्मणाय उपायन दानम्) & (पूजा निर्माल्य समर्पणम्)

श्री वरलक्ष्मी स्वरूपस्य ब्राह्मणस्य इदमासनम् ॥
श्री वरलक्ष्मी स्वरूपस्य ब्राह्मणस्य इदमर्घ्यम् ॥
श्री वरलक्ष्मी स्वरूपस्य ब्राह्मणस्य अमी गन्धाः ॥
श्री वरलक्ष्मी स्वरूपस्य ब्राह्मणस्य सकलाराधनैः समर्चितम् ॥

35. पूजाङ्ग उपायनदानम् (स्वर्णदक्षिणा दानंच)

हिरण्य गर्भ गर्भस्तं हेमबीजं विभावसोः ।
अनन्त पुण्यफलदं अतःशान्तिं प्रयच्छमे ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

इन्दिरा प्रतिगृह्णाति इन्दिरा वै ददाति च ।
इन्दिरा तारयेत् द्वाभ्यां इन्दिरायै नमो नमः ॥

इति उक्त्वा इदमुपायनं सदक्षिणाकं सतांबूलं श्री वरलक्ष्मीप्रीतिं कामयमाना: - तुभ्य महं संप्रददे ॥ इदं न मम।। अनेन श्री वरलक्ष्मी प्रीयताम् ॥

36. पूजाफलसमर्पणम्

कायेन वाचा मनसेन्द्रियैर्वा -
बुद्ध्या ऽत्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै –
वर प्रदायै च श्रियै ददामि ।।

इति श्लोकेन कृत पूजाफलं सर्वं वरलक्ष्म्यै समर्पयामि इति समर्पयेत्।। अनया पूजया - श्री वरलक्ष्मि - सुप्रीता वरदा भव - इति देव्यै विज्ञापयेत्॥

(इति वरलक्ष्मी पूजा समाप्ता)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीयन्त्र श्रीसूक्तपूजा (लघुक्रमः)

प्रथमं षट्कोणम् - तद्बहिः अष्टदळपद्मम् - तद्बहिः एकरेखया चतुर्द्वारयुक्त भूपुरं लक्ष्मी चक्रं भवति - तस्मिन् चक्रे लक्ष्मीं आवाह्य संप्रार्थ्य - श्रीसूक्तेन पूजयेत् ।

त्रैलोक्यपूजिते देवि कमले विष्णुवल्लभे ।
यथात्व मचला कृष्णे तथाभव मयिस्थिरा ॥

इति प्रार्थ्य। कुङ्कुमाक्षत हरिद्रासुगन्ध पुष्पादिनार्चयेत् ॥

लक्ष्मी द्वादशनामानि

ईश्वरी कमला लक्ष्मी चला भूति हरिप्रिया ।
पद्मा पद्मालया चैव समीची चैव उच्चगा ॥
श्री: पद्मधारिणी चैव सिद्धितानी रितानि च ॥
द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत्।
स्थिरालक्ष्मीर्भवेत्तस्य पुत्रदारादिभिस्सह।

1. ओं श्रीं ईश्वर्यै नमः
2. ओं श्रीं कमलायै नमः
3. ओं श्रीं लक्ष्म्यै नमः
4. ओं श्रीं चलायै नमः
5. ओं श्रीं भूत्यै नमः
6. ओं श्रीं हरिप्रियायै नमः
7. ओं श्रीं पद्मायै नमः
8. ओं श्रीं पद्मालयायै नमः
9. ओं श्रीं समीचे नमः
10. ओं श्रीं उच्चगायै नमः
11. ओं श्रीं श्रियै नमः
12. ओं श्रीं पद्मधारिण्यै नमः

इति संपूज्य। गन्ध-पूष्प धूप दीप नैवेद्यादिकं विधाय।
नीराजनं कुर्यत्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ततो - स्तोत्र प्रदक्षिण नमस्कार वरप्रार्थनादिकं विधाय। विसर्जयेत् - इति लघुश्री सपर्याक्रमः। अनेन पूजनेन सर्वविध सुखसमृद्धिः स्थिरलक्ष्मीश्च प्राप्नोति॥

महालक्ष्मी पूजायाम् जप्याः मन्त्राः

1. श्रीसूक्त जपम्
2. लक्ष्मीहृदयम्
3. नारायणकवच जपः
4. संपत्करीविद्याजपम्
5. लक्ष्मी मूलमन्त्र जपः
6. लक्ष्मी मालामन्त्र जपः
7. लक्ष्मी द्वादशनाम पारायणम्
8. श्रीसूक्तनाम पारायणम्
9. अष्टोत्तरशतनाम स्तोत्रम्
10. महालक्ष्मीकवच पारायणम्
11. लक्ष्मी त्रिशति
12. लक्ष्मी सहस्रनाम स्तोत्रम्
13. महालक्ष्मी स्तोत्र मञ्जरी
14. देवीमाहात्म्यंदुर्गासप्तशति जपः
15 महालक्ष्मी अष्टकम्
16. श्री शतकम् (स्तोत्राणि)
17. विष्णुसहस्रनामम्
18. अष्टलक्ष्मीस्तोत्राणि

(सर्वैश्वर्यप्रदलक्ष्मीकवचम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री वरलक्ष्मी

लक्ष्मीं क्षीर समुद्रराज तनयां श्रीरङ्ग धामेश्वरीं -
दासीभूत समस्त देव वनितां लोकैक दीपांकुराम् ।
श्रीमन् मन्द कटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधरां-
त्वां त्रैलोक्य कुडुंबिनीं सरसिजां वन्दे मुकुन्द प्रियाम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta



श्री कुबेरलक्ष्मी

हस्तोद्यद् वसुपत्र पङ्कजधरा चञ्चत्स्फुरन्नूपुरा –
ग्रैवेयाङ्गद हार कङ्कण महा माला ज्वलत्कुण्डला ।
पद्मस्था परिचारिका परिवृता शुक्लाङ्गरागांशुका –
देवी दिव्यगणा नता भवदघ प्रध्वंसिनी स्याद् रमा ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी यजन यन्त्रम्



जगन्माताश्री यन्त्रपूजाक्रमः

प्रथमावरणे = मध्ये जगत्प्रसूत्यै महालक्ष्म्यै नमः इति संपमज्य देव्याःदक्षिणे शंकरनन्दनाय नमः वामे पुष्पधन्वने नमः।

द्वितीयावरणे = षट्कोणेषु 1.ऐं ज्ञानाय हृदयाय नमः, 2. ह्रीं ऐश्वर्याय शिरसे, 3.श्रीं शक्तये शिखायै, 4.क्लीं बलाय कवचाय, 5.सौं वीर्याय नेत्रत्रयाय, 6. जगत्प्रसूत्यै नमः तेजसे नमः

तृतीयावरणे = अष्टदलेषु 1.उमा, 2.श्री, 3.सरस्वती, 4.दुर्गा, 5.धरणी, 6.गायत्री, 7.देवी, 8.उषा

चतुर्थावरणे = देव्याःदक्षे जह्नुसुता (गंगा)। देव्याःवामे = सूर्यसुता (यमुना) । दक्षिणे = शंखनिधि । वामे = पद्मनिधि । देव्याःपश्चिमे = धृतातपत्रसवरुणः

पञ्चमावरणे = अष्टपत्रेषु 1.सूर्यः 2.सोमः 3.अंगारकः 4.बुधः 5.गुरुः 6.शुक्रः 7.शनिः 8.राहुःकेतुः

षष्ठावरणे = अन्तर्भूपुरे - अष्टदिक्षु – ऐरावतादि अष्टौ दिग्गजाः।

सप्तमावरणे = भूपुरेबाह्यरेखायां अष्टदिक्षु - इन्द्रादयः अष्टौ वज्रादि आयुधोपेताश्च पूजयेत् (इतियन्त्रेसप्तावरणार्चनम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री यन्त्रम्



श्रीयन्त्रकल्पनविधिः

रुचिराष्टपत्र मथ वारिरुहं -
गुणवृत्तराशि चतुरश्रयुतम् ।
प्रविधाय पीठ मपि तत्र यजेत् -
नवशक्तिभि स्सह रमां च ततः ।।

प्रथमावरणे = षट्कोणे - षडङ्गशक्तयाः
द्वितीयावरणे = अबदलेषु - अष्टै शक्तयाः
तृतीयावरणे = वृत्त अष्टै लोकमातरः
चतुर्थावरणे = अन्तर्भूपुरे - दशलोकपालाः
पञ्चमावरणे = बहिर्भूपुरे - दशायुधदेवाः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीसूक्तार्चन यन्त्रम्

श्रीयन्त्रार्चन विधिः (श्रीयन्त्रार्चनविधिश्लोकः)

त्रिराष्टपत्र मथ वारिरुहं च – गुण वृत्त राशि चतुरश्र युतम् च।
प्रविधाय पीठ मपि तत्र संयजेत् – नव शक्ति भिस्सह रमां सुपूजयेत्।।



श्रीयन्त्रनवावरणार्चनक्रमः

प्रथमावरणे = मध्येवृत्ते – श्रीदेवी (श्रीं) - श्रीसूक्तषडङ्ग शक्तयः
1. हिरण्मय्यै नमः हृत् । 2. चन्द्रिकायै नमः शिरस् ।
3. रजतस्रजायै नमः शिखा । 4. हिरण्यस्रजायै नमः कवचम् ।
5. हिरण्यायै नमः नेत्रत्रयम्। 6. हिरण्यवर्णायै नमः अस्त्रम् ।

द्वितीयावरणे = षट्कोणेषु – षडंगशक्तयः 6

तृतीयावरणे = अष्टदले –अष्टशक्तयः 8

चतुर्थावरणे = राशिदले – दिक्षु - व्यूहमूर्तयः-4, विदिक्षु श्रीगजाः-4, पार्श्वयोः-निधी-2, पार्श्वयोः-नद्यौ-2 = 12.

पञ्चमावरणे = कला दलेषु स्वरवर्णाः 16 शक्तयः

षष्ठावरणे = तत्वदलेषु गायत्री वर्णाः 24 शक्तयः

सप्तमावरणे = बाह्यवृत्ते मातृकाशक्तयः

अष्टमावरणे = अष्टौ वसवः अष्टौ दिग्गजाः इन्द्रादयः

नवमावरणे = वज्रादि दशायुधानि

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीसूक्तयन्त्रम्



श्रीसूक्त मन्त्रैः मनत्र पदैः पूजयेत्श्री ।
सूक्त विधानेन नषोडशोपचारैः पूजाकार्या ।
15 ऋचां अर्धैः षट् त्रिशत् दलेषुलेखनं पूजनं च।



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीमङ्गळार्चन यन्त्रम्



पञ्चावरणार्चनक्रमः

प्रथमावरणे = षट्कोणेषु - श्रामित्यादिभिस्सार्धं हृदयादिषडङ्गशक्तयः।

द्वितीयावरणे = अष्टदलेषु - अष्टौ शक्तयः ।

1.विभूत्यै, 2.अन्नत्यै, 3.कान्त्यै, 4.हृष्ट्यै, 5.कीर्त्यै,
6.सन्नत्यै, 7.व्युष्ट्यै, 8.उत्कृष्ट्यै - इतिशक्तयः।

तृतीयावरणे = अष्टौ लोकमातरः पूजयेत् । 1.ब्राह्मी, 2.माहेश्वरी, 3.कौमारी, 4.वैष्णवी, 5.वाराही, 6.इन्द्राणी, 7.चामुण्डा, 8.शिवदुर्गा

चमुर्थावरणे = अष्टौवसवः । 1.धराय, 2.ध्रुवाय, 3.सोमाय, 4.सुस्वापाय, 5.अनिलाय, 6.अनलाय, 7.प्रत्यूषाय, 8.प्रभासाय - इति। (अथवा)-(द्वात्रिंशद्दलेषु शक्तयः)

पञ्चमावरणे = इन्द्रादीन् स्वायुधधरानर्चयेत्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीगजाः 4

1. दमकाय श्रीगजाय । 2. शलभाय श्रीगजाय ।
3. गुग्गुलवे श्रीगजाय । 4. कुरण्डकाय श्रीगजाय ।

चतुर्थावरणे 32 दलेषु देवताः

1. श्रियै	2. लक्ष्म्यै	3. वरदायै
4. विष्णुपत्न्यै	5. वसुप्रदायै	6. हिरण्यरूपायै
7. स्वर्णमालिन्यै	8. रजतस्रजायै	9. स्वर्ण प्रभायै
10. स्वर्णप्राकारायै	11. पद्मवासिन्यै	12.पद्महस्तायै
13. पद्मप्रियायै	14. मुक्तालङ्करणायै	15. सूर्यायै
16. चन्द्रायै	17. बिल्वप्रियायै	18. इश्वर्यै
19. भुक्त्यै	20. मुक्त्यै	21. विभूत्यै
22. ऋध्यै	23. समृध्यै	24. कृष्ट्यै
25. पुष्ट्यै	26. धनदायै	27. धनेश्व यै
28. श्रद्धायै	29. भोगिन्यै	30. भोगदायै
31. धात्र्यै	32. विधात्र्यै	इत्यर्चयेत् ।

द्वात्रिंश देते श्रीदेव्याः ये मन्त्राः समुदीरिताः ।
तारादिका नमोन्ताश्च तै रर्चासु बलिं हरेत्।।



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गजलक्ष्मी यजनयन्त्रम् (5आवरणदेवता:)



पञ्चावरणपूजाक्रमः

प्रथमावरणे = षडङ्गशक्तीः ।

द्वितीयावरणे = अष्टौविष्णुमूर्तयः । 1.श्रीधराय, 2.हृषीकेशाय, 3.वैकुण्ठाय, 4.विश्वरूपाय, 5.वासुदेवाय 6.संकर्षणाय, 7.प्रद्युम्नाय, 8.अनिरुद्धाय नमः ।

तृतीयावरणे = शक्तयः श्रीगजाश्च अष्टौ । 1.भारत्यै, 2.पार्वत्यै, 3.चन्द्रायै, 4.शच्यै इति पूर्वादिदिक्षु ।

1.दमकाय, 2.शलभाय, 3.गुग्गुलपे, 4.कुरण्डकाय इति आग्नेयादिषु ।

चतुर्थावरणे = 1.अनुरागाय, 2.विसंवादाय, 3.विजयाय, 4.वल्लभाय 5.मदाय, 6.हर्षाय, 7.बलाय, 8.तेजसे इति अष्टौ

प्रपञ्चमावरणे = लोकपालकाः सायुधाः इन्द्रादयः दशलोकपालाः तेषां दशायुधाश्च - पञ्चावरणेषु पूजयेत्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्मी पूजनयन्त्रम् (5आवरणदेवता:)



पञ्चावरण पूजाक्रमः

प्रथमावरणे = श्रीदेव्याः षडङ्ग शक्तयः 1.देव्यै, 2.पद्मिन्यै, 3.विष्णुपत्न्यै, 4.वरदायै, 5.कमलायै, 6.कमलालयायै

द्वितीयावरणे= दिक्षु वासुदेवादि व्यूहमूर्तयः चत्वारः।
कोणेषु दमनकादि श्रीगजाः चत्वारः।
पार्श्वद्वये - दक्षवामयोः शङ्ख पद्मनिधिद्वयम्।

तृतीयावरणे = लोकमातरः अष्टौशक्तयः ब्राह्म्यादि दुर्गान्ताः ।

चतुर्थावरणे = इन्द्रादि लोकपालाः (शचीदेव्यादिलोकेशशक्तयः)

पञ्चमावरणे = अष्टदिग्गजयुगलाः (अष्टवसवः अष्टमरुतो वा)

लक्ष्मी पीठ पूजा = ओं में मण्डूकादि परतत्वान्त पीठ देवताभ्यो नमः।
पीठपूर्वादि अष्टदिक्षु = 1.विभूत्यै 2.उन्मन्यै 3.कान्त्यै 4.सृष्ट्यै 5.कीर्त्यै 6. सन्मत्यै 7. पुष्ट्यै 8. उत्कृष्टयै नमः –पीठमध्ये - ओं ऋद्ध्यै नमः ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कमलवासिनी यन्त्रम्।



श्रीपीठ नवशक्तयः

1.विभूत्यै, 2.उन्नत्यै, 3.कान्त्यै, 4.दृष्टयै, 5.कीर्त्यैं, 6.सन्नत्यै, 7.व्युष्टयै, 8.उत्कृष्टयै, 9.ऋद्धयै- इति पीठे नवशक्ती: यजेत् ।

प्रथमावरणे = अङ्गैः प्रथमावृतिः।

द्वितीयावरणे = पूर्वादि दिक्षु 1.वासुदेवाय, 2.संकर्षणाय - 3.प्रद्युम्नाय, 4.अनिरुद्धाय इति विष्णोर्व्यूहमूर्तीः पूजयेत् ।

आग्नेयादि विदिक्षु चतुष्कोणेषुश्रीगजान् पूर्वोक्तान्पूजयेत् ।

वामदक्षिणपार्श्वयोः शङ्खनिधये पद्मनिधये इति निधिद्वयम् ।

तृतीयावरणे = बलाक्यादि अष्टौशक्ती: पूजयेत्।

चतुर्थावरणे = इन्द्रादि अष्टौ दिक्पालकानर्चयेत्।

पञ्चमावरणे = वज्रादि दशयुधान् अर्चयेत् (इतिपञ्चावरणं - क्रमः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मूकाम्बिका पूजायन्त्रम्



मूकाम्बिका यन्त्रध्यानम्

यस्यास्ति प्रतिसन्धि वृत्त सहितं मध्यं सबिन्दु क्रमात् –
रामाष्टार्यम भूप विंशति जिना: कोणान्यथाष्टौ नृपाः ।
षड्विंशत्क शरा दशानि परितो वृत्तत्रयं भूपुरम् –
श्रीचक्रं प्रकृतेरिदं हि सकला मत्योंत्थ तेजोमयम् ।।

(कमलवासिनीं लक्ष्मीं संपूजयेत्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री द्वादशाक्षर महालक्ष्मीमन्त्र यन्त्रम्



श्री लक्ष्मी दशाक्षरमन्त्र यन्त्रम्



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री लक्ष्म्येकाक्षर बीजमन्त्र पूजनम्



श्री ज्येष्ठालक्ष्मी मन्त्रपूजन यन्त्रम्



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री लक्ष्मी सप्तविंशत्यक्षर मन्त्रपूजनम्



श्री वसुधालक्ष्मी पूजन यन्त्रम्



वैष्णवपीठ नवशक्तयः = 1. विमला 2. उत्कर्षिणी 3. ज्ञानी 4. क्रिया 5. योगा 6. प्रह्वी 7. सत्या 8. ईशाना 9. अनुग्रहा (वसुधाश्रीयोःपीठे)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

७

क्षीः

चक्राब्जमण्डलम् (पाञ्चरात्रागमे)



श्री लक्ष्मीनारायण पूजामण्डलम्

(चक्रम् = सुदर्शनम् & अब्जं = पद्मं & शङ्खम्)

पञ्चावरण भगवदाराधन योग्यमण्डलम्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

नवकमल मण्डलम् (लक्ष्मी पूजन नवाब्ज मण्डलम्)



नवाब्ज मण्डले लक्ष्मीं सर्वशक्तिसहितां पूजयेत्

सर्वतोभद्र मण्डलम्

लक्ष्मी आराधनोपयुक्त मण्डलम्

(श्री महालक्ष्मीनारायण पञ्चावरणपूजार्हम्)



प्रागुदीच्यां गताः रेखः कुर्या देकोन विंशतिः।
खण्डेन्दु स्त्रिपदः कोणे श्रृङ्खला पञ्चभिः पदैः।
एकादश पदा वल्ली भद्रं तु नवभिः पदैः ।
चतुर्विंशत्पदा वापी विंशत्या परिधिः पदैः ।
मध्ये षोडशभिः कोष्टैः पद्म मष्टदलं स्मृतम् ।
श्वेतेन्दुः श्वङ्खला कृष्णा वल्लीं नीलेन पूरयेत् ।
भद्राऽरुणा सिता वापी परिधिः पीत वर्णिका ।
बाह्यान्तर दले श्वेता कर्णिका पीत वर्णिका ।
परिध्या वोष्टितं पद्मं बाह्ये सत्वं रज स्तमः ।
तन्मध्ये स्थापयेद् देवान् ब्रह्माद्यांश्च सुरेश्वरान् । (स्कान्दे)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नवकलश स्नपन पूजाविधिः



संख्या	द्रव्याणि	स्नपनमन्त्राः	पूज्याः/देवाः	पूज्याः/देव्याः
1.	घृतं	घृतस्नातेति	वासुदेवः	लक्ष्मी
2.	पाद्यं	नारायणाय विद्महे	विष्णुः	शान्तिः
3.	अर्घ्यं	तद्विष्णोः	मधुसूदनः	विभूतिः
4.	आचमनं	न ते विष्णो	त्रिविक्रमः	इच्छा
5.	पञ्चगव्यं	विष्णोः कर्माणि	वामनः	प्रीतिः
6.	दधि	दधिक्राविण्णो	श्रीधरः	रतिः
7.	क्षीरं	आप्यायस्व	हृषीकेशः	माया
8.	मधु	मधुवाता	पद्मनाभः	धीः
9.	फलानि	याःफलिनी	दामोदरः	महिमा

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सर्वतोभद्रमण्डलम् (19 रेखात्मकम्)



चन्द्रमण्डलम्



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री महाविष्णुः

विष्णुं शारद चन्द्रकोटि सदृशं शङ्खं रथाङ्गं गदा -
अम्बोजं सततं सिताब्जनिलयं कान्तं जगन्मोहनम् ।
आबद्धाङ्गद हार कुण्डल महा शोभा स्फुरद्वक्षसं -
श्रीवत्साङ्क मुदार कौस्तुभधरं वन्दे मुनीन्द्रावृत्तम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

द्वादशकलश स्नपन पूजाविधिः



संख्या	द्रव्याणि	स्नपनमन्त्राः	पूज्यादेवाः	पूज्यादेव्याः
1.	रत्नोदकं	त्रातारमिन्द्रमिति	केशवः	श्रीः
2.	लोहतोयं	अष्टाक्षरी	नारायः	वागीश्वरी
3.	सर्वगन्धं	गन्धद्वारां	माधवः	कान्तिः
4.	आज्यं	घृतस्नाता	वासुदेवः	क्रिया
5.	पाद्यं	विष्णुगायत्री	विष्णुः	शान्तिः
6.	दधि	दधिक्राविण्णो	श्रीधरः	रतिः
7.	अर्घ्यं	तद्विष्णोः	मधुसूदनः	विभूतिः
8.	क्षीरं	आप्यायस्व	हृषीकेशः	माया
9.	आचमनं	न ते विष्णुः	त्रिविक्रमः	इच्छा
10.	मधु	मधुवाता	पद्मनाभः	बुद्धिः/धीः
11.	पञ्चगव्यं	विष्णोः कर्माणि	वामनः	प्रीतिः
12.	फलोदकं	याः फलिनी	सत्यः	सरस्वती

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

षोडशकलश स्नपन पूजाविधिः (9 x 9 = 81)

14			9	10			15
8			2	3			11
7			1	4			12
13			6	5			16

संख्या	द्रव्याणि	देवाः	देव्यः	स्नपनमन्त्राः
1.	रत्नोदकं	पुरषः	लक्ष्मी	चन्द्रमामनसो + वायुरजायत
2.	लोहतोयं	सत्यः	वागीशी	नाभया आसीत् + अकल्पयन्
3.	गन्धोदकं	अच्युतः	प्रीतिवर्धिनी	नक्षास्यासन् + पुरुषं पशुं
4.	आज्यं	अनन्तः	वारूणी	यज्ञेन यज्ञं + सन्ति देवाः
5.	पाद्यं	केशवः	श्रीः	सहस्रशीर्षाः + दशाङ्गुलं
6.	अर्घ्यं	नारायणः	वागीश्वरी	पुरुष एवेदं + अतिरोहति
7.	आचमनं	माधवः	कान्तिः	एतावानस्य + अमृतं दिवि
8.	पञ्चगव्यं	गोविन्दः	क्रिया	त्रिपादूर्ध्व + शने अभि
9.	अमृतोदकं	विष्णुः	शान्तिः	तस्माद्विराडजायत + अथोपुरः
10.	मार्जनोदकं	मधुसूदनः	विभूतिः	यत्पुरुषेण हविषा + शरद्धविः
11.	कषायं	त्रिविक्रमः	इच्छा	न यज्ञं वर्हिर्षि + ऋषयश्च ये
12.	कुशोदकं	बामनः	प्रीतिः	तस्माद्यज्ञात् सर्वहुतः + ग्राम्याश्चये
13.	दधि	श्रीधरः	रतिः	नस्माद्यज्ञात् + अजायत
14.	क्षीरं	हृषीकेशः	माया	नस्मादश्वा अजायन्त + अजावयः
15.	मधु	पद्मनाभः	बुद्धिः/धीः	पद्मनाभः वत्पुरुषंव्यदधुः + पादावुच्येते
16.	यबोदकं	दामोदरः	महिमा	दामोदरः बाह्मणोन्य मुखमा + शूद्रो अजायत

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ऋग्विधानोक्त श्रीसूक्तहोम विधिः

य इच्छेत् वरदां देवीं श्रियं नित्यं कुले स्थिताम् ।
स शुचिः प्रयतो भूत्वा जुहुया दाज्य मन्वहम् ॥ 1

श्रियः पञ्चदशर्चंञ्च श्रीकामः सततं जपेत् ।
आवाहयेत् श्रियं पद्मे पञ्चभिः कनकेऽपिवा ॥ 2

उपहारानुपहरेत् शुक्लान् भक्ष्यान् पयो दधी ।
स्थालीपाकं च शालीनां पयसा संप्रकल्पयेत् ॥ 3

चान्द्रायण विपात्मातु प्रपद्येत् प्रयतः श्रियैः ।
सर्वौषधीभिः पाठाभिः स्नात्वाऽद्भिर्पावनै रपि ॥ 4

उपैतु मां देवसखं इति राज्ञोऽभिषेचनी ।
मनसः काम मित्येषा पशुकामाभिषेचनी ॥ 5

कर्दमेनेति यः स्नायात् प्रजाकामः शुचिव्रतः ।
अश्वपूर्णामिति स्नायात् राज्यकामः शुचिव्रतः ॥ 6

रोहिते चर्मणि स्नायात् ब्राह्मणस्तु यथाविधि ।
राजा चर्मणि वैयाघ्रे क्षत्रियस्त्वथ रौरवे ॥ 7

बस्तचर्मणि वैश्यस्तु होमः कार्यस्त्वनन्तरम् ।
चन्द्रा मिति तु पद्मानि जुहुयात् सर्पिषा द्विजः ॥ 8

आदित्यवर्णे त्यनया बिल्वहोमो विधीयते ।
बिल्वोत्थ एववाऽग्निः स्यात् स्थालीपाकं हुनेद्विजः ॥ 9

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दशसाहस्रिको होमः श्रीकामः प्रथमो विधि ः ।
हुत्वा तु प्रयुतं सम्यक् अनन्तां विन्दते श्रियम् ॥ 10

अयुतं शतकृत्वस्तु हुत्वा शुक्लानि सर्पिषा ।
अनन्ता मव्यवच्छिन्नां शाश्वतीं विन्दते श्रियम् ॥ 11

अशक्तौ जप एवोक्तः दशसाहस्रिको वरः ।
जप्त्वा तु प्रयुतं सम्यगनन्तां विन्दते श्रियम् ॥ 12

अयुतं शतकृत्वस्तु जप्त्वा श्रिय मुपाश्नुते ।
अप्स्वेव जुहुया न्नित्यं पद्मा न्ययुतशो निशि ॥ 13

दृष्ट्वा श्रियं चोपरमेत् किलासत्वाद्विधेन वै ।
बिल्वाशी बिल्वनिलयो जुहुद्बिल्वानि सर्पिषा ॥ 14

एकविंशति रात्रेण परां सिद्धिं नियच्छति ।
येन येन च कामेन जुहोति प्रयतः श्रियैः ॥ 15

पद्मान्यथापि बिल्वानि स च कामः समृध्यति ।
सर्वान्कामा नवाप्नोति महलक्ष्म्याः प्रसादतः॥ 16

इति श्रीसूक्तप्रयोगविधिः समाप्तः॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीसूक्तहोम विधिः
(विष्णुधर्मोत्तरोक्तः)

पुष्कर उवाच-

हिरण्यवर्णां हरिणीं ऋचः पञ्चदश द्विजः ।
श्रीसूक्तं कथितं पुण्यं ऋग्वेदे पुष्टिवर्धनम् ॥
रथे अथेषुवाजेति चतस्रस्तु तथा ऋचः ॥
श्रीसूक्तं यजुर्वेदे कथितं पुष्टिवर्धनम् ।
श्रायन्तीयं तथा साम सामवेदे प्रकीर्तितम् ॥
श्रियं दातुर्मयि देहि प्रोक्त माथर्वणे तथा ।
श्रीसूक्तं तु जपेत् भक्त्या तस्याऽलक्ष्मी र्विनश्यति ॥
जुहुया द्यश्च धर्मज्ञो हविष्येण विशेषतः ।
श्रीसूक्तेन तु पद्मानां घृतानां च नृपोत्तमः ॥
अयुतं होमयेत् यस्तु वह्नौ भक्तियुतो नरः ।
पद्महस्तद्वया लक्ष्मी नरं तं उपतिष्ठति ॥
दशायुतं तु पद्मानां जुहुया द्यस्तथा जले ।
नापैति तत्कुलात् लक्ष्मीः विष्णोर्वक्षोगता यथा ॥
घृताक्तानां तु बिल्वानां हुत्वा रामायुतं तथा ।
बहुवित्त मवाप्नोति स यावन् मनसेच्छति ।
बिल्वानां लक्षहोमेन कुले लक्ष्मीमुपाश्नुते ।
पद्माना मथ बिल्वानां कोटि होमं समाचरेत् ॥
श्रद्धानः समाप्नोति देवेन्द्रत्वमपि ध्रुवम् ।
संपूज्य देवीं वरदां यथावत्-

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पद्मैस्सितैर्वा कुसुमैः तथान्यैः ।
क्षीरेणधूपैः परमान्नभक्ष्यैः-
लक्ष्मीमवाप्नोति विधानतश्च ॥

(विष्णुधर्मोत्तरे)

इति श्रीसूक्तप्रयोगविधिः संपूर्णः ॥

श्रीसूक्त जपपूजाहोम फलश्रुतिः (मन्त्ररहस्ये)

अधिकारी यथाकाले यथादेशेयथामनुम्।
यादृग्विधान सन्धानः प्रजपेत् तादृशं फलम्।।

कालदेशक्रिया रूपाद्यनुरूपं लभेन् नरः।
अत्युत्कटेन पुण्येण तस्मिन्नेव हि जन्मनि।।

तत्फलं प्राप्नुयात् सिद्धो नात्र कार्या विचारणा।
पुण्यस्यानुत्कटत्वे तुचिरात्किञ्चित्फलं लभेत्।।

प्रतिबन्धक बाहुल्ये फलं जन्मान्तरे लभेत्।
न देव तोषणं व्यर्थं भविष्यति कदाचन।।
तस्मान्मन्त्रं जपेद्योगी यतश्शुद्धेन्द्रियक्रियः।।

श्रीसूक्तहोमफलश्रुतिः

बिल्वं श्रीसूक्तजापी निजभुवि मुखजो वर्धयित्वाऽस्यपूर्वं -
पत्रै स्त्रिस्वादु युक्तैः कुसुम फल समित् स्कन्धभेदै स्ततश्च।
तन्मूलै र्मण्डलात् प्राक्सुनियत चरितोऽसौ हुता न्निर्मलात्मा-
रूपं पश्येद् रमायाःकथमपि न पुन स्तत्कुले स्या दलक्ष्मीः।।

(प्रपञ्चसार-संग्रहे)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मीहोमे श्रीसूक्तमन्त्रविभाग क्रमः (षोडशधा हुनेत्)

ऋचः संख्या	ऋषिः	छन्दः	देवता	श्रीसूक्त ऋचः (मन्त्राः)	पूजायाः षोडशोपचाराः16
1.	आनन्द ऋषिः	अनुष्टुप्	श्री	हिरण्यवर्णां.....+.....मआवह स्वाहा ॥	आवाहनम्
2.	कर्दमऋषिः	अनुष्टुप्	अग्निदेवता	तांम आवह.....+.....पुरुषानहं स्वाहा ॥	आसनम्
3.	चिक्लीतऋषिः	अनुष्टुप्	अग्निदेवता	अश्वपूर्वां.....+.....जुषतां स्वाहा ॥	पाद्यम्
4.	इन्दिरासुतऋषिः	बृहती	अग्निदेवता	कांसोस्मितां.....+.....श्रियं स्वाहा ॥	आचमनम्
5.	अनन्दऋषिः	त्रिष्टुप्	अग्निर्देवता	चन्द्रां प्रभासां.....+.....त्वां वृणे स्वाहा ॥	अर्घ्यं (उपहारः)
6.	कर्दम ऋषिः	त्रिष्टुप्	अग्निदेवता	आदित्यवर्णे.....+.....अलक्ष्मीः स्वाहा ॥	स्नानम् (अभिषेकः)
7.	चिक्लीतऋषिः	अनुष्टुप्	अग्निदेवता	उपैतुमां.....+.....दधातुमे स्वाहा ॥	वस्त्रयुग्मम्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ऋचः संख्या	ऋषिः	छन्दः	देवता	श्रीसूक्त ऋचः (मन्त्राः)	पूजायाः षोडशोपचाराः
8.	इन्दिरासुतऋषिः	अनुष्टुप्	अग्निर्देवता	क्षुत्पिपासां.....+.....गृहात् स्वाहा ॥	भूषणानि आभरणम्
9.	आनन्दऋषिः	अनुष्टुप्	अग्निर्देवता	गन्धद्वारां.....+.....श्रियं स्वाहा ॥	गन्धाः
10.	कर्दमऋषिः	अनुष्टुप्	अग्निर्देवता	मनसः काम.....+.....यशः स्वाहा ॥	पुष्पाणि
11.	चिक्लीतऋषिः	अनुष्टुप्	अग्निर्देवतां	कर्दमेन.....+.....पद्ममालिनीं स्वाहा ॥	धूपम्
12.	इन्दिरासुत ऋषिः	अनुष्टुप्	अग्निर्देवता	आपःसृजन्तु.....+.....मे कुले स्वाहा ॥	दीपम्
13.	आनन्दऋषिः	अनुष्टुप्	अग्निर्देवता	आर्द्रां पुष्करिणीं.....+.....म आवह स्वाहा॥	मधुपर्कम् (निवेदनम्)
14.	कर्दमऋषिः	अनुष्टुप्	अग्निर्देवता	आर्द्रां यःकरिणीं.....+.....म आवह स्वाहा॥	नैवेद्यम् (प्रदक्षिणम्)
15.	चिक्लीतऋषिः	अनुष्टुप्	अग्निर्देवता	तां म आवह.....+.....पुरुषानह स्वाहा ॥	नमस्कारः
16.	श्रीऋषिः	गायत्री	लक्ष्मी देवता	महालक्ष्म्यै च.....+.....प्रचोदयात् स्वाहा ॥	प्रार्थना

इति श्रीसूक्त श्रीसपर्या क्रमः समाप्तः ॥ लक्ष्मीतन्त्रोक्तभोगाः

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीसूक्त दुर्गास्तव संपुटीकरण क्रमः
(रुद्रयामळ तन्त्रोक्तः)

1. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद -
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीति मशेष जन्तोः-
स्वस्थैः स्मृता मति मतीव शुभां ददासि -
ओं हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् -
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह -
दारिद्र्य दुःख भय हारिणि का त्वदन्या-
सर्वोपकार करणाय सदार्द्र चित्ता ॥ (स्वाहा)

2. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीति मशेष जन्तोः-
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥
दारिद्र्य दुःख भय हारिणि का त्वदन्या
सर्वोपकार करणाय सदार्द्र चित्ता ॥ (स्वाहा)

3. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः-
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं अश्वपूर्वां रथमध्यां हस्तिनाद प्रबोधिनीम् ।
श्रियं देवी मुपह्वये श्रीर्मा देवी जुषताम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दारिद्र्य दुःख भय हारिणि का त्वदन्या-
सर्वोपकार करणाय सदार्द्र चित्ता ॥

4. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः-
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं कां सोस्मितां हिरण्य प्राकारामार्द्रां -
ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मे स्थितां पद्मवर्णां तामिहो पह्वये श्रियम् ॥
दारिद्र्य दुःख भय हारिणि का त्वदन्या-
सर्वोपकार करणाय सदार्द्र चित्ता ॥

5. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः-
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके -
देव जुष्टामुदाराम् ।
तां पद्मनेमीं शरणमहं प्रपद्ये अलक्ष्मीमें नश्यतां त्वां वृणे ॥

दारिद्र्य दुःख भय हारिणि का त्वदन्या-
सर्वोपकार करणाय सदार्द्र चित्ता ॥

6. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः-
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं आदित्य वर्णे तपसोऽधिजातो -

वनस्पतिस्तव वृक्षोऽथ बिल्वः ।

तस्यफलानि तपसा नुदन्तु मायान्त -

रायाश्च बाह्या अलक्ष्मीः ॥

दारिद्य दुःख भय हारिणि का त्वदन्या -

सर्वोपकार करणाय सदार्द्र चित्ता ॥

7. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद

श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।

ओं दुर्गे स्मृता हरसि भीतिम शेषजन्तोः -

स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।

ओं उपैतु मां देव सखः कीर्तिं श्च मणिना सह ।

प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिं मृद्धिं ददातु मे ॥

दारिद्य दुःख भय हारिणि का त्वदन्या-

सर्वोपकार करणाय सदार्द्र चित्ता ॥

8. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद

श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।

ओं दुर्गे स्मृता हरसि भीति मशेष जन्तोः -

स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।

ओं क्षुत्पिपासामलां ज्येष्ठा मलक्ष्मीं नाशयाम्यहम् ।

अभूति मसमृद्धिञ्च सर्वा न्निर्णुद मे गृहात् ॥

दारिद्य दुःख भय हारिणि का त्वदन्या -

सर्वोपकार करणाय सदार्द्र चित्ता ॥

9. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद

श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः -
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
दारिद्र्य दुःख भय हारिणि का त्वदन्या -
सर्वोपकार करणाय सदार्द्र चित्ता ॥

10. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः -
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं मनसःकाम माकूतिं वाचः सत्य मशीमहि ।
पशूनां रूप मन्नस्य मयि श्रीःश्रयतां यशः ॥
दारिद्र्य दुःख भय हारिणि का त्वदन्या -
सर्वोपकार करणाय सदार्द्र चित्ता ॥

11. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः -
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं कर्दमेन प्रजाभूता मयि संभव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥
दारिद्र्य दुःख भय हारिणि का त्वदन्या -
सर्वोपकार करणाय सदार्द्र चित्ता ॥

12. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः -
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं आपःसृजन्तुस्निग्धानि चिक्लीत वसमे गृहे ।
निच देवीं मातरं श्रियं वासय मे कुले ॥
दारिद्र्य दुःख भय हारिणि का त्वदन्या-
सर्वोपकार करणाय सदार्द्र चित्ता ॥

13. ओं श्रीं ह्रीं श्रीं कमले कमलालये
प्रसीदप्रसीद श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः-
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं आर्द्रां पुष्करिणीं पुष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
दारिद्र्य दुःख भय हारिणि का त्वदन्या -
सर्वोपकार करणाय सदार्द्र चित्ता ॥

14. ओं श्रीं ह्रीं श्रीं कमले कमलालये
प्रसीदप्रसीद श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः-
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं आर्द्रां यःकरिणीं यष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
दारिद्र्य दुःख भय हारिणि का त्वदन्या-
सर्वोपकार करणाय सदार्द्र चित्ता ॥

15. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः -
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं तां म आवह जातवेदो लक्ष्मीमनप गामिनीम् ।
यस्यां हिरण्यं प्रभूतिं गावो दास्यो ऽश्वान् -
विन्देयं पुरुषानहम् ॥
दारिद्य दुःख भय हारिणि का त्वदन्या -
सर्वोपकार करणाय सदार्द्र चित्ता ॥

16. ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीदप्रसीद
श्रीं ह्रीं श्रीं ओं महालक्ष्म्यै नमः ।
ओं दुर्गे स्मृता हरसि भीतिम शेष जन्तोः-
स्वस्थैः स्मृतामतिमतीवशुभां ददासि ।
ओं यः शुचिः प्रयतो भूत्वा जुहुया दाज्य मन्वहम् ।
श्रियः पञ्चदशर्चञ्च श्रीकाम स्सततं जपेत् ॥
दारिद्य दुःख भय हारिणि का त्वदन्या-
सर्वोपकार करणाय सदार्द्र चित्ता ॥

इति श्री रुद्रयामले शिवपार्वती संवादे प्रोकतः
- श्रीसूक्तस्य दुर्गास्तुति संपुटीरण जप विधिः समाप्तः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी मन्त्रमाला पञ्जरम्

मन्त्र विनियोगः

ओं अस्य श्री लक्ष्मीपञ्जरस्तोत्र महामन्त्रस्य - ब्रह्मा ऋषिः, - पंक्तिः छन्दः - श्रीमहालक्ष्मी देवता –श्रीं बीजं-स्वाहा शक्तिः - श्रियै इति कीलकं - मम सर्वाभीष्ट सिद्धयर्थे लक्ष्मीपञ्जरस्तोत्र जपे विनियोगः।।

करन्यासः

ओं श्रीं ह्रीं विष्णुवल्लभायै – अङ्गुष्ठाभ्यां नमः।

ओं श्रीं ह्रीं जगज्जनन्यै –तर्जनीभ्यां नमः ।

ओं श्रीं ह्रीं सिद्धिसेवितायै – मध्यमाभ्यां नमः।

ओं श्रीं ह्रीं सिद्धिदात्र्यै –अनामिकाभ्यां नमः।

ओं श्रीं ह्रीं वाञ्चितपूरिकायै –कनिष्ठिकाभ्यां नमः।

ओं श्रीं ह्रीं श्रीं श्रियै नमः स्वाहेति-करतल-करपृष्ठाभ्यां नमः।

अङ्गन्यासः

ओं श्रीं ह्रीं विष्णुवल्लभायै-हृदयाय नमः।

ओं श्रीं ह्रीं जगज्जनन्यै-रजनन्यै-शिरसे स्वाहा।

ओं श्रीं ह्रीं सिद्धिसेवितायै-शिखायै वषट्।

ओं श्रीं ह्रीं सिद्धिदात्र्यै –कवचाय हुम्।

ओं श्रीं ह्रीं वाञ्छित पूरिकायै - नेत्रेभ्यो वौषट्।

ओं श्रीं ह्रीं श्रीं श्रियै नमः स्वाहा - अस्त्राय फट्।

ध्यानम् -

वन्दे लक्ष्मीं परिशिवमयीं शुद्ध जांबूनदाभां -
तेजोरूपां कनक वसनां सर्वभूषोज्वलाङ्गीम् ।
बीजापूरं कनक कलशं हेमपद्मं दधानां -
आद्यां शक्तिं सकल जननीं विष्णु वामाङ्ग संस्थाम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शरणं त्वां प्रपन्नोऽस्मि महालक्ष्मि हरिप्रिये ।
प्रसादं कुरु देवेशि मयि दृष्टे ऽपराधिनि ॥
कोटि कन्दर्प लावण्यां सौंदर्यैक स्वरूपताम् ।
सर्वमङ्गल माङ्गल्यां श्रीरामां शरणं व्रजे ॥

मूलमन्त्राः मालामन्त्रश्च

1. ओं श्रीं ह्रीं ऐं क्लीं नमो विष्णुवल्लभायै - महामायायै - कं खं गं घं ङं नमस्ते नमस्ते -मां पाहि पाहि -रक्ष रक्ष - धनं धान्यं श्रियं समृद्धिं देहि देहि - श्रीं श्रियै नमः स्वाहा ।

2. ओं श्रीं ह्रीं ऐं क्लीं नमो जगज्जनन्यै - वात्सल्यनिधये - चं छं जं झं ञं नमस्ते - नमस्ते - मां पाहि पाहि - रक्ष रक्ष - श्रियं प्रतिष्ठां वाक्सिद्धिं मे देहि देहि - श्रीं श्रियै नमः स्वाहा ।

3. ओं श्रीं ह्रीं ऐं क्लीं सिद्धि सेवितायै – सकला भीष्टदान दीक्षितायै - टं ठं डं ढं णं नमस्ते नमस्ते - मां पाहि पाहि - रक्ष रक्ष – सर्वतो अभयं देहि देहि - श्रीं श्रियै नमः स्वाहा ।

4. ओं श्रीं ह्रीं ऐं क्लीं नमः सिद्धि दात्र्यै – महा अचिन्त्य शक्तिकायै - तं थं दं धं नं नमस्ते नमस्ते - मां पाहि पाहि - रक्ष रक्ष - मे सर्वाभीष्ट सिद्धिं देहि देहि - श्रीं श्रियै नमः स्वाहा ।

5. ओं श्रीं ह्रीं ऐं क्लीं नमो वाञ्छितपूरिकायै - सर्वसिद्ध मूलभूतायै - पं फं बं भं मं नमस्ते नमस्ते - मां पाहि पाहि - रक्ष रक्ष - मे मनोवाञ्छितां सर्वार्थभूतां सिद्धिं देहि देहि - श्रीं श्रियै नमः स्वाहा ।

6. ओं श्रीं ह्रीं ऐं क्लीं कमले कमलालये - मह्यं- प्रसीद प्रसीद – महालक्ष्मि तुभ्यं नमो नमस्ते जगद्धितायै - यं रं लं वं शं षं सं हं ळं क्षं नमस्ते नमस्ते - मां पाहि पाहि - रक्ष रक्ष - मे वश्याकर्षण मोहन स्तम्भनो चाटन ताडना चिन्त्य शक्ति वैभवं देहि देहि - श्रीं श्रियै नमः स्वाहा।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

7. ओं श्रीं ह्रीं ऐं क्लीं धात्र्यै नमः स्वाहा ।

8. ओं श्रीं ह्रीं ऐं क्लीं श्रीं बीजरूपायै नमः स्वाहा ।

9. ओं श्रीं ह्रीं ऐं क्लीं विष्णुवल्लभायै नमः स्वाहा ।

10.ओं श्रीं ह्रीं ऐं क्लीं सिद्ध्यै नमः स्वाहा ।

11.ओं श्रीं ह्रीं ऐं क्लीं बुद्ध्यै नमः स्वाहा ।

12.ओं श्रीं ह्रीं ऐं क्लीं धृत्यै नमः स्वाहा ।

13.ओं श्रीं ह्रीं ऐं क्लीं मत्यै नमः स्वाहा ।

14.ओं श्रीं ह्रीं ऐं क्लीं कान्त्यै नमः स्वाहा ।

15.ओं श्रीं ह्रीं ऐं क्लीं शान्त्यै नमः स्वाहा ।

16.ओं श्रीं ह्रीं ऐं क्लीं सर्वतोभद्ररूपायै नमः स्वाहा ।

17.ओं श्रीं ह्रीं ऐं क्लीं - श्रीं श्रियै नमः स्वाहा।

18.ओं नमो भगवती ब्रह्मादि वेदमातः। वेदोद्भवे - वेदगर्भे – सर्वशक्ति शिरोमणे - श्रीं हरिवल्ल्भे – मम अभीष्टं पूरय पूरय - मां सिद्धिभाजनं कुरु कुरु - अमृतं कुरु कुरु - अभयं कुरु कुरु - सर्वकार्येषु - ज्वल ज्वल - प्रज्वल प्रज्वल - मे सुत शक्तिं दीपयदीपय – मम अहितान् नाशय नाशय - असाध्य कार्यं साधय साधय - ह्रीं ह्रीं ह्रीं ग्लौं ग्लौं ग्लौं - श्रीं श्रियै नमः स्वाहा।। (इति लक्ष्मी मालामन्त्रः १०७ जपं कुर्यात्।।)

(इति लक्ष्मी मन्त्रमालापञ्जरं समाप्तम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी होमे विशेषद्रव्यानां सहस्त्राहुतौ फलानि
(मधु घृत शर्करा त्रि मधुः)

1. बिल्वसमिद्धिः त्रिमधुरसिक्तैः (मधुक्षीरघृतैः) - अभीष्टफलसिद्धिः।
2. खादिरसमिद्धिः त्रिमधुरसिक्तैः (देवदारु इन्धनैः) - वाञ्छितफलप्राप्तिः।
3. अशोकसमिद्धिः त्रिमधुरसिक्तैः (वृक्षकाष्ठैः) भोगसिद्धिः & कन्याप्राप्तिः।
4. चन्दन समिद्धिः त्रिमधुरसिक्तैः (गन्धकाष्ठैः) जगद्वश्यम् & वश्यम्
5. औदुम्बरसमिद्धिः त्रिमधुरसिक्तैः (तदिन्धनैः)- सर्वपाप & निवृत्तिः।
6. शालितण्डुलैः त्रिमधुरसिक्तैः (सिततण्डुलैः) सर्वरोग निवृत्तिः & अन्नाप्तिः।
7. कृष्णतिलैः त्रिमधुरसिक्तैः (तिलधान्यैः)- पापविमुक्तिः & शुभप्राप्तिः।
8. रक्ताब्जैः त्रिमधुरसिक्तैः (रक्तकमलपुष्पैः)-राजवश्यम् । धनप्राप्तिः।
9. बिल्वपत्रैः त्रिमधुरसिक्तैः (श्रीपर्णैः त्रिदलैः) पुत्रप्राप्तिः । सौभाग्यम्।
10. बिल्व पुष्पैः त्रिमधुरसिक्तैः (श्रीपुष्पैः) कुबेरसंपदः & लक्ष्मीलाभः।
11. बिल्वफलैः त्रिमधुरसिक्तैः (फलखण्डैर्वा) भोगप्राप्तिः & ईप्सितफलाप्तिः।
12. बिल्ववृक्षमूलैः त्रिमधुरसिक्तैः (श्रीवृक्षमूलैः) सद्गतिः & ज्ञानप्राप्तिः।
13. सिताब्जैः त्रिमधुरसिक्तैः (श्वेतपद्मैः) धनवृद्धिः मनश्शुद्धिः (शुक्लपञ्चम्यां)
14. नन्द्यावर्तकुसुमैः त्रिमधुरसिक्तैः पूरनक्षत्रे शुभप्राप्तिः & रोगनिवृत्तिः।
15. अशोकवृक्षमूलैः त्रिमधुरसिक्तैः- वश्यम/वधूप्राप्तिः/ जयसिद्धिः।
16. नवनीतलिप्त ईषद् विकसितपद्मैः-धनप्राप्तिः/पुत्रप्राप्तिः। सौख्यम्।
17 त्रिमधु प्लुत दूर्वाभिः (दुर्वाग्रैः) दुरितक्षयः/कुबेरसम्पत्प्राप्तिः। पापक्षयः।
18. त्रिमधुरोक्षित पद्मकन्दैः (उत्पलकन्दाद्यैः) धनप्राप्तिः / आरोग्यसिद्धिः।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

19. त्रिमधुरसिक्तैः मुद्गधान्यैः धान्यसमृद्धिः /दोषनिवृत्तिः ।

20. घृताक्त हरिद्राकन्दैः (सुगन्धहारिद्रकैः) मङ्गलावाप्तिः/ रोगनिवृत्तिः।

21. घृतमधुसिक्तैः हविर्भिः (अन्नैः) आयुः / धनप्राप्तिः। अन्नप्राप्तिः

22. घृताक्तैः हीबेरोशीरादिसुगन्धमूलैः धनप्राप्तिः/पापच्युतिः।

23 शर्करया मिश्रित सितकमलैः (शुक्रवारे) निधिलाभः/वित्तवृद्धिः ।

24 मधुसिक्तैः चम्पकपुष्पैः- सुखावाप्तिः/ द्रविणसमृद्धिः।

25. मधुघृतसिक्तैः हरिद्रान्नैः अन्नसमृद्धिः/ आनन्दाप्तिः ।

26. घृतमिश्रित पायसैः (परमान्नैः) धनप्राप्तिः श्रियःप्राप्तिः।

27. घृताक्त लाजैः (आज्यसिक्तलाजैः) जगद्वश्यम् /धनप्राप्तिः

28 मध्वाक्त लाजैः (गुडधानैः) यशप्राप्तिः /श्रेयःप्राप्तिः ।

29 गव्यपयसा (गोक्षीरण/दुग्धैः) गोसमृद्धिः/धेनुवृद्धिः ।

30 गोसर्पिषा (गोघृतेन/गव्याज्यैः- आयुः/निरोगता ।

31 गव्यदध्ना (नूतनदधिभिः) पुत्रप्राप्तिः/सुखवृद्धिः।

32 नवनीतयुक्त नागवल्लीदलैः धनप्राप्तिः/रोगनिवृत्तिः।

33 घृताक्त पूगीफलैः (क्रमुकफलैः) धनवृद्धिः शत्रुक्षयम् ।

34 शर्कराभिः इक्षुखण्डैः (रसखण्डैः) लक्ष्मीप्राप्तिः/वसुप्राप्तिः ।

35 तिलसिद्धार्थ कैर्युक्त हविषा - अभीष्टसिद्धिः /बाधानिवृत्तिः।

36 गुळखण्डैः- (गुळगोळकैः) रोगनिवृत्तिः/अरिष्टनिवृत्तिः ।

37 मधुप्लुत मधूकपुष्पैः- वाञ्छिफलावाप्तिः/सम्पत्प्रदम्।

38 मातुलुङ्गफलैः (रक्तडाडिमीफलैः) स्त्रीसौभाग्यम् / कुलवृद्धिः।

39 कर्पूरताम्बूलैः (मुखवासयुक्तैः)- सौभाग्यवृद्धिः /सौमङ्गल्यम्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

40 एलालवङ्गादिगन्धद्रव्यैः- राज्यभोगम्/ राष्ट्रसम्मानम्।

41. घृतसिक्तैः आमलकफलैः (धात्री फलैः) - धनावाप्तिः/ आरोग्यसिद्धिः।

42. दध्यन्नैः (चित्रान्नवर्णैः) अन्नसमृद्धिः /पुत्रप्राप्तिः। भुक्तिः।

43 घृताक्त मधुरलड्डुकैः (भक्ष्यैः) वाञ्छितफलसिद्धिः / धनलाभः।

44 घृताक्त अशोक पुष्पैः (कुन्दपुष्पैः) सुपुत्रावाप्तिः/शोकनिवृत्तिः

45. इन्दीवरकुसुमैः (नीलोत्पलपुष्पैः) - कल्याणं/नृपपत्नी वश्यम्।

46. पृथुकैः - (शालितण्डुलनिर्मितः) धनसञ्चयं/सद्गतिप्राप्तिः।

47. नाळिकरैः (नाळिकेरफलचोचकैः)- धनप्राप्तिः/ सुखावाप्तिः।

48 वेणुसमिद्भिः/वैणवतण्डालैः -- योगसिद्धिः / सद्गतिप्राप्तिः।

49. चूतफलैः (सुपक्वआम्रफूलैः) धनप्राप्तिः/जयप्राप्तिः/ पुत्रप्राप्तिः।

50. जम्बीरफलैः (लिकुचफूलैः)-वृष्टिसिद्धिः/सस्यवृद्धिः/आरोग्यम्।

51. कस्तूरीचोचनमृगमदादिभिः (अष्टगन्धैः)- जगद्वश्यम् /राज्यलाभः।

52. कदळीफलैः (रम्भामोचाद्यैः) ईहितफल सिद्धिः । इष्टापूर्तिः।

53. मध्वाक्त बन्धूककुसुमैः (मन्दारपुष्पैः) भाग्य प्राप्तिः/ सम्पत्समृद्धिः।

54. जीरसिन्धुमरीच्याक्तैः सक्तुभिः (अन्नैः) कुबेरसम्पद्। धनप्राप्तिः।

55. मालतीकुसुमैः (सुगन्धपुष्पैश्च) वाक्सिद्धिः/ भाग्यप्राप्तिः।

56. घृतमध्वाक्तैः कुमुदकुसुमैः मन्त्रिवश्यं, सौन्दर्यं / आरोग्यम्।

57. क्षौद्रेण (मधुना) शुद्धमधुभिः- स्वर्णप्राप्तिः/सौभाग्यसिद्धिः।

58. आज्यसिक्तैः याज्ञीय समिद्भिः- सर्वाभीष्टसिद्धिः / वश्यसिद्धिः।

59. कूर्णिकार कुसुमैः - वधूवरप्राप्तिः/ इष्टसिद्धिः / विवाहप्राप्तिः।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

60. तिलतण्डुलमिश्रैः (मिश्रित आहुतिभिः) सकलजनवश्यम्/पुण्यम्।
61. मल्लिकाकुसुमैः (वनमल्लिकाभेदपुष्पैः) जनवश्यं/प्रजावृद्धिः।
62. इक्षुखण्डैः (इक्षुरसूशकलैः) - धनप्राप्तिः/सस्याभिवृद्धिः ।
63. यवनीवारादि धान्यैः (पञ्चयवैः) धान्याभिवृद्धिः सस्यवृद्धिः ।
64. कुङ्कुमकेसरैः (सुगन्धकेसरपुष्पैः) धनावाप्तिः/लक्ष्मीप्राप्तिः।
65. सिद्धार्थकैः (सितसर्षपैः)-गणदोषनिवृत्तिः/शत्रुबाधानिवृत्तिः।
66. गुग्गुलूभिः (सुगन्धधूपचूर्णैः) दुरितनिवृत्तिः/ रोगनाशनम् ।
67. केतकीवकुलादिसुगन्धकुसुमैः- लोकवश्यं/ ईप्सितफलाप्राप्तिः।
68. अतिरसादि अपूपभक्ष्यैः- लक्ष्मीप्रीतिः/ धनप्राप्तिः/ ऐश्वयम्।
69. माषधान्यैः (त्रिमधुप्लुतमाषैः) अपमृत्युविनाशः। अरिष्टशान्तिः
70. गोधूमधान्यैः (त्रिमधुप्लुतगोधूमैः) पुत्रप्राप्तिः/ अरोग्यसिद्धिः।
71. खर्जूर द्राक्षादि (शुष्कफलाहुतिभिः) धनप्राप्तिः/विजयप्राप्तिः ।
72. मधुप्लुत नागवल्लीदलैः (मध्वाक्तैः) सर्वसिद्धिः/वाञ्छितफलावाप्तिः।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अच्युताष्टकम्

अच्युतं केशवं राम नारायणं -
कृष्ण दामोदरं वासुदेवं हरिम् ।
श्रीधरं माधवं गोपिका वल्लभं -
जानकी नायकं राम चन्द्रं भजे ॥ 1

अच्युतं केशवं सत्यभामाधवं -
माधवं श्रीधरं राधिकाराधितम् ।
इन्दिरा मन्दिरं चेतसा सुन्दरं -
देवकी नन्दजं नन्दनं सन्दधे ॥ 2

विष्णवे जिष्णवे शङ्खिने चक्रिणे -
रूक्मिणी राकिने जानकी जानये ।
वल्लकी वल्लभा याचिता यात्मने -
कंसविध्वंसिने वंशिने ते नमः ॥ 3

कृष्णगोविन्दहे रामनारायण -
श्रीपते वासुदेवाजित श्रीनिधे ।
अच्युतानन्द हे माधवाऽधोक्षज -
द्वारका नायक द्रौपदी रक्षक।। 4

राक्षस क्षोभितः सीतया शोभितो -
दण्डका रण्यभू पुण्यदा कारणः।
लक्ष्मणे नान्वितो वानरै स्सेवितो -
ऽगस्त्य संपूजितो राघवः पातु माम्।। 5

धेनुका रिष्टका निष्टकृद्द्वेषिणां -
केशिका कंसहृत् वंशिका वादकः ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पूतना कोपकः सूरजा केलनो -
बाल गोपालकः पातु मां सर्वदा ॥ 6

विद्युदु द्योतवत् प्रस्फुरद्द् वाससं -
प्रावृडं बोदवत् प्रोल्लसद्द् विग्रहम् ।
वन्यया मालया शोभितो रस्तलं -
लोहिताङ्घ्रिद्वयं वारिजाक्षं भजे ॥ 7

कुञ्चितैः कुन्तळैः भाजमा नाननं -
रत्नमौळिं लसत् कुण्डलं कर्णयोः ।
हार के यूरकं कङ्कण प्रोज्वलं -
किङ्किणी मञ्जुळं श्यामळं तं भजे।। 8

अच्युतस्याष्टकं यः पठेदिष्टदं -
प्रेमतः प्रत्यहं पुरुषः संस्पृहम् ।
वृत्ततः सुन्दरं कर्तृविश्वम्बरं-
तस्यवश्यो हरि र्जायते सत्वरम्।।

(इति श्री शङ्कराचार्य विरचितं अच्युताष्टकं संपूर्णम)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी द्वादशनाम स्तोत्रम्

त्रैलोक्य पूजिते देवि कमले विष्णु वल्लभे।
यथा त्वं अचला कृष्णे तथा भव मयि स्थिरा॥

कमला ईश्वरी लक्ष्मी श्चला भूति र्हरिप्रिया।
पद्मा पद्मालया सम्पद् उच्चैःश्रीः पद्मधारिणी॥

द्वादशैतानि नामनि लक्ष्मीं संपूज्य यः पठेत्।
स्थिरा लक्ष्मी र्भवेत् त्तस्य पुत्र दारादिभिः सह॥

।।इति विश्वसारतन्त्रे लक्ष्मी द्वादशनाम स्तोत्रम्।।



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

महालक्ष्मी मातृका स्त्रोत्रम् (रुद्रयामळोक्तं)
(अकारादि क्षकारान्त स्त्रोत्रम्)

शङ्कर उवाच –

अथातः संप्रवक्ष्यामि लक्ष्मीस्तोत्र मनुत्तमम् ।
पठना च्छ्रवणा द्यस्य नरो मोक्ष मावाप्नुयात् ॥ १॥

गुह्या द्गुह्यतरं पुण्यं सर्वदेव नमस्कृतम् ।
सर्वमन्त्रमयं साक्षाच्छृणु पर्वतनन्दिनि ॥ २ ॥

अनन्तरूपिणी लक्ष्मी रपार गुणसागरी ।
अणिमादि सिद्धिदात्री शिरसा प्रणमाम्यहम् ॥ ३॥

आपदुद्धारिणी त्वं हि आद्या शक्तिः शुभा परा ।
आद्या आनन्ददात्री च शिरसा प्रणमाम्यहम् ॥ ४॥

इन्दुमुखी इष्टदात्री इष्टमन्त्र स्वरूपिणी ।
इच्छामयी जगन्मातः शिरसा प्रणमाम्यहम् ॥ ५॥

उमा उमापते स्त्वंतु उत्कण्ठा कुलनाशिनी ।
उर्वीश्वरी जगन्मात र्लक्ष्मीदेवि नमोऽस्तु ते ॥ ६॥

ऐरावतपतेः पूज्या ऐश्वर्याणां प्रदायिनी ।
औदार्यगुण सम्पन्ना लक्ष्मीदेवि नमोऽस्तु ते ॥ ७॥

कृष्णवक्षःस्थिता देवि कलिकल्मषनाशिनी ।
कृष्णाचित्तहरा कर्त्री शिरसा प्रणमाम्यहम् ॥ ८॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कन्दर्पदमना देवि कल्याणी कमलानना ।
करुणार्णवसम्पूर्णा शिरसा प्रणमाम्यहम् ॥ ९॥

खञ्जनाक्षी खञ्जनासा देवि खेदविनाशिनी ।
खञ्जरीटगतिश्चैव शिरसा प्रणमाम्यहम् ॥ १०॥

गोविन्दवल्लभा देवी गन्धर्वकुलपावनी ।
गोलोकवासिनी मातः शिरसा प्रणमाम्यहम् ॥ ११॥

ज्ञानदा गुणदा देवि गुणाध्यक्षा गुणाकरी ।
गन्धपुष्पधरा मातः शिरसा प्रणमाम्यहम् ॥ १२॥

घनश्यामप्रिया देवि घोरसंसार तारिणी ।
घोर पापहरा चैव शिरसा प्रणमाम्यहम् ॥ १३॥

चतुर्वेदमयी चिन्त्या चित्तचैतन्यदायिनी ।
चतुराननपूज्या च शिरसा प्रणमाम्यहम् ॥ १४॥

चैतन्यरूपिणी देवि चन्द्रकोटिसमप्रभा ।
चन्द्रार्कनखरज्योति र्लक्ष्मि देवि नमाम्यहम् ॥ १५॥

चपला चतुराध्यक्षी चरमे गतिदायिनी ।
चराचरेश्वरी लक्ष्मि शिरसा प्रणमाम्यहम् ॥ १६॥

छत्रचामरयुक्ता च शत्रुचातुर्यनाशिनी ।
छिद्रौघहारिणी मातः शिरसा प्रणमाम्यहम् ॥ १७॥

जगन्माता जगत्कर्त्री जगदाधाररूपिणी ।
जयप्रदा जानकी च शिरसा प्रणमाम्यहम् ॥ १८॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

जानकीशप्रिया त्वं हि जनकोत्सवदायिनी ।
जीवात्मनां च त्वं मातः शिरसा प्रणमाम्यहम् ॥ १९॥

झिञ्झीरव स्वना देवि झञ्झावात निवारिणी ।
झर्झर प्रियवाद्या च शिरसा प्रणमाम्यहम् ॥ २०॥

टङ्कप्रदायिनी त्वं हि त्वञ्च ठकाररूपिणी ।
ढक्कादि वाद्यप्रणया डम्फवाद्य विनोदिनी ॥ २१ ॥

डमरुप्रणया मातः शिरसा प्रणमाम्यहम् ॥
तप्तकाञ्चनवर्णाभा त्रैलोक्यलोकतारिणी ॥ २२॥

त्रिलोकजननी लक्ष्मि शिरसा प्रणमाम्यहम् ।
त्रिलोक्यसुन्दरी त्वं हि तापत्रयनिवारिणी ॥ २३॥

त्रिगुणधारिणी मातः शिरसा प्रणमाम्यहम् ।
त्रैलोक्यमङ्गला त्वं हि तीर्थमूलपदद्वया ॥ २४॥

त्रिकालज्ञा त्राणकर्त्री शिरसा प्रणमाम्यहम् ।
दुर्गतिर्नाशिनी त्वं हि दारिद्र्यापद्विनाशिनी ॥ २५॥

द्वारकावासिनी मातः शिरसा प्रणमाम्यहम् ।
देवतानां दुराराध्या दुःखशोक विनाशिनी ॥ २६॥

दिव्याभरण भूषाङ्गी शिरसा प्रणमाम्यहम् ।
दामोदरप्रिया त्वं हि दिव्ययोग प्रदर्शिनी ॥ २७॥

दयामयी दयाध्यक्षी शिरसा प्रणमाम्यहम् ।
ध्यानातीता धराध्यक्षा धनधान्यप्रदायिनी ॥ २८॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

धर्मदा धैर्यदा मातः शिरसा प्रणमाम्यहम् ।
नवगोरोचना गौरी नन्दनन्दन गेहिनी ॥ २९॥

नवयौवन चार्वङ्गी शिरसा प्रणमाम्यहम् ।
नानारत्नादि भूषाढ्या नानारत्न प्रदायिनी ॥ ३०॥

नितम्बिनी नलिनाक्षी लक्ष्मि देवि नमोऽस्तु ते ।
निधुवनप्रेमानन्दा निराश्रयगतिप्रदा ॥ ३१॥

निर्विकारा नित्यरूपा लक्ष्मि देवि नमोऽस्तु ते ।
पूर्णानन्दमयी त्वं हि पूर्णब्रह्मसनातनी ॥ ३२॥

परा शक्तिः परा भक्तिः लक्ष्मि देवि नमोऽस्तु ते ।
पूर्णचन्द्रमुखी त्वं हि परानन्द प्रदायिनी ॥ ३३॥

परमार्थ प्रदा लक्ष्मि शिरसा प्रणमाम्यहम् ।
पुण्डरीकाक्षिणी त्वं हि पुण्डरीकाक्ष गेहिनी ॥ ३४॥

पद्मरागधरा त्वं हि शिरसा प्रणमाम्यहम् ।
पद्मा पद्मासना त्वं हि पद्ममाला विधारिणी ॥ ३५॥

प्रणवरूपिणी मातः शिरसा प्रणमाम्यहम् ।
फुल्लेन्दुवदना त्वं हि फणिवेणी विमोहिनी ॥ ३६॥

फणिशायि प्रिया मातः शिरसा प्रणमाम्यहम् ।
भक्तिमुक्तिप्रदा त्वं हि भक्तानुग्रहकारिणी ॥ ४०॥

भवार्णव त्राणकर्त्री लक्ष्मि देवि नमोऽस्तु ते ।
भक्तप्रिया भागीरथी भक्तमङ्गल दायिनी ॥ ४१॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भयदा ऽभयदात्री च लक्ष्मि देवि नमोऽस्तु ते ।
मनोभीष्टप्रदा त्वं हि महामोहविनाशिनी ॥ ४२॥

मोक्षदा मानदात्री च लक्ष्मि देवि नमोऽस्तु ते ।
महाधन्या महामान्या माधवमनोमोहिनी ॥ ४३॥

मुखरा प्राणहन्त्री च लक्ष्मि देवि नमोऽतु ते ।
यौवनपूर्णसौन्दर्या योगमाया योगेश्वरी ॥ ४४॥

युग्मश्रीफलवृक्षा च लक्ष्मि देवि नमोऽस्तु ते ।
युग्माङ्गदविभूषाढ्या युवतीनां शिरोमणिः ॥ ४५ ॥

यशोदासुतपत्नी च लक्ष्मि देवि नमोऽस्तु ते ।
रूपयौवनसम्पन्ना रत्नालङ्कारधारिणी ॥ ४६॥

राकेन्दुकोटिसौन्दर्या लक्ष्मी देवि नमोऽस्तु ते ।
रमा रामा रामपत्नी राजराजेश्वरी तथा ॥ ४७॥

राज्यदा राज्यहन्त्री च लक्ष्मि देवि नमोऽस्तु ते ।
लीला लावण्य सम्पन्ना लोकानुग्रह कारिणी ॥ ४८॥

ललना प्रीतिदात्री च लक्ष्मि देवि नमोऽस्तु ते ।
विद्याधरी तथा विद्या वसुदा त्वन्तु वन्दिता ॥ ४९॥

विन्ध्याचल वासिनी च लक्ष्मीदेवि नमोऽस्तु ते ।
विश्वकर्त्री विश्वभर्त्री विश्वत्रात्री विश्वेश्वरी ॥ ३७॥

विश्वाराध्या विश्वबाह्या लक्ष्मीदेवि नमोऽस्तु ते ।
विष्णुप्रिया विष्णुशक्तिः बीजमन्त्रस्वरूपिणी ॥ ३८॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वरदा वाक्यसिद्धा च शिरसा प्रणमाम्यहम् ।
वेणुवाद्यप्रिया त्वं हि वंशीवाद्य विनोदिनी ॥ ३९॥

विद्युद्गौरी महादेवि लक्ष्मी देवि नमोऽस्तु ते ।
शुंभकाञ्चन गौराङ्गी शङ्ख कङ्कण धारिणी ॥ ५०॥

शुभदा शीलसम्पन्ना लक्ष्मीदेवि नमोऽस्तु ते ।
षड्चक्र भेदिनी त्वं हि षडैश्वर्य प्रदायिनी ॥ ५१॥

षोडशी वयसा त्वन्तु लक्ष्मि देवि नमोऽस्तु ते ।
सदानन्दमयी त्वं हि सर्वसम्पत्ति दायिनी ॥ ५२॥

संसार तारिणी देवि शिरसा प्रणमाम्यहम् ।
सुकेशी सुखदा देवि सुन्दरी सुमनोरमा ॥ ५३॥

सुरेश्वरी सिद्धिदात्री शिरसा प्रणमाम्यहम् ।
सर्वसङ्कटहन्त्री त्वं सत्यसत्त्वगुणान्विता ॥ ५४॥

सीतापतिप्रिया देवि शिरसा प्रणमाम्यहम् ।
हेमाङ्गिनी हास्यमुखी हरिचित्त विमोहिनी ॥ ५५॥

हरिपादप्रिया देवि शिरसा प्रणमाम्यहम् ।
क्षेमङ्करी क्षमादात्री क्षौमवासेविधारिणी ॥ ५६॥

क्षीणमध्या च क्षेत्राङ्गी लक्ष्मीदेवि नमोऽस्तु ते

शङ्कर उवाच -

अकारादि क्षकारान्तं लक्ष्मीदेव्याः स्तवं शुभम् ।
पठितव्यं प्रयत्नेन त्रिसन्ध्यञ्च दिने दिने ॥ ५७॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पूजनीया प्रयत्नेन कमला करुणामयी ।
वाञ्छाकल्पलता साक्षाद्भुक्तिमुक्ति प्रदायिनी ॥ ५८॥

इदं स्तोत्रं पठेद्यस्तु श्रुणुयात् श्रावयेद् अपि ।
इष्टसिद्धि र्भवेत्तस्य सत्यं सत्यं हि पार्वति ॥ ५९॥

इदं स्तोत्रं महापुण्यं यः पठेद् भक्तिसंयुतः ।
तञ्च दृष्ट्वा भवेन्मूको वादी सत्यं न संशयः ॥ ६०॥

श्रृणुया छ्रावये द्यस्तु पठेद्वा पाठयेदपि ।
राजानो वश मायान्ति तं दृष्ट्वा गिरिनन्दिनि ॥ ६१॥

तं दृष्ट्वा दुष्टसङ्घाश्च पलायन्ते दिशो दश ।
भूत प्रेत ग्रहा यक्षा राक्षसाः पन्नगादयः॥
विद्रवन्ति भयार्ता वै स्तोत्रस्यापि च कीर्तनात् ॥ ६२॥

सुराश्च ह्यसुराश्चैव गन्धर्व किन्नरादयः ।
प्रणमन्ति सदा भक्त्या तं दृष्ट्वा पाठकं मुदा ॥ ६३॥

धनार्थी लभते चार्थं पुत्रार्थी च सुतं लभेत् ।
राज्यार्थी लभते राज्यं स्तवराजस्य कीर्तनात् ॥ ६४॥

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गना गमः ।
महापापोपपापञ्च तरन्ति स्तवकीर्तनात् ॥ ६५॥

गद्यपद्यमयी वाणी मुखात्तस्य प्रजायते ।
अष्टसिद्धिमवाप्नोति लक्ष्मीस्तोत्रस्य कीर्तनात् ॥ ६६॥

वन्ध्या चापि लभेत् पुत्रं गर्भिणी प्रसवेत्सुतम् ।
पठनात् स्मरणात् सत्यं वच्मि ते गिरिनन्दिनि ॥ ६७॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

भूर्जपत्रे समालिख्य रोचनाकुङ्कुमेन तु ।
भक्त्या सम्पूजयेद्यस्तु गन्धपुष्पाक्षतैस्तथा ॥ ६८॥

धारयेद्दक्षिणे बाहौ पुरुषः सिद्धिकाङ्क्षया ।
योषिद्वामभुजे धृत्वा सर्वसौख्यमयी भवेत् ॥ ६९॥

विषं निर्विषतां याति अग्निर्याति च शीतताम् ।
शत्रवो मित्रतां यान्ति स्तवस्यास्य प्रसादतः ॥ ७०॥

बहुना किमिहोक्तेन स्तवस्यास्य प्रसादतः ।
वैकुण्ठे च वसेन्नित्यं सत्यं वच्मि सुरेश्वरि ॥ ७१॥

इति श्रीरुद्रयामले स्तवराजाख्यं लक्ष्मीस्तोत्रं सम्पूर्णम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

प्रसन्नलक्ष्मी स्तोत्रम् (तान्त्रिकम्)

(श्री आपदुद्धारण स्तोत्रम्)

ओङ्कार रूपिणी देवि विशुद्ध सत्त्वरूपिणि ।
देवानां जननी त्वं हि प्रसन्ना भव सुन्दरि ।। 1

तन्मात्रश्चैव भूतानि तव वक्षःस्थलं स्मृतम् ।
त्वमेव वेदगम्या तु प्रसन्ना भव सुन्दरि ।। 2

देव दानव गन्धर्व यक्ष राक्षस किन्नरैः ।
स्तूयसे त्वं सदा लक्ष्मि प्रसन्ना भव सुन्दरि ॥ 3

लोका तीता द्वैता तीता समस्त भूत वेष्टिता ।
विद्वज्जन कीर्त्तिता च प्रसन्ना भव सुन्दरि ॥ 4

परिपूर्णा सदा लक्ष्मि त्रात्री तु शरणार्थिषु ।
विश्वाद्या विश्वकर्त्री च प्रसन्ना भव सुन्दरि ॥ 5

ब्रह्मरूपा च सावित्री त्वद्दीप्त्या भासते जगत् ।
विश्वरूपा वरेण्या च प्रसन्ना भव सुन्दरि ॥ 6

क्षित्यप्तेजो मरुद् व्योम पञ्चभूत स्वरूपिणी ।
बन्धादेः कारणं त्वं हि प्रसन्ना भव सुन्दरि ॥ 7

महेशे त्वं हेमवती कमला केशवेऽपि च ।
ब्रह्मणः प्रेयसी त्वं हि प्रसन्ना भव सुन्दरि ॥ 8

चण्डी दुर्गा कालिका च कौशिकी सिद्धिरूपिणी ।
योगिनी योगगम्या च प्रसन्ना भव सुन्दरि ॥ 9

बाल्ये च बालिका त्वं हि यौवने युवती ति च ।
स्थविरे वृद्धरूपा च प्रसन्ना भव सुन्दरि ।। 10

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

गुणमयी गुणा तीता आद्या विद्या सनातनी ।
महत्तत्त्वादि संयुक्ता प्रसन्ना भव सुन्दरि ॥ 11

तपस्विनी तपस्सिद्धिः स्वर्गसिद्धि स्तदर्थिषु ।
चिन्मयी प्रकृति स्त्वं तु प्रसन्ना भव सुन्दरि ॥ 12

त्वमादि र्जगतां देवि त्वमेव स्थिति कारणम् ।
त्वमन्ते निधन स्थानं स्वेच्छा चारा त्वमेव हि ॥ 13

चरा चराणां भूतानां बहि रन्त स्त्व मेव हि ।
व्याप्य व्यापक रूपेण त्वं भासि भक्तवत्सले ॥ 14

त्वन्मायया हृतज्ञाना नष्टात्मानो विचेतसः ।
गतागतं प्रपद्यन्ते पापपुण्य वशात्सदा ॥ 15

तावन्सत्यं जगद्भाति शुक्तिका रजतं यथा ।
यावन् न ज्ञायते ज्ञानं चेतसा नान्वगामिनी ॥ 16

त्वज्ज्ञानात्तु सदा युक्तः पुत्रदार गृहादिषु ।
रमन्ते विषया सर्वान् अन्ते दुःखप्रदान् ध्रुवम् ॥ 17

त्वदाज्ञया तु देवेशि गगने सूर्यमण्डलम् ।
चन्द्रश्च भ्रमते नित्यं प्रसन्ना भव सुन्दरि ॥ 18

ब्रह्मेश विष्णु जननी ब्रह्माख्या ब्रह्मसंश्रया ।
व्यक्ता व्यक्ता च देवेशि प्रसन्ना भव सुन्दरि ॥ 19

लचला सर्वगा त्वं हि मायातीता महेश्वरि ।
शिवात्मा शाश्वता नित्या प्रसन्ना भव सुन्दरि ॥ 20

सर्वकाय नियन्त्री सर्वभूते श्वरेश्वरी ।
अनन्ता निष्कला त्वं हि प्रसन्ना भव सुन्दरि ॥ 21

Center for Shaiva Studies, Pondicherry Collection

CC0: In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सर्वेश्वरी सर्ववन्द्या अचिन्त्या परमात्मिका ।
भुक्ति मुक्ति प्रदा त्वं हि प्रसन्ना भव सुन्दरि ॥ 22

ब्रह्माणी ब्रह्मलोके त्वं वैकुण्ठे सर्वमङ्गला ।
इन्द्राणी अमरावत्या मम्बिका वरूणालये ॥ 23

यमालये कालरूपा कुबेरभवने शुभा ।
महानन्दाऽग्निकोणे च प्रसन्ना भव सुन्दरि ॥ 24

नैऋत्यां रक्तदन्ता त्वं वायव्यां मृगवाहिनी ।
पाताले वैष्णवीरूपा प्रसन्ना भव सुन्दरि ॥ 25

सुरसा त्वं मणिद्वीपे ऐशान्यां शूलधारिणी ।
भद्रकाली च लङ्कायां प्रसन्ना भव सुन्दरि ॥ 26

रामेश्वरी सेतुबन्धे सिंहले देवमोहिनी ।
विमला त्वं च श्रीक्षेत्रे प्रसन्ना भव सुन्दरि ॥ 27

कालिका त्वं कालिघट्टे कामाख्या नीलपर्वते ।
विरजा ओड्रदेशे त्वं प्रसन्ना भव सुंदरि ॥ 28

वाराणस्या मन्नपूर्णा अयोध्यायां महेश्वरी ।
गयासुरी गयाधाम्नि प्रसन्ना भव सुंदरि ॥ 29

भद्रकाली कुरूक्षेत्रे त्वंच कात्यायनी व्रजे ।
माहामाया द्वारकायां प्रसन्ना भव सुन्दरि ॥ 30

क्षुधा त्वं सर्व जीवानां वेला च सागरस्य हि ।
महेश्वरी मथुरायां च प्रसन्ना भव सुन्दरि ॥ 31

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

रामस्य जानकी त्वं च शिवस्य मनमोहिनी ।
दक्षस्य दुहिता चैव प्रसन्ना भव सुन्दरि ॥ 32

विष्णु भक्ति प्रदां त्वं च कंसासुर विनाशिनी ।
रावणनाशिनी चैव प्रसन्ना भव सुन्दरि ॥ 33

फलश्रुतिः

लक्ष्मीस्तोत्र मिदं पुण्यं यः पठेद् भक्ति संयुतः ।
सर्व ज्वरभयं नश्येत् सर्व व्याधि निवारणम् ॥ 34

इदं स्तोत्रं महापुण्यं आपदुद्धार कारणम् ।
त्रिसंध्य मेकसन्ध्यं वा यः पठेत् सततं नरः ॥ 35

मुच्यते सर्व पापेभ्यो तथा तु सर्व सङ्कटात् ।
मुच्यते नात्र सन्देहो भुवि स्वर्गे रसातले ॥ 36

समस्तं च तथा चैकं यः पठेत् भक्तितत्परः ।
स सर्व दुष्करं तीर्त्वा लभते परमां गतिम् ॥ 37

सुखदं मोक्षदं स्तोत्रं यः पठेद्भक्ति संयुक्तः ।
स तु कोटि तीर्थ फलं प्राप्नोति नात्र संशयः ॥ 38

एका देवी तु कमला यस्मिं स्तुष्टा भवे त्सदा ।
तस्या ऽसाध्यं तु देवेशि नास्ति किंचित् जगत्रये ॥ 39

पठनादपि स्तोत्रस्य किं न सिद्धयति भूतले ।
तस्मात् स्तोत्रवरं प्रोक्तं सत्यं सत्यं हि पार्वति ॥ 40

॥ इति शाक्ततन्त्रस्थं प्रसन्नलक्ष्मी आपदुद्धार स्तोत्रम् संपूर्णम्॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

श्री माहात्म्य स्तुतिः (इन्द्रकृता)
(विष्णुपुराणान्तर्गता)

सिह्मासनगतः शक्रः संप्राप्य त्रिदिवं पुनः ।
देवराज्ये स्थितो देवीं तुष्टावाब्ज करांबुजः ॥ 1

इन्द्र उवाच ॥

नमामि सर्वलोकानां जननी मब्धिसंभवाम् ।
श्रिय मुन्निद्र पद्माक्षीं विष्णुवक्षः स्थलस्थिताम् ॥ 2

पद्मालयां पद्मकरां पद्मपत्र निभेक्षणाम् ।
वन्दे पद्ममुखीं देवीं पद्मनाभ प्रिया महम् ॥ 3

त्वं सिद्धि स्त्वं स्वधा स्वाहा सुधा त्वं लोकपावनी ।
सन्ध्या रात्रिः प्रभा भूति मेंधा श्रद्धा सरस्वती ॥ 4

यज्ञविद्या महाविद्या गुहाविद्या च शोभने ।
आत्मविद्या च देवित्वं विमुक्ति फलदायिनी ॥ 5

आन्वीक्षिकी त्रयी वार्ता दण्डनीति स्त्वमेव च ।
सौम्यासौम्यै र्जगद्रूपैः त्वयैतत् देविपूरितम् ॥ 6

का त्वन्या त्वामृते देवि सर्वयज्ञमयं वपुः ।
अध्यास्ते देवदेवस्य योगिचिन्त्यं गदाभृतः ॥ 7

त्वया देवि परित्यक्तं सकलं भुवनत्रयम् ।
विनष्टप्रायमभवत् त्वयेदानीं समेधितम् ॥ 8

दाराः पुत्रास्तथाऽगार सुहृत् धान्य धनादिकम् ।
भवत्येत न्महाभागे नित्यं त्वत् दीक्षणा न्नृणाम् ॥ 9

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शरीरारोग्य मैश्वर्यं अरिपक्ष क्षयः सुखम् ।
देवि त्वत् दृष्टि दृष्टानां पुरुषाणां न दुर्लभम् ॥ 10

त्वं माता सर्वलोकानां देव देवो हरिः पिता ।
त्वयैतत् विष्णुना चांब जगद्व्याप्तं चराचरम् ॥ 11

मा नः केशं तथा गोष्टं मा गृहं मा परिच्छदम् ।
मा शरीरं कलत्रञ्च त्यजेथाः सर्वपावनि ॥ 12

मा पुत्रान् मा सुहृद्वर्गान् मा पशून् मा विभूषणम् ।
त्यजेथा मम देवस्य विष्णो र्वक्षः स्थलालये ॥ 13

सत्येन शौच सत्याभ्यां तथा शीलादिभि र्गुणैः ।
त्यज्यन्ते ते नरा स्सद्यः संत्यक्ता ये त्वयाऽमले ॥ 14

त्वया ऽवलोकिता स्सद्यः शीलाद्यै स्सकलै र्गुणैः ।
धनैश्वर्यैश्च युज्यन्ते पुरुषा निर्गुणा अपि ॥ 15

स श्लाघ्यः स गुणी धन्यः स कुलीन स्स बुद्धिमान् ।
स शूरस्स च विक्रान्तो यं त्वं देवि निरीक्षसे ॥ 16

सद्यो वैगुण्यमायान्ति शीलाद्यास्सकला गुणाः ।
पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥ 17

न ते वर्णयितुं शक्ताः गुणान् जिह्वापि वेधसः ।
प्रसीद देवि पद्माक्षी मास्मां स्याक्षीः कदाचन ॥ 18

श्री पराशर उवाच ॥

एवं श्री संस्तुता सम्यक् प्राहादृश्या शतक्रतुम् ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पश्यतां सर्व देवानां सर्वभूतस्थिता द्विज ॥ 19

श्रीरुवाच ॥

परितुष्टास्मि देवेश स्तोत्रेणानेन ते हरे ।
वरं वृणीष्व यास्त्विष्टो वरदाहं तवागता ॥ 20

इन्द्र उवाच ॥

वरदा यदि मे देवि वरार्हौ यदि चाप्यहम् ।
त्रैलोक्यं न त्वया त्याज्यं एष मेऽस्तु वरः परः ॥ 21

स्तोत्रेण यस्त्वथैतेन त्वां स्तोष्यत्यब्धिसंभवे ।
स त्वया न परित्याज्यो द्वितीयोऽस्तु वरो मम ॥ 22

श्रीरुवाच ॥

त्रैलोक्यं त्रिदशश्रेष्ठ न संत्यक्ष्यामि वासव ।
दत्तो वरो मयाऽयं ते स्तोत्राराधन तुष्टया ॥ 23

यश्च सायं तथा प्रातः स्तोत्रेणानेन मानवः ।
मां तोष्यति न तस्याहं भविष्यामि पराङ्मुखी ॥ 24

श्रीपराशरः उवाच -

एवं वरं ददौ देवी देवराजाय वै पुरा ।
मैत्रेय श्रीर्महाभाग स्तोत्राराधन तोषिता ॥ 25

भृगोः ख्यात्यां समुत्पन्ना श्रीः पूर्वं उदधेः पुनः ।
देव दानव यत्नेन प्रसूता ऽमृत मन्थने ॥ 26

एवं यदा जगत्स्वामी देवदेवो जनार्दनः ।
अवतारं करोत्येषा तदा श्रीःतत्सहायिनी ॥ 27

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पुनश्च पद्माद्द्भूता आदित्योऽभूद् यदा हरिः ।
यदा तु भार्गवो रामः तदा ऽभूद् धरणी त्वियम् ॥ 28

राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि ।
अन्येषु चावतारेषु विष्णो रेषा ऽनपायिनी ॥ 29

देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णो र्देहानुरूपां वै करोत्येषा ऽऽत्मन स्तनुम् ॥ 30

यश्चैतच्छृणुयाज्जन्म लक्ष्म्या यश्च पठेन्नरः ।
श्रियो न विच्युति स्तस्य गृहे यावत् कुलत्रयम् ॥ 31

पठ्यते येषु चैवैषा गृहेषु श्रीकथा मुने । (श्रीस्तवो मुने)
अलक्ष्मीः कलहाधारा न तेष्वास्ते कदाचन ॥ 32

एतत् ते कथितं सर्वं यन्मां त्वं परिपृच्छसि ।
क्षीराब्धौ श्रीर्यदा जाता पूर्वं भृगुसुता सती ॥ 33

इति सकल विभूत्यवाप्ति हेतुः -
स्तुतिरियमिन्द्रमुखोद्गता हि लक्ष्म्याः ।
अनुदिनमिह पठ्यते नृभिर्यैः -
वसति न तेषु कदाचिदप्यलक्ष्मीः ॥

।।इति श्री विष्णुपुराणान्तर्गता श्री माहात्म्य स्तुतिः समाप्ता।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सिद्धलक्ष्मी स्तोत्रम् (ब्रह्मणाकृतम)
(ब्रह्मपुराणान्तर्गतम)

स्तोत्र विनियोगः

ॐ अस्य श्री सिद्धलक्ष्मी स्तोत्र मन्त्रस्य - हिरण्यगर्भ ऋषिः – अनुष्टुप् छन्दः – श्री महाकाली – महालक्ष्मी – महासरस्वत्यो देवताः। श्रीं बीजं - ह्रीं शक्तिः - क्लीं कीलकं - मम सर्व क्लेश पीडा परिहारार्थं – सर्वदुःख दारिद्य नाशार्थं – सर्वकार्यसिद्धयर्थं च श्री सिद्धलक्ष्मी स्तोत्रपाठे विनियोगः ।।

ऋष्यादि न्यासः

ओं हिरण्यगर्भऋषये नमः -शिरसि। अनुष्टुप्छन्दसे नमः - मुखे। श्री महाकाली-महालक्ष्मी-महासरस्वती देवताभ्यो नमो-हृदि। श्रीं बीजाय नमो-गुह्ये। ह्रीं शक्तये नमः -पादयोः। क्लीं कीलकाय नमो – नाभौ। विनियोगाय नमः-सर्वाङ्गे।

करन्यासः

ओं श्रीं सिद्धलक्ष्म्यै - अङ्गुष्ठाभ्यां नमः। ओं ह्रीं विष्णुतेजये - तर्जनीभ्यां नमः। ओं क्लीं अमृतानन्दायै - मध्यमाभ्यां नमः। ओं श्रीं दैत्यमारन्यै - अनामिकाभ्यां नमः। ओं ह्रीं तेजःप्रकाशिन्यै - कनिष्ठिकाभ्यां नमः। ओं क्लीं श्रीं ब्राह्यै वैष्णव्यै रुद्राण्यै करतलकर पृष्ठाभ्यां नमः ।।

अङ्गन्यासः

ओं श्रीं सिद्धलक्ष्म्यै - हृदयाय नमः। ओं ह्रीं विष्णुतेजसे - शिरसे स्वाहा। ओं क्लीं अमृतानन्दायै - शिखायै वषट्। ओं श्रीं दैत्यमारिण्यै - कवचाय हुं। ओं ह्रीं तेजःप्रकाशिन्यै नेत्रत्रद्वयाय वौषट् । ओं क्लीं श्रीं ब्राह्मयै वैष्णव्यै रुद्राण्यै - अस्त्राय फट्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

"ओं श्रीं ह्रीं क्लीं श्रीं सिद्धलक्ष्म्यै नमः" इति मन्त्रेण तालत्रयं कृत्वा – दिग्बन्धनं – कृत्वा –ततो त्रिशक्तिमयीं सिद्धलक्ष्मीं ध्यायेत्।

ध्यानम् -

ब्राह्मीं च वैष्णवीं भद्रां षड् भुजां च चतुर्मुखीम्।
त्रिनेत्रां खड्ग त्रिशूल पद्म चक्र गदा धराम् ।।
पीताम्बरधरां देवीं नानालङ्कार भूषिताम्।
तेजःपुञ्जधरीं श्रेष्ठां, ध्यायेद् बाल कुमारिकाम् ।।

स्वहृदते लमित्यादिभिः पञ्चापचारपूजां कुर्यात्

स्तोत्रम् -

ओं कारं लक्ष्मी रूपं तु, विष्णुं हृदय मव्ययम् ।
विष्णु मानन्द मव्यक्तं, ह्रींकारं बीज रूपिणिम् ॥ 1

क्लीं अमृता नन्दिनीं भद्रां सदा त्यानन्द दायिनीम्।
श्रीं दैत्य शमनीं शक्तिं मालिनीं शत्रु मर्दिनीम् ॥ 2

तेजः प्रकाशिनीं देवीं वरदां शुभ कारिणीम्।
ब्राह्मीं च वैष्णवीं रौद्रीं कालिका रूप शोभिनीम् ॥ 3

अकारे लक्ष्मीरूपं तु उकारे विष्णु मव्ययं ।
मकारः पुरुषो ऽव्यक्तो देवी प्रणव उच्यते ॥ 4

सूर्यकोटि प्रतीकाशं चन्द्रकोटि समप्रभम् ।
तन्मध्ये निकरं सूक्ष्मं ब्रह्मरूपं व्यवस्थितम् ॥ 5

ओंङ्कारं परमानन्दं सदैव सुख सुन्दरीं ।
सिद्धलक्ष्मि मोक्षलक्ष्मि आद्यलक्ष्मि नमोऽस्तु ते ॥ 6

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्रयम्बके गौरि नारायणि नमोऽस्तु ते ॥ 7

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

प्रथमं त्र्यम्बका गौरी द्वितीयं वैष्णवी तथा ।
तृतीयं कमला प्रोक्ता चतुर्थं सुन्दरी तथा ॥ 8.

पञ्चमं विष्णुशक्तिश्च षष्ठं कात्यायनी तथा ।
वाराही सप्तमं चैव ह्यष्टमं हरिवल्लभा ॥ 9

नवमी खड्गिनी प्रोक्ता दशमं चैव देविका ।
एकादशं सिद्धलक्ष्मी द्वादशं हंस वाहिनी ॥ 10

फलश्रुतिः

एतत्स्तोत्रवरं देव्याः ये पठन्ति सदा नराः ।
सर्वापद्भ्यो विमुच्यन्ते नात्र कार्या विचारणा ॥ 11

एक मासं द्विमासं च त्रिमासं मास चतुष्टयम् ।
पञ्चमासं च षण्मासं त्रिकालं यः सदा पठेत् ॥ 12

ब्राह्मणः क्लेशितो दुःखी दारिद्र्यामय पीडतिः ।
जन्मान्तर सहस्त्रोत्थै र्मुच्यते सर्व किल्बिषैः ॥ 13

दरिद्रो लभते लक्ष्मीं अपुत्रो पुत्रवान् भवेत् ।
धन्यो यशस्वी शत्रुघ्नो, वह्नि चोर भयेषु च ॥ 14

शाकिनी भूत वेताल सर्प व्याघ्र निपातने ।
राजद्वारे सभास्थाने कारागृह निबन्धने ॥ 15

ईश्वरेण कृतं स्तोत्रं, प्राणिनां हित कारकम् ।
स्तुवन्तु ब्राह्मणाः नित्यं, दारिद्र्यं न च बाधते ॥ 16

सर्वपाप हरा लक्ष्मीः सर्व सिद्धि प्रदायिनी ।
सर्वैश्वर्य प्रदादेवी सर्व सौभाग्य दायिनी ॥ 17

।। इति श्री ब्रह्मपुराणे सिद्धलक्ष्मी स्तोत्रं संपूर्णम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

श्री महालक्ष्म्यष्टकम् (इन्द्र प्रोक्तम्)

इन्द्र उवाच ॥

नमस्तेऽस्तु महामाये श्रीपीठे सुरपूजिते ।
शङ्ख चक्र गदाहस्ते महालक्ष्मि नमोऽस्तुते ॥ 1

नमस्ते गरुडारूढे कोलासुर भयंकरी ।
सर्वपाप हरेदेवि महालक्ष्मि नमोऽस्तुते ॥ 2

सर्वज्ञे सर्वं वरदे सर्वदुष्ट भयंकरी ।
सर्वदुःख हरे देवि महालक्ष्मि नमोऽस्तुते ॥ 3

सिद्धि बुद्धि प्रदे देवि भुक्ति मुक्ति प्रदायिनि ।
मन्त्रमूर्ते महादेवि महालक्ष्मि नमोऽस्तुते ॥ 4

आद्यन्तरहिते देवि आदिशक्ति महेश्वरी ।
योगज्ञे योगसंभूते महालक्ष्मि नमोऽस्तुते ॥ 5

स्थूल सूक्ष्म महारौद्रे महाशक्ति महोदरे ।
महापापहरे देवि महालक्ष्मि नमोऽस्तुते ॥ 6

पद्मासनस्थिते देवि परब्रह्मस्वरूपिणि ।
परमेशी जगन्मातः महालक्ष्मि नमोऽस्तुते ॥ 7

श्वेतांबरधरे देवि नानालंकार भूषिते ।
जगत् स्थिते जगन्मातः महालक्ष्मि नमोऽस्तुते ॥ 8

(फलश्रुतिः)

महालक्ष्म्यष्टकं स्तोत्रं यः पठेत् भक्तिमान्नरः ।
सर्वसिद्धि मवाप्नोति राज्यं प्राप्नोति सर्वदा ॥

एक काले पठेन्नित्यं महापाप विनाशनम् ।
द्विकालं यः पठेन्नित्यं महाशत्रु विनाशनम् ॥

त्रिकालं यः पठेन्नित्यं धनधान्य समन्वितः ।
महालक्ष्मी भवेन्नित्यं प्रसन्ना वरदा शुभा ॥

(इति महेन्द्रकृतं महालक्ष्म्यष्टकं संपूर्णम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

लक्ष्मी स्तोत्र दशकम् (सर्वदेवकृतम्)

क्षमस्व भगवत्यम्ब क्षमाशीले परात्परे ।
शुद्धसत्त्व स्वरूपे च कोपादि परिवर्जिते ॥ १॥

उपमे सर्व साध्वीनां देवीनां देवपूजिते ।
त्वया विना जगत्सर्वं मृततुल्यं च निष्फलम् ॥ २॥

सर्व सम्पत् स्वरूपा त्वं सर्वेषां सर्वरूपिणी ।
राजेश्वर्यधिदेवी त्वं त्वत्कलाः सर्व योषितः ॥ ३॥

कैलासे पार्वती त्वं च क्षीरोदे सिन्धु कन्यका ।
स्वर्गे च स्वर्गलक्ष्मी स्त्वं मर्त्यलक्ष्मीश्च भूतले ॥ ४॥

वैकुण्ठे च महालक्ष्मी र्देवदेवी सरस्वती ।
गङ्गा च तुलसी त्वं च सावित्री ब्रह्मलोकतः ॥ ५॥

कृष्ण प्राणाधिदेवी त्वं ग़ोलोके राधिका स्वयम् ।
राजराजेश्वरी त्वं च वृन्दावन वने वने ॥ ६॥

कृष्णप्रिया त्वं भाण्डीरे चन्द्रा चन्दन कानने ।
विरजा चम्पक वने शतशृङ्गे च सुन्दरी ॥ ७॥

पद्मावती पद्मवने मालती मालती वने ।
कुन्द दन्ती कुन्द वने सुशीला केतकी वने ॥ ८॥

कदम्ब माला त्वं देवि कदम्ब काननेऽपि च ।
राजलक्ष्मी राजगृहे गृहलक्ष्मी गृहे गृहे ॥ ९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

इत्युक्त्वा देवताः सर्वा मुनयो मनव स्तथा ।
रुरुदु र्नम्र वदनाः शुष्क कण्ठोष्ठ तालुकाः ॥ १० ॥

(फलश्रुतिः)

इति लक्ष्मी स्तवं पुण्यं सर्व देवैः कृतं शुभम् ।
यः पठेत् प्रात रुत्थाय स वै सर्वं लभेद् ध्रुवम् ॥ ११ ॥

अभार्यो लभते भार्यां विनीतां सुसुतां सतीम् ।
सुशीलां सुन्दरीं रम्या मति सुप्रिय वादिनीम् ॥ १२ ॥

पुत्र पौत्रवतीं शुद्धां कुलजां कोमलां वराम् ।
अपुत्रो लभते पुत्रं वैष्णवं चिरंजीविनम् ॥ १३ ॥

परमैश्वर्य युक्तं च विद्यावन्तं यशस्विनम् ।
भ्रष्ट राज्यो लभेद् राज्यं भ्रष्टश्री र्लभते श्रियम् ॥ १४ ॥

हतबन्धु र्लभेद् बन्धुं धनभ्रष्टो धनं लभेत् ।
कीर्ति हीनो लभेत् कीर्तिं प्रतिष्ठां च लभेद् ध्रुवम् ॥ १५ ॥

सर्वमङ्गलदं स्तोत्रं शोक सन्ताप नाशनम् ।
हर्षानन्दकरं शश्वद् धर्म मोक्ष सुहृत् प्रदम् ॥ १६ ॥

इति शाक्त तन्त्रे सर्वदेवोक्तं लक्ष्मीस्तोत्रं सम्पूर्णम् ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीः

कमलवासिनी स्तोत्रम् (देवेन्द्रकृतम्)

श्रीपुरन्दर उवाच-

नमः कमल वासिन्यै नारायण्यै नमो नमः।
कृष्ण प्रियायै सततं महालक्ष्म्यै नमो नमः॥ 1

पद्म पत्रेक्षणायै च पद्मास्यायै नमो नमः।
पद्मासनायै पद्मिन्यै वैष्णव्यै च नमो नमः॥ 2

सर्वासम्पत् स्वरूपिण्यै सर्वाऽराध्यै नमो नमः।
हरिभक्ति प्रदात्र्यै च हर्षदात्र्यै नमो नमः॥ 3

कृष्णवक्षःस्थितायै च कृष्णेशायै नमो नमः।
चन्द्रशोभा स्वरूपायै रत्नपद्मे च शोभने ॥ 4

सम्पत्यधिष्ठातृ देव्यै महा देव्यै नमो नमः।
नमो वृद्धि स्वरूपायै वृद्धिदायै नमो नमः॥ 5

वैकुण्ठे या महालक्ष्मी या लक्ष्मी क्षीरसागरे ।
स्वर्ग लक्ष्मीरिन्द्रगेहे राजलक्ष्मी नृपालये ॥ 6

गृहलक्ष्मीश्च गृहिणी गेहे च गृह देवता ।
सुरभिः सागरे जाता दक्षिणा यज्ञकामिनी ॥ 7

अदिति दैवमाता त्वं कमला कमलालया ।
स्वाहा त्वं च हविर्दाने कव्यदाने स्वधा स्मृता ॥ 8

त्वं हि विष्णुस्वरूपा च सर्वाधारा वसुन्धरा ।
शुद्ध सत्व स्वरूपा त्वं नारायण परायणा ॥ 9

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

क्रोध हिंसा वर्जिता च वरदा च शुभानना ।
परमार्थ प्रदा त्वं च हरिदास्य प्रदा परा ॥ 10

यया विना जगत्सर्वं भस्मीभूतमसारकम् ।
जीवन्मृतं च विश्वं च शवतुल्यं यया विना ॥ 11

सर्वेषां च परा त्वं हि सर्वबान्धव रूपिणी ।
धर्मार्थ काम मोक्षाणां त्वं च कारण रूपिणी ॥ 12

यथा माता स्तनांन्धानां शिशूनां शैशवे सदा ।
तथा त्वं सर्वदा माता सर्वेषां सर्वरूपतः ॥ 13

मातृहीनः स्तनान्धस्तु स च जीवति दैवतः ।
त्वया हीनो जनः कोऽपि न जीवत्येव निश्चितम् ॥ 14

सुप्रसन्न स्वरूपा त्वं मां प्रसन्ना श्रयम्बिके ।
वैरि ग्रस्तं च विषयं देहि मह्यं सनातनि ॥ 15

अहं यावत् त्वया हीना बन्धुहीनश्च भिक्षुकः ।
सर्वसंपद् विहीनश्च तावदेव हरिप्रिये ॥ 16

ज्ञानं देहि च धर्मं च सर्वसौभाग्य मीप्सितम् ।
प्रभावं च प्रतापं च सर्वाधिकार मेव च ॥ 17

जयं पराक्रमं युद्धे परमैश्वर्य मेव च।
श्री नारायण उवाच-
इत्युत्त्वा च महेन्द्रश्च सर्वैः स्सुरगणैः स्सह ॥ 18

प्रणमाम साश्रुनेत्रो मूर्ध्ना चैव पुनः पुनः।
ब्रह्मा च शङ्कर श्चैव शेषो धर्मश्च केशवः ॥ 19

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सर्वे चक्रुः परीहारं सुरार्थे च पुनः पुनः ।
देवेभ्यश्च वरं दत्वा पुष्पमालां मनोहराम् ॥ 20

केशवाय ददौ लक्ष्मीः सन्तुष्टा सुर संसदि ।
ययु देवाश्च सन्तुष्टाः स्वं स्वं स्थानं च नारद ॥ 21

देवी ययौ हरेः स्थानं हृष्टा क्षीरोद शायिनः ।
ययतु श्चैव स्वगृहं ब्रह्मेशानौ च नारद ॥ 22

दत्वा शुभाशिषं तौ चे देवेभ्यः प्रीति पूर्वकम् ।
इदं स्तोत्रं महापुण्यं त्रिसन्ध्यं यः पठेन् नरः ॥ 23

कुबेरतुल्यः स भवेद्द् राजराजेश्वरो महान् ।
पञ्च लक्ष जपेनैव स्तोत्रसिद्धि र्भवे नृणाम् ॥ 24

सिद्धस्तोत्रं यदि पठेन मासमेकं तु सन्ततम् ।
महासुखी च राजेन्द्रो भविष्यति न संशयः ॥ 25

(इति महेन्द्रकृतं कमलवासिनी स्तोत्रं संपूर्णम्)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

प्रसन्नवरदा लक्ष्मी स्तोत्रम् (अगस्त्य कृतम्)

जय पद्म पलाशाक्षि जय त्वं श्रीपति प्रिये ।
जय मात र्महालक्ष्मि संसारार्णव तारिणि ॥ १ ॥

महालक्ष्मि नमस्तुभ्यं नमस्तुभ्यं सुरेश्वरि ।
हरिप्रिये नम स्तुभ्यं नम स्तुभ्यं दयानिधे ॥ २ ॥

पद्मालये नमस्तुभ्यं नमस्तुभ्यं च सर्वदे ।
सर्वभूत हितार्थाय वसु वृष्टिं सदा कुरु ॥ ३ ॥

जगन्मात र्नमस्तुभ्यं नमस्तुभ्यं दयानिधे ।
दयावति नमस्तुभ्यं विश्वेश्वरि नमो ऽस्तु ते ॥ ४ ॥

नमः क्षीरार्णव सुते नम स्त्रैलोक्य धारिणि ।
वसुदृष्टे नम स्तुभ्यं रक्ष मां शरणागतम् ॥ ५ ॥

रक्ष त्वं देव देवेशि देव देवस्य वल्लभे ।
दारिद्र्यात् त्राहि मां लक्ष्मि कृपां कुरु ममोपरि ॥ ६ ॥

नम स्त्रैलोक्य जननि नम स्त्रैलोक्य पावनि ।
ब्रह्मादयो नमन्ते त्वां जगदानन्द दायिनि ॥ ७ ॥

विष्णुप्रिये नमस्तुभ्यं नमस्तुभ्यं जगद्धिते ।
आर्तिहन्त्रि नम स्तुभ्यं समृद्धिं कुरु मे सदा ॥ ८ ॥

अब्जवासे नमस्तुभ्यं चपलायै नमो नमः ।
चञ्चलायै नम स्तुभ्यं ललितायै नमो नमः ॥ ९ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नमः प्रद्युम्न जननि मात स्तुभ्यं नमो नमः ।
परिपालय भो मातः मां तुभ्यं शरणागतम् ॥ १० ॥

शरण्ये त्वां प्रपन्नो ऽस्मि कमले कमलाऽलये ।
त्राहि त्राहि महालक्ष्मि परित्राण परायणे ॥ ११ ॥

पाण्डित्यं शोभते नैव न शोभन्ति गुणा नरे ।
शीलत्वं नैव शोभेत महालक्ष्मि त्वया विना ॥ १२ ॥

तावद् विराजते रूपं तावत् शीलं विराजते ।
तावद् गुणा नराणां च यावल् लक्ष्मीः प्रसीदति ॥ १३ ॥

लक्ष्मि त्वया लङ्कृत मानवा ये –
पापै र्विमुक्तानृपलोक मान्याः ।
गुणै र्विहीना गुणिनो भवन्ति -
दुःशीलिनः शीलवतां वरिष्ठाः ॥ १४ ॥

लक्ष्मी भूंषयते रूपं लक्ष्मी भूंषयते कुलम् ।
लक्ष्मी भूंषयते विद्यां सर्वा ल्लक्ष्मी र्विशिष्यते ॥ १५ ॥

लक्ष्मि त्वद्गुण कीर्तनेन कमला भूयात्यलं जिह्मतां -
रुद्राद्या रवि चंद्र देवपतयो वक्तुं च नैव क्षमाः ।
अस्माभिस्तव रूप लक्षण गुणां वक्तुं कथं शक्यते -
मात मां परिपाहि विश्व जननि कृत्वा ममेष्टं ध्रुवम् ॥ १६ ॥

दैन्यार्ति भीतं भव ताप पीडितं –
धनै र्विहीनं तव पार्श्व मागतम् ।
कृपा निधित्वात् मम लक्ष्मि सत्वरं –
धनप्रदानाद् धननायकं कुरु ॥ १७ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मां विलोक्य जननि हरिप्रिये –
निर्धनं तव समीप मागतम् ।
देहि मे झटिति लक्ष्मि कराग्रं –
वस्त्र काञ्चन वरान्न मद्भुतम् ॥१८॥

त्वमेव जननी लक्ष्मि पिता लक्ष्मि त्वमेव च ।
भ्राता त्वं च सखा लक्ष्मि विद्या लक्ष्मि त्वमेव च ॥१९॥

त्राहि त्राहि महालक्ष्मि त्राहि त्राहि सुरेश्वरि ।
त्राहि त्राहि जगन्मातः दारिद्र्यात् त्राहि वेगतः ॥२०॥

नमस्तुभ्यं जगद् धात्रि नमस्तुभ्यं नमो नमः ।
धर्माधारे नम स्तुभ्यं नमः सम्पत्ति दायिनि ॥२१॥

दारिद्र्यार्णवमग्नोऽहं निमग्नोऽहं रसातले ।
मज्जन्तं मां करे धृत्वा सुद्धर त्वं रमे द्रुतम् ॥२२॥

किं लक्ष्मि बहुनोक्तेन जल्पितेन पुनः पुनः ।
अन्यन् मे शरणं नास्ति सत्यं सत्यं हरिप्रिये ॥२३॥

एतत् श्रुत्वा ऽगस्ति वाक्यं हृष्यमाणा हरिप्रिया ।
उवाच मधुरां वाणीं तुष्टाऽहं तव सर्वदा ॥२४॥

यत् त्वयोक्त मिदं स्तोत्रं यः पठिष्यति मानवः ।
श्रुणोति च महाभाग तस्याऽहं वशवर्तिनी ॥२५॥

नित्यं पठति यो भक्त्या त्वलक्ष्मी स्तस्य नश्यति ।
ऋणं च नश्यते तीव्रं वियोगं नैव पश्यति ॥२६॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यः पठेत् प्रात रुत्थाय श्रद्धा भक्ति समन्वितः ।
गृहे तस्य सदा स्थास्ये नित्यं श्रीपतिना सह ॥२७॥

सुख सौभाग्य संपन्नो मनस्वी बुद्धिमान् भवेत् ।
पुत्रवान् गुणवान् श्रेष्ठो भोगभोक्ता च मानवः ॥२८॥

इदं स्तोत्रं महापुण्यं लक्ष्म्याः (अ)गस्त्य प्रकीर्तितम् ।
विष्णु प्रसाद जननं चतुर्वर्ग फलप्रदम् ॥२९॥

राजद्वारे जय श्चैव शत्रो श्चैव पराजयः ।
भूत प्रेत पिशाचानां व्याघ्राणां न भयं तथा ॥३०॥

न शस्त्राऽनल तोयौघाद् भयं तस्य प्रजायते ।
दुर्वृत्तानां च पापानां बहु हानि करं परम् ॥३१॥

मन्दिरे करिशालासु गवां गोष्ठे समाहितः ।
पठेत् तद्दोष शान्त्यर्थं महापातक नाशनम् ॥३२॥

सर्व सौख्य करं नृणां आयु रारोग्यदं तथा ।
अगस्त्य मुनिना प्रोक्तं प्रजानां हित काम्यया ॥३३॥

।।इत्यगस्त्य विरचितं प्रसन्नवरदा लक्ष्मीस्तोत्रं समाप्तम्।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीवत्साङ्कमिश्रविरचितः

॥ श्रीस्तवः ॥

श्रीवत्स चिह्नमिश्रेभ्यो नम उक्तिमधीमहे ।
यदुक्तयस्त्रयीकण्ठे यान्ति मङ्गलसूत्रताम् ॥

स्वस्ति श्री र्दिशता दशेषजगतां सर्गोपसर्गस्थितीः -
स्वर्गं दुर्गति मापवर्गिक पदं सर्वञ्च कुर्वन् हरिः ।
यस्या वीक्ष्य मुखं तदिङ्गितपराधीनो विधत्तेऽखिलं
क्रीडेयं खलु नान्यथाऽस्य सदा स्यादैकरस्यात्तया ॥ 1 ॥

हे श्रीर्देवि समस्तलोक जननीं त्वां स्तोतु मीहामहे -
युक्तां भावय भारती प्रगुणय प्रेमप्रधानां धियम् ।
भक्तिं बन्दय नन्दयाश्रित मिमं दासं जनं तावकं -
लक्ष्यं लक्ष्मि कटाक्षवीचि विसृते स्ते स्याम चामी वयम् ॥ 2 ॥

स्तोत्रं नाम किमामनन्ति कवयो यद्यन्यदीयान्गुणान् -
अन्यत्र त्वसतोऽधिरोप्य फणितिस्सातर्हि वन्ध्या त्वयि ।
सम्यक्सत्यगुणाभिवर्णनमथो ब्रूयुः कथं तादृशी -
वाग्वाचस्पतिनाऽपि शक्यरचना त्वत्सद्गुणार्णोनिधौ ॥ 3 ॥

ये वाचां मनसां च दुर्ग्रहतया ख्याता गुणास्तावकाः -
तानेव प्रति साम्बुजिह्वमुदिता हैं मामिका भारती ।
हास्यं तत्तु न मन्महे न हि चकोर्यैकाऽखिलां चन्द्रिकां -
नालं पातु मिति प्रगृह्य रसनामासीत सत्यां तृषि ॥ 4 ॥

क्षोदीयानपि दुष्टबुद्धिरपि निःस्नेहोऽप्यनीहोऽपि ते -
कीर्तिं देविं लिहन्नहं न च विभेम्यज्ञो न जिह्वेमि च ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दुष्येत्सा तु न तावता न हि शुना लीढाऽपि भागीरथी -
दुष्येच्छवा वापि न लज्जते न हि बिभे त्यार्तिस्तु शाम्येच्छुनः ॥ 5 ॥

ऐश्वर्यं महदेव वाऽल्पमथवा दृश्येत पुंसां हि यत् -
तल्लक्ष्म्याः समुदीक्षणात्तव यतः सार्वत्रिकं वर्तते ।
तेनैतेन न विस्मयेम हि जगन्नाथोऽपि नारायणः -
धन्यं मन्यत ईक्षणात् तव यतः स्वात्मान मात्मेश्वरः ॥ 6 ॥

ऐश्वर्यं यदशेष पुंसि यदिदं सौन्दर्य लावण्ययोः -
रूपं यच्च हि मङ्गळं किमपि यल्लोके सदित्युच्यते।
तत्सर्वं त्वदधीनमेव यदतः श्रीरित्यभेदेन वा -
यद्वा श्रीमदितीदृशेन वचसा देवि प्रथा मश्नुते ॥ 7 ॥

देवि त्वन्महिमावधि र्न हरिणानापि त्वया ज्ञायते -
यद्यप्येवमथापि नैव युवयोः सर्वज्ञता हीयते ।
यन्नास्त्येव तदज्ञता मनुगुणां सर्वज्ञताया विदुः -
व्योमाम्भोजमिदन्तया किलविदन् भ्रान्तोऽय मित्युच्यते ॥ 8 ॥

लोके वनस्पति बृहस्पति तारतम्यं यस्याः
प्रसाद परिणाम मुदाहरन्ति ।
सा भारती भगवती तु यदीय दासी -
तां देवदेव महिषीं श्रिय माश्रयामः ॥ 9 ॥

यस्याः कटाक्ष मृदुवीक्षण दीक्षणेन –
सद्य स्समुल्लसित पल्लव मुल्ललास ।
विश्वं विपर्यय समुत्थविपर्ययं प्राक् -
तां देवदेव महिषीं श्रिय माश्रयामः ॥ 10 ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यस्याः कटाक्षवीक्षा क्षणलक्षं लक्षिता महेशास्स्युः ।
श्रीरङ्गराजमहिषी सा मामपि वीक्षतां लक्ष्मीः ॥ 11 ॥

अर्वाञ्चो यत्पदसरसिजद्वन्द्वमाश्रित्य पूर्वे -
मूर्ध्नां यस्यान्वयमुपगता देशिका मुक्तिमापुः ।
सोऽयं रामानुजमुनिरपि स्वीयमुक्तिं करस्थां -
यत्सम्बन्धादमनुत कथं वर्ण्यते कूरनाथः ॥ 12 ॥

इति श्रीहरितकुलतिलक श्रीवत्साङ्कमिश्रविरचित:
श्रीस्तव: संपूर्ण:

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीगुणरत्नकोश स्तवः (श्रीपराशरभट्टार्यैरनुगृहीतः)

श्री पराशर भट्टार्यः श्रीरङ्गेश पुरोहितः।
श्रीवत्साङ्क सुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ।

श्रियै समस्त चिदचि द्विधानव्यसनं हरेः ।
अङ्गीकारिभि रालोकैः सार्थयन्त्यै कृतोऽञ्जलिः ॥ १॥

उल्लास पल्लवित पालित सप्तलोकी-
निर्वाह कोरकित नेम कटाक्ष लीलाम् ।
श्रीरङ्ग हर्म्यतल मङ्गल दीपरेखां -
श्रीरङ्गराज महिषीं श्रिय माश्रयामः ॥ २॥

अनुकल तनुकाण्डा लिङ्गनारम्भशुम्भत् -
प्रतिदिश भुजशाख श्रीसखा नोकहर्धिः ।
स्तन नयन गुलुच्छ स्फारपुष्प द्विरेफाः -
रचयतु मयि लक्ष्मी कल्पवल्ली कटाक्षान् ॥ ३॥

यद्भ्रूभङ्गाः प्रमाणं स्थिरचर रचना तारतम्ये मुरारेः -
वेदान्ता स्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति ।
भोगो पोद्घातकेली चुलकित भगव द्वैश्वरूप्यानुभावा -
सा नः श्रीरास्तृणीताममृतलहरिधीलङ्घनीयै रपाङ्गैः ॥ ४॥

यद्याव त्तव वैभवं तदुचित स्तोत्राय दूरे स्पृहा -
स्तोतुं के वयमित्यदश्च जगृहुः प्राञ्चो विरिञ्चादयः ।
अप्येवं तव देवि! वाङ्मनसयो र्भाषानभिज्ञं पदं -
का वाचः प्रयतामहे कवयितुं स्वस्ति प्रशस्त्यै गिराम् ॥ ५॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

स्तोतारं तमुशन्ति देवि! कवयो यो विस्तृणीते गुणान् -
स्तोतव्यस्य ततश्च ते स्तुतिधुरा मय्येव विश्राम्यति ।
यस्मादस्मदमर्षणीय फणिति स्वीकारतस्ते गुणाः -
क्षान्त्यौदार्य दयादयो भगवति! स्वां प्रस्तुवीरन् प्रथाम् ॥ ६ ॥

सूक्तिं समग्रयतु नः स्वयमेव लक्ष्मीः -
श्रीरङ्गराज महिषी मधुरैः कटाक्षैः ।
वैदग्ध्य वर्ण गुण गुम्भन गौर वैर्यां -
कण्डूल कर्ण कुहराः कवयो धयन्ति ॥ ७ ॥

अनाघ्रातावद्यं बहुगुण परीणाहि मनसो -
दुहानं सौहार्दं परिचित मिवाथापि गहनम् ।
पदानां सौभ्रात्रा दनिमिष निषेव्यं श्रवणयोः -
त्वमेव श्री र्मह्यं बहुमुखय वाणी विलसितम् ॥ ८ ॥

श्रियः श्रीः श्रीरङ्गेशय! तव च हृद्यां भगवतीं -
श्रियं त्वत्तो ऽप्युच्चै र्वयमिह फणामः श्रृणुतराम् ।
दृशौ ते भूयास्तां सुखतरलतारे श्रवणतः -
पुन र्हर्षोत्कर्षात् स्फुटतु भुजयोः कञ्चुकशतम् ॥ ९ ॥

देवि! श्रुतिं भगवतीं प्रथमे पुमांसः -
त्वत्सद्गुणौघ मणि कोशगृहं गृणन्ति ।
तद्द्वार पाटनपटूनि च सेतिहास -
सन्तर्कणस्मृति पुराण पुरस्सराणि ॥ १० ॥

आहु र्वेदानमानं कतिचन कतिचाराजकं विश्वमेतत् -
राजन्वत्केचिदीशं गुणिनमपि गुणैस्तं दरिद्राण मन्ये ।
भिक्षावन्ये सुराजम्भवमिति च जडास्ते तलातल्यकार्षुः -
ये ते श्रीरङ्ग हर्म्याङ्गण कनकलते! न क्षणं लक्ष्यमासन् ॥ ११ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

मनसि विलसताऽ क्षणा भक्तिसिद्धाञ्जनेन -
श्रुतिशिरसि निगूढं लक्ष्मि! ते वीक्षमाणाः ।
निधिमिव महिमानं भुञ्जते येऽपि धन्याः -
ननु भगवति! दैवीं सम्पदं तेऽभिजाताः ॥ १२॥

अस्येशाना जगत इतितेऽधीमहे यां समृद्धिं -
श्रीः श्रीसूक्तं बहुमुखयते तां च शाखानुशाखम् ।
ईष्टे कश्चि ज्जगत इति यः पौरुषे सूक्त उक्तः -
तं च त्वत्कं पतिमधिजगावुत्तरश्चानुवाकः ॥ १३॥

उद्वाहु स्त्वा मुपनिषद सावाह नैका नियन्त्रीं -
श्रीमद्रामायण मपि परं प्राणिति त्वच्चरित्रे ।
स्मर्तारोऽस्मज्जननि यतमे सेतिहासैः पुराणैः -
निन्यु र्वेदानपि च ततमे त्वन्महिम्नि प्रमाणम् ॥ १४॥

आकुग्राम नियामका दपि विभो रासर्व निर्वाहकात् -
ऐश्वर्यं यदि होत्तरोत्तरगुणं श्रीरङ्गभर्तुः प्रिये ।
तुङ्गं मङ्गल मुज्ज्वलं गरिमवत् पुण्यं पुनः पावनं -
धन्यं यत्तददश्च वीक्षणभुव स्ते पञ्चषाः विप्रुषः ॥ १५॥

एको मुक्तातपत्र प्रचलमणि घणत्कारिमौलिर्मनुष्यः -
दृप्यद्दन्तावळस्थो न गणयति न तान् यत्क्षणं क्षोणिपालान् ।
यत्तस्मै तिष्ठतेऽन्यः कृपण मशरणो दर्शयन् दन्तपङ्क्ती -
तत्ते श्रीरङ्गराज प्रणयिनि नयनो दञ्चित न्यञ्चिताभ्याम् ॥ १६॥

रति मंति सरस्वती धृति समृद्धि सिद्धि श्रियः -
सुधा सखि! यतो मुखं चिचलिषेत्तव भ्रूलता ।
ततोमुखमथेन्दिरे! बहुमुखीमहम्पूर्विकां -
विगाह्य च वशंवदाः परिवहन्ति कूलङ्कषाः ॥ १७॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सह स्थिर परित्रस व्रज विरिञ्चिना किञ्चनैः -
अनोकह बृहस्पति प्रबलविक्लवप्रक्रियम् ।
इदं सदसदात्मना निखिलमेव निम्नोन्नतं -
कटाक्ष तदुपेक्षयो स्तव हि लक्ष्मि! तत्ताण्डवम् ॥ १८॥

कालेशंसति योग्यतां चिदचितो रन्योन्य मालिङ्गतोः -
भूताहङ्कृति बुद्धिपञ्चकरणी स्वान्त प्रवृत्तीन्द्रियैः ।
अण्डा नावरणै स्सहस्र मकरो त्तान्भूर्भुवस्सर्वतः -
श्रीरङ्गेश्वरदेवि! ते विहृतये सङ्कल्पमानः प्रियः ॥ १९॥

शब्दादीन् विषयान् प्रदर्श्य विभवं विस्मार्य दास्यात्मकं -
वैष्णव्या गुणमायया ऽऽत्मनिवहान् विप्लाव्य पूर्वः पुमान् ।
पुंसा पण्य वधू विडम्बि वपुषा धूर्ता निवायासयन् -
श्रीरङ्गेश्वरि! कल्पते तव परीहासात्मने केलये ॥ २०॥

यद्दूरे मनसो यदेव तमसः पारे यदत्यद्भुतं -
यत्कालाद पचेलिमं सुरपुरी यद्गच्छतो दुर्गतिः ।
सायुज्यस्य यदेव सूति रथवा यद्दुर्ग्रहं मद्गिरां -
तद्विष्णोः परमं पदं तव कृते मात स्समाम्नासिषुः ॥ २१॥

हेलाया मखिलं चराचर मिदं भोगे विभूतिः परा -
पुण्यास्ते परिचार कर्मणि सदा पश्यन्ति ये सूरयः ।
श्रीरङ्गेश्वर देवि केवल कृपा निर्वाह्य वर्गे वयं -
शेषित्वे परमः पुमान् परिकरा ह्येते तव स्फारणे ॥ २२॥

आज्ञानुग्रह भीमकोमल पुरी पाला फलं भेजुषां -
याऽयोध्ये त्यपराजितेति विदिता नाकं परेण स्थिता ।
भावै रद्भुत भोगभूम गहनै स्सान्द्रा सुधा स्यन्दिभिः -
श्रीरङ्गेश्वर गेहलक्ष्मि! युवयो स्तां राजधानीं विदुः ॥ २३॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

तस्यां च त्वत्कृपाव न्निरवधि जनता विश्रमार्हां वकाशं -
सङ्कीर्णं दास्य तृष्णा कलित परिकरैः पुम्भि रानन्दनिघ्नैः ।
स्नेहा दास्थानरक्षा व्यसनिभि रभयं शार्ङ्ग चक्रासि मुख्यैः-
आनन्दैकार्णवं श्री भगवति! युवयो राहु रास्थानरत्नम् ॥ २४॥

तत्र स्रक्स्पर्शगन्धं स्फुर दुपरि फणा रत्नरोचि र्वितानं -
विस्तीर्यानन्तभोगं तदुपरि नयता विश्वमेकातपत्रम् ।
तैस्तैः कान्तेन शान्तोदित गुणविभवै र्रहता त्वामसङ्ख्यैः -
अन्योन्या द्वैतनिष्ठा घनरस गहनान् देवि! बध्नासि भोगान् ॥ २५॥

भोग्या वामपि नान्तरीयकतया पुष्पाङ्गरागै स्समं -
निर्वृत्त प्रणयाति वाहनविधौ नीताः परीवाहताम् ।
देवि त्वामनु नीलया सह महीदेव्य स्सहस्रं तथा -
याभिस्त्वं स्तन बाहु दृष्टिभि रिव स्वाभिः प्रियं श्लाघसे ॥ २६॥

ते साध्यास्सन्ति देवा जननि! गुणवपु र्वेषवृत्त स्वरूपैः -
भोगैर्वा निर्विशेषाः सवयस इव ये नित्य निर्दोष गन्धाः।
हे श्रीः! श्रीरङ्गभर्तु स्तव च पदपरीचारवृत्त्यै सदाऽपि -
प्रेम प्रद्राणभावा विलहृदय हठात्कार कैङ्कर्यभोगाः ॥ २७॥

स्वरूपं स्वातन्त्र्यं भगवत इदं चन्द्रवदने! -
त्वदाश्लेषो त्कर्षात् भवति खलु निष्कर्ष समये ।
त्वमासी र्मातः श्रीः कमितु रिदमित्थं त्वविभवः -
तदन्तर्भावात्त्वां न पृथ गभिदधत्ते श्रुति रपि ॥ २८॥

तव स्पर्शा दीशं स्पृशति कमले! मङ्गलपदं -
तवेदं नोपाधे रुपनिपतितं श्री रसि यतः ।
प्रसूनं पुष्यन्ती मपि परिमलर्धिं जिगदिषुः -
न चैवं त्वा देवं स्वदत इति कश्चित्कवयते ॥ २९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अपाङ्गा भूयांसो यदुपरि परं ब्रह्म तदभूत् -
अमी यत्र द्वित्रास्स च शतमखादि स्तदधरात् ।
अतः श्री राम्नाय स्तदुभय मुशंस्त्वां प्रणिजगौ -
प्रशस्तिस्सा राज्ञो यदपि च पुरीकोशकथनम् ॥ ३० ॥

स्वतः श्रीस्त्वं विष्णोः स्वमसि तत एवैश भगवान् -
त्वदाय त्तर्धित्वे ऽप्यभव दपराधीन विभवः ।
स्वया दीप्त्या रत्नं भवदपि महार्घं न विगुणं -
न कुण्ठ स्वातन्त्र्यं भवति न चान्या हितगुणम् ॥ ३१ ॥

प्रशकन बलज्योति र्ज्ञानैश्वरी विजयप्रथा -
प्रणत वरण प्रेम क्षेमङ्करत्व पुरस्सराः ।
अपि परिमलः कान्ति र्लावण्य मर्चि रितीन्दिरे! -
तव भगवत श्चैते साधारणाः गुण राशयः ॥ ३२ ॥

अन्येऽपि यौवनमुखाः युवयो स्समानाः -
श्रीरङ्ग मङ्गल विजृम्भण वैजयन्ति ।
तस्मिं स्तव त्वयि च तस्य परस्परेण -
संस्तीर्य दर्पण इव प्रचुरं स्वदन्ते ॥ ३३ ॥

युवत्वादौ तुल्ये ऽप्य परवशता शत्रु शमन-
स्थिरत्वादीन्कृत्वा भगवति! गुणान् पुंस्त्व सुलभान् ।
त्वयि स्त्रीत्वैकान्तान् म्रदिमपति पारार्थ्य करुणा-
क्षमादीन्वा भोक्तुं भवति युवयो रात्मनि भिदा ॥ ३४ ॥

घन कनक द्युती युव दशा मपि मुग्धदशां -
युव तरुणत्वयो रुचित माभरणादि परम् ।
ध्रुव मसमान देश विनिवेशि विभज्य हरौ -
त्वयि च कुशेशयोदर विहारिणि निर्विशसि ॥ ३५ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अङ्गं ते मृदु शीत मुग्ध मधुरो दारै र्गुणै र्गुम्भतः -
क्षीराब्धेः किमृजीषता मुपगताः मन्ये महार्घा स्ततः ।
इन्दुः कल्पलता सुधा मधुमुखा इत्याविलां वर्णनां -
श्रीरङ्गेश्वरि! शान्त कृत्रिम कथं दिव्यं वपु र्नार्हति ॥ ३६॥

प्रणम दनुविधित्सा वासना नम्र मग्रे -
प्रणयि परिचिचीषा कुञ्चितं पार्श्वकेन ।
कनक निकष चञ्चच्चम्पक स्त्रक्समान-
प्रवर मिद मुदारं वर्ष्म वाचा मभूमिः ॥ ३७॥

एकं न्यञ्च्य नतिक्षमं मम परं चाकुञ्च्य पादाम्बुजं -
मध्ये विष्टर पुण्डरीक मभयं विन्यस्य हस्ताम्बुजम् ।
त्वां पश्येम निषेदुषीं प्रतिकलं कारुण्य कूलङ्कष-
स्फारा पाङ्ग तरङ्ग मम्ब! मधुरं मुग्धं मुखं बिभ्रतीम् ॥ ३८॥

सुरभित निगमान्तं वन्दिषी येन्दिरायाः -
तव कमल पलाश प्रक्रियं पाद युग्मम् ।
वहति यदुपमर्दै र्वैजयन्ती हिमाम्भः -
प्लुतिभि रिव नवत्वं कान्त बाहान्तराले ॥ ३९॥

त्वत्स्वीकार कला वलेप कलुषा राज्ञां दृशो दुर्वचाः -
नित्यं त्वन्मधु पानमत्त मधुप श्री निर्भराभ्यां पतिम् ।
दृग्भ्या मेव हि पुण्डरीक नयनं वेदो विदामास ते -
साक्षा ल्लक्ष्मि! तवावलोक विभवः का क्वा कया वर्ण्यते ॥ ४०॥

आनन्दात्मभि रीशमज्जनमद क्षीबालसै रागल-
प्रेमार्द्रै रपि कूल मुद्वहकृपा सम्प्लाविता स्मादृशैः ।
पद्मे! ते प्रतिबिन्दु बद्धकलिक ब्रह्मादि विष्कम्भकैः -
ऐश्वर्योद्गम गद्गदै रशरणं मां पालया ऽऽलोकितैः ॥ ४१॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

पादा रुन्तुद मेव पङ्कज रज श्चेटी भृशा लोकितैः -
अङ्ग म्लानि रथाम्ब! साहस विधौ लीलारविन्द ग्रहः।
डोला ते वनमालया हरिभुजे हा कष्ट शब्दास्पदं -
केन श्री रति कोमला तनु रियं वाचां विमर्द क्षमा ॥ ४२॥

आमर्याद मकण्टकं स्तनयुगं नाद्यापि नालोकित -
भ्रूभेद स्मित विभ्रमा जहति वा नैसर्गिकत्वा ऽयशः ।
सूते शैशव यौवन व्यतिकरो गात्रेषु ते सौरभं -
भोग स्रोतसि कान्त देशिक कर ग्राहेण गाहक्षमः ॥ ४३॥

आमोदाद्भुत शालि यौवनदशा व्याकोच मम्लानिमत् -
सौन्दर्यामृत सेक शीतल मिदं लावण्य सूत्रार्पितम् ।
श्रीरङ्गेश्वरि! कोमलाङ्ग सुमन स्सन्दर्भणं देवि ते -
कान्तोरःप्रतियत्न मर्हति कविं धिङ्माम काण्डाकुलम् ॥ ४४॥

मर्मस्पृशो रससिरा व्यतिविध्य वृत्तैः -
कान्तोप भोग ललितै र्लुलिताङ्ग यष्टिः ।
पुष्पा वलीव रसिक भ्रमरोप भुक्ता -
त्वं देवि नित्य मभिनन्दयसे मुकुन्दम् ॥ ४५॥

कनक रशना मुक्ता ताटङ्क हार ललाटिका -
मणिस रतुला कोटि प्रायै र्जनार्दन जीविके ।
प्रकृति मधुरं गात्रं जागर्ति मुग्ध विभूषणैः -
वलय शकलै र्दुग्धं पुष्पैश्च कल्पलता यथा ॥ ४६॥

सामान्य भोग्य मपि कौस्तुभ वैजयन्ती -
पञ्चायुधादि रमणः स्वय मेव बिभ्रत् ।
तद्भार खेद मिव ते परिहर्तु कामः -
श्रीरङ्गधाम मणि मञ्जरि! गाहते त्वाम् ॥ ४७॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

यदि मनुज तिरश्चां लीलया तुल्यवृत्तेः -
अनुजनु रनुरूपा देवि! नावातरिष्यः ।
असरस मभविष्य न्नर्म नाथस्य मातः -
दरदल दरविन्दो दन्त कान्ता यताक्षि ॥ ४८॥

स्खलित कटक माल्यै र्दोर्भि रब्धिं मुरारेः -
भगवति दधि माथं मथ्नतः श्रान्ति शान्त्यै ।
भ्रम दमृत रङ्गा वर्ततः प्रादु रासीः -
स्मित नयन सुधाभि स्सिञ्चती चन्द्रिकेव ॥ ४९॥

मात मैंथिलि राक्षसी स्त्वयि तदैवार्द्रा पराधा स्त्वया -
रक्षन्त्या पवनात्मजा ल्लघुतरा रामस्य गोष्ठी कृता।
काकं तं च विभीषणं शरण मित्युक्ति क्षमौ रक्षतः -
सा नस्सान्द्र महागस स्सुखयतु क्षान्ति स्तवाकस्मिकी ॥ ५०॥

मात र्लक्ष्मि यथैव मैथिलजन स्तेनाध्वना ते वयं -
त्वद्दास्यैक रसाभिमान सुभगै र्भावै रिहामुत्र च ।
जामाता दयित स्तवेति भवती सम्बन्ध दृष्ट्या हरिं -
पश्येम प्रतियाम याम च परीचारान् प्रहृष्येम च ॥ ५१॥

पितेव त्वत्प्रेयान् जननि परिपूर्णागसि जने -
हितस्रोतोवृत्त्या भवति च कदाचित् कलुष धीः ।
किमेत न्निर्दोषः क इह जगतीति त्वमुचितैः -
उपायै र्विस्मार्य स्वजनयसि माता तदसि नः ॥ ५२॥

नेतु र्नित्य सहायिनी जननि न स्त्रातुं त्वमत्रागता -
लोके त्वन्महिमा वबोध बधिरे प्राप्ता विमर्दं बहु ।
क्लिष्टं ग्रावसु मालती मृदुपदं विश्लिष्य वासो वने -
जातो धिक्करुणां धिगस्तु युवयोः स्वातन्त्र्य मत्यङ्कुशम् ॥ ५३॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अधिशयितवा नब्धिं नाथो ममन्थ बबन्ध तं -
हरधनु रसौ वल्ली भङ्गं बभञ्ज च मैथिलि ।
अपि दशमुखीं लूत्वा रक्षः कबन्ध मनर्तयत् -
किमिव न पतिः कर्ता त्वच्चाटु चुञ्चु मनोरथः ॥ ५४॥

दशशत पाणिपाद वदना क्षिमुखै रखिलैः -
अपि निजवैश्वरूप्य विभवै रनुरूपगुणैः ।
अवतरणै रतैश्च रसयन् कमिता कमले -
क्वचन हि विभ्रम भ्रमिमुखे विनिमज्जति ते ॥ ५५॥

जनन भवन प्रीत्या दुग्धार्णवं बहुमन्यसे -
जननि दयितप्रेम्णा पुष्णासि तत्परमं पदम् ।
उदधि परम व्योम्नो र्विस्मृत्य मादृश रक्षण-
क्षम मिति धिया भूयः श्रीरङ्गधामनि मोदसे ॥ ५६॥

औदार्य कारुणिकताश्रित वत्सलत्व -
पूर्वेषु सर्व मतिशायित मत्र मातः ।
श्रीरङ्गधाम्नि यदुतान्य दुदाहरन्ति -
सीतावतार मुखमेत दमुष्य योग्या ॥ ५७॥

ऐश्वर्य मक्षर गतिं परमं पदं वा -
कस्मै चिदञ्जलिभरं वहते वितीर्य ।
अस्मै न किञ्चि दुचितं कृत मित्यथाम्ब! -
त्वं लज्जसे कथय कोऽय मुदारभावः ॥ ५८॥

ज्ञानक्रिया भजन सम्पद किञ्चनोऽहं -
इच्छाधिकार शकनानु शया नभिज्ञः ।
आगांसि देवि युवयो रपि दुस्सहानि -
बध्नामि मूर्खचरित स्तव दुर्भरोऽस्मि ॥ ५९॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

इत्युक्ति कैतव शतेन विडम्बयामि -
तानम्ब! सत्य वचसः पुरुषान् पुराणान् ।
यद्वा न मे भुज बलं तव पाद पद्म -
लाभे त्वमेव शरणं विधितः कृताऽसि ॥ ६० ॥

श्रीरङ्गे शरदश्शतं सह सुहृद्वर्गेण निष्कण्टकं -
निर्दुःखं सुसुखञ्च दास्य रसिकां भुक्त्वा समृद्धिं पराम् ।
युष्मत्पाद सरोरुहान्तर रज स्स्याम त्वमम्बा पिता -
सर्वं च त्वमसि त्वमेव भव नः स्वीकुर्वक स्मात्कृपाम् ॥ ६१ ॥

(इति श्री पराशरभट्टारक विरचित: श्रीगुणरत्नकोशः संपूर्ण:)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रीस्तुतिः

(श्रीमद्वेदान्ताचार्यैरनुगृहीता)

श्रीमान्वेङ्कटनाथार्यः कवितार्किक केसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

मानातीत प्रथित विभवां मङ्गलं मङ्गलानां -
वक्षःपीठं मधु विजयिनो भूषयन्तीं स्वकान्त्या ।
प्रत्यक्षानु श्रविक महिम प्रार्थिनीनां प्रजानां -
श्रेयो मूर्तिं श्रिय मशरण स्त्वां शरण्यां प्रपद्ये ॥ १॥

आविर्भावः कलश जलधा वध्वरे वाऽपि यस्याः -
स्थानं यस्याः सरसिज वनं विष्णु वक्षःस्थलं वा ।
भूमा यस्या भुवन मखिलं देवि दिव्यं पदं वा -
स्तोक प्रज्ञै रनवधि गुणा स्तूयसे सा कथं त्वम् ॥ २॥

स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना -
तामेव त्वा मनितर गतिः स्तोतु माशंसमानः ।
सिद्धारम्भः सकल भुवन श्लाघनीयो भवेयं -
सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात् ॥ ३॥

यत्सङ्कल्पा द्भवति कमले यत्र देहिन्यमीषां -
जन्मस्थेम प्रलय रचना जङ्गमा जङ्गमानाम् ।
तत्कल्याणं किमपि यमिना मेकलक्ष्यं समाधौ -
पूर्णं तेजः स्फुरति भवती पाद लाक्षारसाङ्कम् ॥ ४॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

निष्प्रत्यूह प्रणय घटितं देवि नित्यानपायं -
विष्णु स्त्वंचे त्यनवधि गुणं द्वन्द्व मन्योन्य लक्ष्यम् ।
शेष श्चित्तं विमल मनसां मौलयश्च श्रुतीनां -
सम्पद्यन्ते विहरण विधौ यस्य शय्या विशेषाः ॥ ५॥

उद्देश्यत्वं जननि भजतो रूज्झितो पाधि गन्धं -
प्रत्यग्रूपे हविषि युवयो रेकशेषित्व योगात् ।
पद्मे पत्यु स्तव च निगमै र्नित्य मन्विष्यमाणो -
नावच्छेदं भजति महिमा नर्तयन् मानसं नः ॥ ६॥

पश्यन्तीषु श्रुतिषु परितः सूरिवृन्देन सार्धं -
मध्येकृत्य त्रिगुण फलकं निर्मित स्थान भेदम् ।
विश्वाधीश प्रणयिनि सदा विभ्रम द्यूत वृत्तौ -
ब्रह्मेशाद्या दधति युवयो रक्षशार प्रचारम् ॥ ७॥

अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं -
लक्ष्मीः पद्मा जलधि तनया विष्णुपत्नीन्दिरे ति ।
यन्नामानि श्रुति परिपणान्येवमावर्तयन्तो -
नावर्तन्ते दुरित पवन प्रेरिते जन्मचक्रे ॥ ८॥

त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं -
किं तै रन्तःकलह मलिनैः किञ्चि दुत्तीर्य मग्नैः ।
त्वत्सम्प्रीत्यै विहरति हरौ सम्मुखीनां श्रुतीनां -
भावारूढौ भगवति युवां दम्पती दैवतं नः ॥ ९॥

आपन्नार्तिं प्रशमन विधौ बद्ध दीक्षस्य विष्णोः -
आचख्यु स्त्वां प्रिय सहचरी मैकम त्योपपन्नाम् ।
प्रादुर्भावै रपि समतनुः प्राध्व मन्वीयसे त्वं -
दूरोत्क्षिप्तै रिव मधुरता दुग्धराशे स्तरङ्गैः ॥ १०॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

धत्ते शोभां हरि मरकते तावकी मूर्ति राद्या -
तन्वी तुंग स्तनभर नता तप्त जाम्बूनदाभा ।
यस्यां गच्छ न्त्युदय विलयै र्नित्य मानन्द सिन्धौ -
इच्छा वेगो ल्लसित लहरी विभ्रमं व्यक्तय स्ते ॥ ११॥

आसंसारं वितत मखिलं वाङ्मयं यद्विभूतिः -
यद्भ्रू भङ्गात् कुसुम धनुषः किङ्करो मेरूधन्वा ।
यस्यां नित्यं नयन शतकै रेक लक्ष्यो महेन्द्रः -
पद्मे तासां परिणति रसौ भावलेशै स्त्वदीयैः ॥ १२॥

अग्रे भर्तुः सरसिजमये भद्रपीठे निषण्णां -
अम्भोराशे रधिगत सुधा सम्प्लवा दुत्थितां त्वाम् ।
पुष्पासार स्थगित भुवनैः पुष्कलावर्तकाद्यैः -
क्लृप्तारम्भाः कनक कलशै रभ्यषिञ्चन् गजेन्द्राः ॥ १३॥

आलोक्य त्वा ममृत सहजे विष्णु वक्षःस्थलस्थां -
शापाक्रान्ताः शरण मगमन् सावरोधाः सुरेन्द्राः ।
लब्ध्वा भूय स्त्रिभुवन मिदं लक्षितं त्वत्कटाक्षैः -
सर्वाकार स्थिर समुदयां सम्पदं निर्विशन्ति ॥ १४॥

आर्त त्राण व्रतिभि रमृता सार नीलाम्बुवाहैः -
अम्भोजाना मुषसि मिषता मन्तरङ्गै रपाङ्गैः ।
यस्यां यस्यां दिशि विहरते देवि दृष्टि स्त्वदीया -
तस्यां तस्या महमहमिकां तन्वते सम्पदोघाः ॥ १५॥

योगा रम्भ त्वरित मनसो युष्म दैकान्त्य युक्तं -
धर्मं प्राप्तुं प्रथम मिह ये धारयन्ते धनायाम् ॥
तेषां भूमे र्धनपति गृहादम्बरा दम्बुधे र्वा -
धारा निर्या न्त्यधिक मधिकं वाञ्छितानां वसूनाम् ॥ १६॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्रेय स्कामाः कमल निलये चित्र माम्नाय वाचां -
चूडा पीडं तव पद युगं चेतसा धारयन्तः ।
छत्र च्छाया सुभग शिरस श्चामर स्मेर पार्श्वाः -
श्लाघा शब्द श्रवण मुदिताः स्रग्विणः सञ्चरन्ति ॥ १७॥

ऊरी कर्तुं कुशल मखिलं जेतु मादी नरातीन् -
दूरी कर्तुं दुरित निवहंत्यक्तु माद्यामविद्याम् ।
अम्ब स्तम्बा वधिक जनन ग्राम सीमान्त रेखां-
आलम्बन्ते विमल मनसो विष्णुकान्ते दया ते ॥ १८॥

जाताकांक्षा जननि युवयो रेक सेवाधिकारे -
मायालीढं विभव मखिलं मन्यमाना स्तृणाय ।
प्रीत्यै विष्णो स्तव च कृतिनः प्रीतिमन्तो भजन्ते -
वेला भङ्ग प्रशमन फलं वैदिकं धर्म सेतुम् ॥ १९॥

सेवे देवि त्रिदश महिला मौलि मालार्चितं ते -
सिद्धि क्षेत्रं शमित विपदां सम्पदां पादपद्मम् ।
यस्मि न्नीष न्नमित शिरसो यापयित्वा शरीरं -
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः ॥ २०॥

सानुप्रास प्रकटित दयैः सान्द्र वात्सल्य दिग्धैः-
अम्ब स्निग्धै रमृत लहरी लब्धस ब्रह्मचर्यैः ।
घर्मे तापत्रय विरचिते गाढतप्तं क्षणं मां-
आकिञ्चन्य ग्लपित मनधै राद्रियेथाः कटाक्षैः ॥ २१॥

सम्पद्यन्ते भवभय तमी भानव स्त्वत्प्रसादात् -
भावाः सर्वे भगवति हरौ भक्ति मुद्वेलयन्तः ।
याचे किं त्वा मह मिह यतः शीतलो दारशीला -
भूयो भूयो दिशसि महतां मङ्गलानां प्रबन्धान् ॥ २२॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

माता देवि त्वमसि भगवान् वासुदेवः पिता मे -
जातः सोऽहं जननि युवयो रेकलक्ष्यं दयायाः ।
दत्तो युष्म त्परिजनतया देशिकै रप्यतस्त्वं -
किं ते भूयः प्रिय मिति किल स्मेरवक्त्रा विभासि ॥ २३॥

कल्याणाना मविकल निधिः काऽपि कारुण्य सीमा -
नित्या मोदा निगम वचसां मौलि मन्दार माला ।
सम्पद्दिव्यः मधुविजयिनः सन्निधत्तां सदा मे -
सैषा देवी सकल भुवन प्रार्थना कामधेनुः ॥ २४॥

उपचित गुरुभक्ते रुत्थितं वेङ्कटेशात् -
कलिकलुष निवृत्त्यै कल्प्यमानं प्रजानाम् ।
सरसिज निलयायाः स्तोत्र मेत त्पठन्तः -
सकल कुशल सीमा सार्वभौमा भवन्ति ॥ २५॥

॥ इति श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीस्तुतिः सम्पूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मी आर्यावृत्त स्तुतिः
(वादिराजकृता)

आर्यावृत्तं विचित्र नार्या स्सा जगति सौभगत्वकरी ।
वार्याकाशा द्यखिला भूर्याव द्धार्यते त्वया देव्या ॥ 1 ॥

उन्मीलय मन्नयने त्वं मन्ये लक्ष्मि लोकमान्यासि ।
चिन्मय सुभगावयवे कर्मकरः स्यामहं च तव कमितुः ॥ 2 ॥

मन्मथ जननि मनोज्ञेऽहं ममता रहित योगिकुल महिते ।
दृञ्मल मुन्मूलय मे सम्यक् श्रीकृष्णमूर्तिं मीक्षे ऽहम् ॥ 3 ॥

कल्मष खण्डन शीले रम्यकपोले सरोजमुखि सुतनो ।
अम्लान पद्महस्ते निर्मलमच्चक्षुरीक्षतां कृष्णम् ॥ 4 ॥

पूर्वं त्रिगुणमयी या सर्वं कार्यं करोति या पश्चात् ।
चार्वंबुजाक्ष दीक्षादक्षं मेऽक्षीह सा रमा कुर्यात् ॥ 5॥

वश्यं यस्याः सकलं दृश्यं यस्याः समस्त मपि विश्वम्।
नश्यत्सु या न नश्येत् क्लिश्यत्सु च या कदाऽपि न क्लिश्येत् ॥ 6 ॥

ज्ञप्तेः करणानि च षट् षञ्चकृते हैंतुभूत करणानि ।
बुध्येयु र्यत्कृत्यं सिध्येद्वै तत्कलं च यत्कृपया ॥ 7 ॥

सा श्री राश्रित रक्षा दीक्षा दुष्कर्म शिक्षणे च पटुः ।
अश्वास्यं हि दिदृक्षोः मेऽक्ष्णो स्तद्वीक्षणोत्सवं दद्यात् ॥ ४ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सङ्गीत साङ्ग वेदा मङ्गल देवी मनोज्ञ सर्वाङ्गी ।
भङ्गादि दोष रहिता तं गुण राशिं ममेक्षये त्स्वपतिम् ॥ ९ ॥

शक्तिः संवित्स्फूर्ति मूर्तीः प्रवृत्तिश्च यद्वशे नित्यम्।
शक्ता त्वमेव सुजनोद्धर्ती तं चेत्प्रदर्शयस्व पतिम् ॥ 10 ॥

कुण्डलरत्न तिलक लसन्नासा मणि कण्ठसूत्र हारधरा ।
अङ्गद कङ्कण काञ्ची सत्कञ्चुक पीतवसन रशनाभा ॥ 11

सद्रत्नखचिता किङ्किणि मुद्रा ग्रैवेय नूपुरादि रुचा ।
भद्रोद्य दिन्दु वदना यया मे मध्ववरद मीक्षयतु ॥ 12 ॥

या देवी निजरमण स्याङ्कगता - पश्यति स्म तं सततम्।
तस्याः स्तुति मिति कृतवान् -कृष्णदृगर्थी स वादिराज यतिः ॥13॥

इति श्री वादिराजकृत लक्ष्मी आर्यावृत्तं स्तोत्रं संपूर्णम्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री कनकधारा स्तोत्रम्
(श्री शङ्कराचार्य विरसितम्)

अङ्गं हरेः पुलकभूषण माश्रयन्ती -
भृङ्गाङ्गनेव मुकुलाभरणं तमालम् ।
अङ्गीकृताखिल विभूति रपाङ्गलीला
माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः ॥ १॥

मुग्धा मुहुर्विदधती वदने मुरारेः -
प्रेमत्रपाप्रणिहितानि गतागतानि ।
माला दृशोर्मधुकरीव महोत्पले या
सा मे श्रियं दिशतु सागर सम्भवायाः ॥ २॥

आमीलिताक्ष मधिगम्य मुदा मुकुन्दं -
आनन्दकन्द मनिमेष मनङ्ग तन्त्रम् ।
आकेकरस्थितकनीनिकपक्ष्मनेत्रं -
भूत्यै भवेन्मम भुजङ्ग शयाङ्गनायाः ॥ ३॥

बाह्वन्तरे मधुजितः श्रितक स्तुभे या -
हारावलीव हरिनील मयी विभाति ।
कामप्रदा भगवतोऽपि कटाक्षमाला -
कल्याणमावहतु मे कमलालया याः ॥ ४॥

कालाम्बुदालि ललितोरसि कैटभारेः -
धाराधरे स्फुरति या तडिदङ्गनेव ।
मातुस्समस्तजगतां महनीयमूर्तिः -
भद्राणि मे दिशतु भार्गव नन्दनायाः ॥ ५॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात् -
माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं -
मन्दालसं च मकरालयकन्यकायाः ॥ ६॥

विश्वामरेन्द्र पदविभ्रम दानदक्षं -
आनन्द हेतु रधिकं मुरविद्विषोऽपि ।
ईषन्निषीदतु मयि क्षणमीक्षणार्धं -
इन्दीवरोदर सहोदर मिन्दिरायाः ॥ ७॥

इष्टाविशिष्टमतयोऽपि यया दयार्द्र -
दृष्ट्या त्रिविष्टप पदं सुलभं लभन्ते ।
दृष्टिः प्रहृष्ट कमलोदर दीप्तिरिष्टां -
पुष्टिं कृषीष्ट मम पुष्कर विष्टरायाः ॥ ८॥

दद्याद्दयानुपवनो द्रविणाम्बुधारां -
अस्मिन्नकिञ्चन विहङ्गशिश विषण्णे ।
दुष्कर्मघर्ममपनीय चिराय दूरं -
नारायणप्रणयिनीनयनाम्बुवाहः ॥ ९॥

गीर्देवतेति गरुडध्वजसुन्दरीति -
शाकम्भरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै -
तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥ १०॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै -
रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै -
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ ११॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नमोऽस्तु नालीकनिभाननायै -
नमोऽस्तु दुग्धोदधिजन्मभूम्यै ।
नमोऽस्तु सोमामृत सोदरायै -
नमोऽस्तु नारायण वल्लभायै ॥ १२॥

नमोऽस्तु हेमाम्बुज पीठिकायै -
नमोऽस्तु भूमण्डल नायिकायै ।
नमोऽस्तु देवादिदयापरायै -
नमोऽस्तु शार्ङ्गायुध वल्लभायै ॥ १३

नमोऽस्तु देव्यै भृगुनन्दनायै -
नमोऽस्तु विष्णोरुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै -
नमोऽस्तु दामोदर वल्लभायै ॥ १४॥

नमोऽस्तु कान्त्यै कमलेक्षणायै -
नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।
नमोऽस्तु देवादिभि रर्चितायै -
नमोऽस्तु नन्दात्मज वल्लभायै ॥ १५॥

सम्पत्कराणि सकलेन्द्रिय नन्दनानि -
साम्राज्यदान विभवानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरितोद्धरणोद्यतानि -
मामेव मातर निशं कलयन्तु मान्ये ॥ १६॥

यत्कटाक्षसमुपासनाविधिः -
सेवकस्य सकलार्थसम्पदः ।
सन्तनोति वचनाङ्गमानसैः -
त्वां मुरारिहृदयेश्वरीं भजे ॥ १७॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात् -
माङ्गल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं -
मन्दालसं च मकरालयकन्यकायाः ॥ ६ ॥

विश्वामरेन्द्र पदविभ्रम दानदक्षं -
आनन्द हेतु रधिकं मुरविद्विषोऽपि ।
ईषन्निषीदतु मयि क्षणमीक्षणार्धं -
इन्दीवरोदर सहोदर मिन्दिरायाः ॥ ७ ॥

इष्टाविशिष्टमतयोऽपि यया दयार्द्र -
दृष्ट्या त्रिविष्टप पदं सुलभं लभन्ते ।
दृष्टिः प्रहृष्ट कमलोदर दीप्तिरिष्टां -
पुष्टिं कृषीष्ट मम पुष्कर विष्टरायाः ॥ ८ ॥

दद्याद्दयानुपवनो द्रविणाम्बुधारां -
अस्मिन्नकिञ्चन विहङ्गशिश विषण्णे ।
दुष्कर्मघर्ममपनीय चिराय दूरं -
नारायणप्रणयिनीनयनाम्बुवाहः ॥ ९ ॥

गीर्देवतेति गरुडध्वजसुन्दरीति -
शाकम्भरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै -
तस्यै नमस्त्रिभुवनैकगुरोस्तरुण्यै ॥ १० ॥

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै -
रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै -
पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ ११ ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नमोऽस्तु नालीकनिभाननायै -
नमोऽस्तु दुग्धोदधिजन्मभूम्यै ।
नमोऽस्तु सोमामृत सोदरायै -
नमोऽस्तु नारायण वल्लभायै ॥ १२॥

नमोऽस्तु हेमाम्बुज पीठिकायै -
नमोऽस्तु भूमण्डल नायिकायै ।
नमोऽस्तु देवादिदयापरायै -
नमोऽस्तु शार्ङ्गायुध वल्लभायै ॥ १३

नमोऽस्तु देव्यै भृगुनन्दनायै -
नमोऽस्तु विष्णोरुरसि स्थितायै ।
नमोऽस्तु लक्ष्म्यै कमलालयायै -
नमोऽस्तु दामोदर वल्लभायै ॥ १४॥

नमोऽस्तु कान्त्यै कमलेक्षणायै -
नमोऽस्तु भूत्यै भुवनप्रसूत्यै ।
नमोऽस्तु देवादिभि रर्चितायै -
नमोऽस्तु नन्दात्मज वल्लभायै ॥ १५॥

सम्पत्कराणि सकलेन्द्रिय नन्दनानि -
साम्राज्यदान विभवानि सरोरुहाक्षि ।
त्वद्वन्दनानि दुरितोद्धरणोद्यतानि -
मामेव मातर निशं कलयन्तु मान्ये ॥ १६॥

यत्कटाक्षसमुपासनाविधिः -
सेवकस्य सकलार्थसम्पदः ।
सन्तनोति वचनाङ्गमानसैः -
त्वां मुरारिहृदयेश्वरीं भजे ॥ १७॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

सरसिजनिलये सरोजहस्ते -
धवलतमांशुकगन्धमाल्यशोभे ।
भगवति हरिवल्लभे मनोज्ञे -
त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥ १८॥

दिग् हस्तिभिः कनक कुम्भ मुखावसृष्ट -
स्वर्वाहिनीविमलचारुजल प्लुताङ्गीम् ।
प्रातर्नमामि जगतां जननीमशेष -
लोकाधिनाथ गृहिणी ममृताब्धिपुत्रीम् ॥ १९॥

कमले कमलाक्षवल्लभे त्वं -
करुणापूरतरङ्गितैरपाङ्गैः ।
अवलोकय मामकिञ्चनानां -
प्रथमं पात्र मकृत्रिमं दयायाः ॥ २०॥

स्तुवन्ति ये स्तुतिभिरमीभिरन्वहं -
त्रयीमयीं त्रिभुवन मातरं रमाम् ।
गुणाधिका गुरुतर भाग्य भागिनो -
भवन्ति ते भुवि बुध भाविताशयाः ॥ २२॥

इति श्रीमच्छङ्कराचार्यकृत कनकधारास्तोत्रं सम्पूर्णम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अष्टलक्ष्मी स्तोत्र अष्टकम्

॥ आदिलक्ष्मी स्तोत्रम्॥

सुमनस वन्दित सुन्दरि माधवि -
चन्द्र सहोदरि हेममये ।
मुनिगणमण्डित मोक्षप्रदायिनि
मञ्जुळभाषिणि वेदनुते ॥

पङ्कजवासिनि देवसुपूजित -
सद्गुणवर्षिणि शान्तियुते ।
जयजय हे मधुसूदन कामिनि -
आदिलक्ष्मि सदा पालय माम् ॥ १॥

॥ धान्यलक्ष्मी स्तोत्रम्॥

अहिकलि कल्मषनाशिनि कामिनि -
वैदिकरूपिणि वेदमये ।
क्षीरसमुद्भव मङ्गलरूपिणि -
मन्त्रनिवासिनि मन्त्रनुते ॥

मङ्गलदायिनि अम्बुजवासिनि -
देवगणाश्रित पादयुते ।
जयजय हे मधुसूदन कामिनि -
धान्यलक्ष्मि सदा पालय माम् ॥ २॥

॥ धैर्यलक्ष्मी स्तोत्रम्॥

जयवरवर्णिनि वैष्णवि भार्गवि -
मन्त्रस्वरूपिणि मन्त्रमये ।
सुरगणपूजित शीघ्रफलप्रद -
ज्ञानविकासिनि शास्त्रनुते ॥

भवभयहारिणि पापविमोचनि -

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

साधुजनाश्रित पादयुते ।
जयजय हे मधुसूदन कामिनि -
धैर्यलक्ष्मि सदा पालय माम् ॥ ३॥

॥ गजलक्ष्मी स्तोत्रम्॥

जयजय दुर्गतिनाशिनि कामिनि -
सर्वफलप्रद शास्त्रमये ।
रथगज तुरगपदादि समावृत -
परिजनमण्डित लोकनुते ॥

हरिहर ब्रह्म सुपूजित सेवित -
तापनिवारिणि पादयुते ।
जयजय हे मधुसूदन कामिनि -
गजलक्ष्मि रूपेण पालय माम् ॥ ४॥

॥ सन्तानलक्ष्मी स्तोत्रम्॥

अहिखग वाहिनि मोहिनि चक्रिणि -
रागविवर्धिनि ज्ञानमये ।
गुणगणवारिधि लोकहितैषिणि -
स्वरसप्त भूषित गाननुते ॥

सकल सुरासुर देवमुनीश्वर -
मानववन्दित पादयुते ।
जयजय हे मधुसूदन कामिनि
सन्तानलक्ष्मि त्वं पालय माम् ॥ ५॥

॥ विजयलक्ष्मी स्तोत्रम्॥

जय कमलासनि सद्गतिदायिनि -
ज्ञानविकासिनि गानमये ।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अनुदिनमर्चित कुङ्कुमधूसर-
भूषित वासित वाद्यनुते ॥
कनकधरास्तुति वैभव वन्दित -
शङ्कर देशिक मान्य पदे ।
जयजय हे मधुसूदन कामिनि -
विजयलक्ष्मि सदा पालय माम् ॥ ६॥

॥ विद्यालक्ष्मी स्तोत्रम्॥

प्रणत सुरेश्वरि भारति भार्गवि -
शोकविनाशिनि रत्नमये ।
मणिमयभूषित कर्णविभूषण -
शान्तिसमावृत हास्यमुखे ॥
नवनिधिदायिनि कलिमलहारिणि -
कामित फलप्रद हस्तयुते ।
जयजय हे मधुसूदन कामिनि -
विद्यालक्ष्मि सदा पालय माम् ॥७॥

॥ धनलक्ष्मी स्तोत्रम्॥

धिमिधिमि धिंधिमि धिंधिमि धिंधिमि -
दुन्दुभि नाद सुपूर्णमये ।
घुमघुम घुंघुम घुंघुम घुंघुम -
शङ्खनिनाद सुवाद्यनुते ॥
वेदपुराणेतिहास सुपूजित -
वैदिकमार्ग प्रदर्शयुते ।
जयजय हे मधुसूदन कामिनि -
धनलक्ष्मि रूपेण पालय माम् ॥ ८॥

इति आचार्यकृत अष्टलक्ष्मीस्तोत्र अष्टकं सम्पूर्णम्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री वरदवल्लभा स्तोत्रम्

(चतुश्लोकीस्तुतिः) (यामुनाचार्यकृतिः)

आकारत्रय संपन्नां अरविन्द विलासिनीम् ।
अशेष जगदी शित्रीं वन्दे वरद वल्लभाम् ॥

****

कान्तस्ते पुरुषोत्तमः फणिपतिः शय्याऽऽसनं वाहनं-
वेदात्मा विहगेश्वरो यवनिका माया जगन्मोहिनी ।
ब्रह्मेशादि सुरव्रजः सदयित स्त्वद्दास दासी गणः-
श्री रित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम् ॥ 1

यस्यास्ते महिमान मात्मन इव त्वद्वल्लभोऽपि प्रभुः-
नालं मातु मियत्तया निरवधिं नित्यानुकूलं स्वतः ।
तां त्वां दास इति प्रबन्ध इति च स्तोष्याम्यहं निर्भयः-
लोकैकेश्वरि लोकनाथ दयिते दान्ते दयां ते विदुन् ॥ 2

ईषत् त्वत्करुणा निरीक्षण सुधा सन्ध्युक्षणात् रक्ष्यते-
नष्टंप्राक्त दलाभत स्त्रिभुवनं संप्रत्यनन्तो दयम् ।
श्रेयो न ह्यरविन्दलोचन मनः कान्ता प्रसादात् ऋते-
संसृत्याक्षर वैष्णवाध्वसु नृणां संभाव्यते कर्हिचित् ॥ 3

शान्तानन्द महाविभूति परमं यद् ब्रह्मरूपं हरेः-
मूर्तं ब्रह्म ततोऽपि तत्प्रियतरं रूपं यदत्यद्भुतम् ।
यान्यन्यानि यथा सुखं विहरतो रूपाणि सर्वाणिता-
न्याहुस्वै रनुरूप रूपविभवैः गाढोप गूढानिते ॥ 4

इति यामुनाचार्यकृमं वरदवल्लभस्तोत्रं संपूर्णम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

वरदवल्लभा गद्यम्

(यामुनाचार्यकृतं)

आकारत्रय संपन्नां अरविन्दनिवासिनीं-अशेष जगदीशित्रीं-वन्दे वरदवल्लभां- भगव न्नारायणाभि मता नुरूप स्वरूप रूप गुण विभवैश्वर्य शीला द्यनवधिका तिशयासंख्येय- कल्याणगुण गणां पद्मवनालयां- भगवतीं- श्रियंदेवीं- नित्यानपायिनीं- निरवद्यां- देवदेव दिव्यमहिषीं- अखिलजगन्मातरं-अशरण्य शरण्यां- अनन्यशरणः शरणमहं प्रपद्ये॥

लक्ष्मी चूर्णिका (लक्ष्मीस्तुति वचनम्)

सकल कल्याण पुरस्सर पादारविन्दा-करतल विराजमान राजीव युगला-पुरुषोत्तम पुरन्तराल-निरन्तरावास मन्दिरा- सकल वदान्य मूर्धन्य कामधेनु-कल्पद्रुम चिन्तामणि वितरण प्रकटित परमौदार्य विभव प्रभव यशोराशि सदृश सिन्धुराज कन्यका- दीप्तिसौन्दर्य सौभाग्यप्रमुख निखिल सद्गुण लक्षण-शुद्धाध्व गण्यमान विद्येश्वर तत्वस्थिता-श्री देवी- शङ्ख पद्म प्रमुख नवनिधियुत कुबेरजननी-सकल सिद्धिप्रदा मे भूयान्नम श्रियै नमोऽस्तुते ॥

(आह्वाने आशिषियोग्या चूर्णिका-शैवागम उत्सव पद्धतौ)



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्म्याः प्रणतिः
(महेन्द्रकृतं श्रीमहिम्नस्तुतिः)

आदिदेवात्मभूतायै नारायण कुटुम्बिनि ।
समस्त जगदाराध्ये नमस्ते पद्मयोनये ॥ 1

विश्वारणे नमस्तुभ्यं नमो विश्वविभूतये ।
सर्वासामपि सिद्धीनां नमस्ते मूलहेतवे ॥ 2

नमस्ते कमलावासे स्वर्णवर्णे हरिप्रिये ।
नमस्ते जगदावासे मनोनयन नन्दिनि ॥ 3

क्षीरोदसम्भवे देवि पद्मनाभकुटुम्बिनि ।
नमस्ते जगतां मातः नमःकेशव गेहिनि ॥ 4

नमस्ते सिन्धुसम्भूते नमस्ते पद्मसम्भवे ।
नमस्सरोरुहावासे नारायणकुटुम्बिनि ॥ 5

जगद्विधानशिल्पिन्यै विष्णुपत्न्यै नमोऽस्तुते ।
नमस्ते चिदचिद्वर्गसंरक्षण विचक्षणे ॥ 6

सिन्धुकन्ये नमस्तुभ्यं नमस्ते सरसीरुहे ।
शङ्खचक्र करे पद्मे पद्मद्वयवराभये ॥ 7

परंब्रह्म परंधाम पद्मस्थे पद्ममालिनि ।
नमस्ते पद्मजे श्रीदे गोविन्दगृहमेदिनि ॥ 8

देवप्रिये देवदेवि नमस्ते पङ्कजेक्षणे।
नमस्सर्वात्मिके विश्वे विष्णुवक्षस्थलस्थिते॥ 9

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

नमो नित्यानवद्यायै जनन्यै सर्वदेहिनाम् ।
आधारेशात्मरूपायै शुद्धाशुद्धा खिलाध्वनाम् ॥ 10

तत्वारविन्द सन्दोहविहार चतुर क्रमे ।
मधुजिन्मानसावासे नमस्ते पङ्कजासने ॥ 11

नमः सम्पूर्ण षाड्गुण्यविग्रहे हरिवल्लभे ।
अरविन्दगृहा यै ते गोविन्दगृहमेधिनी ॥ 12

समस्त चिदचिद्भेदतन्त्रयन्त्र विधायिनि ।
विधात्रि सर्व भोगानां नमस्ते पङ्कजासने ॥ 13

नमो देवादि देव्यै ते नमो वैकुण्ठवल्लभे ।
देवप्रिये देवदेवि नमस्ते पङ्कजेक्षणे ॥ 14

संसार सागरोत्तर पोत पादाम्बुजद्वये ।
हृषीकेश महिष्यै ते भूयो भूयो नमो नमः ॥ 15

क्षीरोद मथनायास फलरूपे मधुद्विषः।
नमश्चन्द्र सहोदर्यै नमस्ते ऽमृत योनये ॥ 16

ओं नमो वासुदेवाय तस्मै श्री र्यस्य सा प्रिया ।
ओं नमो विष्णुपत्न्यै च यस्याः नारायणः प्रियः॥ 17

नमो नित्यानवद्याय जगतः सर्वहेतवे ।
ज्ञानाय निस्तरङ्गाय लक्ष्मी नारायणात्मने ॥ 18



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

श्री लक्ष्मीकुबेर पूजा प्रयोगः

स्वगृहे-ऐशान्योत्तरादि दिक्षु-मनोहरं पूजास्थानं-परिकल्प्य-तत्र श्रियार्चनोपयोगाय-चतुरश्रं मण्टपं निर्माय-तन्मध्ये वेदिकां कृत्वा-रङ्गवल्यादिभिरलंकृत्य-तन्मध्ये-धान्यराशिं तदर्धं तण्डुलैश्च स्तण्डिलं परिकल्प्य-तन्मध्ये साष्टपत्रकर्णिकं पद्मं विलिख्य-तदुपरि तण्डुल पूरितकुंभं निधाय- तत् कुंभं पञ्चपल्लव सकूर्च नारिकेल पुष्पमालादिभिरलंकृत्य-कुंभपूजां विधिवत् कृत्वा-रमां संपूज्य-तत्र प्राणप्रतिष्ठा कुर्यात् ॥ गणेशादि देवताः कुंभे कूर्चे वा अर्चयेत् ॥ तत्रादौ हरिद्रा गणपतिं संपूज्य ॥

(दुर्गा गणपतिं-लक्ष्मी गणपतिं वा संपूज्य) वरुणकलशपूजां कृत्वा ॥ पुण्याहं वाचयित्वा ॥ स्थलद्रव्यादि शुद्धिं विधाय ॥ ततो-पञ्चगव्यमभ्यर्च्य-गव्योदकेन श्रियः कुंभयन्त्रादिकं संप्रोक्ष्य-ततः- षोडश मातृगण पूजां विधाय ॥ नवग्रहान् लोकेशान् च संपूज्य ॥ ब्रह्म विष्णु रुद्र क्षेत्रपालादि ऋषिगणान्तान् परिवारानभ्यर्च्य ॥ ततो श्रियमभ्यर्च्य ॥ उत्तरे कुबेरं च सर्वोपचारैरभ्यर्चयेत् ॥ इति कुबेर श्रीपूजाप्रयोगः॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

लक्ष्मीकुबेर पूजायाः क्रियाक्रमः

लक्ष्मीपूजाङ्गतयार्चित देवतानां प्रार्थनां च कुर्यात् ॥

विष्वक्सेनं नमस्कृत्य नमस्कृत्य पितामहम् ॥

विष्णुं रुद्रं श्रियं दुर्गां वन्दे भक्त्या सरस्वतीम् ॥

क्षेत्राधिपं नमस्कृत्य दिवानाथं निशाकरम् ॥

धरणीगर्भ संभूतं शशिपुत्रं बृहस्पतिम् ॥

दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम् ॥

राहुकेतू नमस्कृत्य यज्ञा रंभे विशेषतः ॥

शक्राद्या देवतास्सर्वाः मुनींश्च प्रणमाम्यहम् ॥

गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ॥

वशिष्टं मुनिशार्दूलं विश्वामित्रं भृगोस्सुतम् ॥

व्यासं मुनिं नमस्कृत्य आचार्यांश्च तपोधनान् ॥

सर्वान्तान् प्रणमाम्येवं यज्ञरक्षाकरान् सदा ॥

शङ्ख चक्र गदा शार्ङ्ग पद्मपाणि र्जनार्दन ॥

सर्वासु दिक्षु रक्षेन्मां यावत् पूजावसानकम् ॥

1. अनुज्ञा, 2. ब्राह्मणानुज्ञा, 3. सभानुज्ञा , 4. विघ्नेश्वरपूजा, 5. विष्वक्सेनपूजा, 6. संकल्पः, 7. ग्रहप्रीतिदानम् , 8. कलशपूजा, 9. गङ्गादितीर्थपूजा, 10. घण्टा पूजा, 11. दीपपूजा, 12. पुण्याहवाचनं, 13. स्थलद्रव्य शुद्धिक्रिया, 14. द्रव्यशुद्धिः, 15. पञ्चगव्यपूजा, 16. मधुपर्कपूजा, 17.पञ्चामृतपूजा, 18. लक्ष्यमूर्ति, 19. कुंभ-यन्त्रादि-शुद्धिक्रिया ॥ 19. षोडश मातृमण्डल गणशक्ति पूजा, (गौर्यादि--देवसेनान्ताः षोडशमातरः) 1. गौरी, 2. स्वधा, 3. पद्मा, 4. स्वाहा,

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

5. शची, 6. मातृः, 7. मेधा, 8. वृष्टिः, 9. सावित्री, 10. पुष्टिः, 11. विजया, 12.धृतिः, 13.तुष्टिः, 14.जया, 15.कुलदेवि, 16. देवसेना इति षोडश मातृभ्यो षोडशोपचार पूजां कुर्यात् (लोकमातृ // कुलदेवी)

20. नवग्रह पूजा (धान्यमण्डले-कुंभे-यन्त्रे-कूर्चादिषु वा पूजा कार्या)

21. इन्द्रादि लोकपाल पूजा (ब्रह्म - विष्णु - रुद्र - क्षेत्रपालाः - सरस्वती - ब्रह्मा - लक्ष्मी - दुर्गा - त्र्यंबकः - क्षेत्रपालः - भूमिः - एताः षोडशोपचारैः पूजयेत्

22. श्री महालक्ष्मी पूजा, (कुंभे - यन्त्रे वा - स्वर्णकमले - दीपे वा लक्ष्मीं पूजयेत्)

23. लक्ष्मी आवरण पूजा, (षडङ्गदेवीः & अष्टलक्ष्मीः) - अत्र श्रीदेव्याः पञ्चावरणदेवताः पूजयेत्॥

24. ईशानादि पूजा, (ईशान, सखि, मातृः, सूर्यः, विश्वकर्मा, गुरुः, अथर्वाङ्गिरोभ्यां, प्रजापतये, विश्वेभ्यो, देवेभ्यो, अमरराजा, अश्विभ्यां, मित्रा वरुणाभ्यां, विष्णवे नमः ॥ (षोडश देवतार्चनं समाप्य)

25. कुबेरपूजा कुंभे-कूर्चे-यन्त्रे वा षोडशोपचारैः वित्तेशं पूजयेत् ॥

26. अष्टोत्तरशत नामार्चनां स्तुतिनति प्रार्थनां च कुर्यात्

एवं संप्रार्थ्य ॥

पूजास्थानं संरक्षितमनुज्ञातं विभाव्य ॥ मण्टपमध्य वेदिस्थ कुंभे भगवतीं श्रीयं धनलक्ष्मीं जगन्मातरं विधिवत् संपूज्य ॥ देव्याः वामभागे उत्तरे कुबेरं धनाधिपं कुंभे यन्त्रे कूर्चे वा षोडशोपचारैः संपूज्य ॥ स्वभक्त निधिनायक कुबेरसहितां श्रियं प्रणम्य प्रार्थयेत् ॥

(इति लक्ष्मी कुबेरयोः पूजाक्रमः समाप्तः)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

ब्राह्म्यादि लोकमातृदेवीनां ध्यानानि ॥
(लक्ष्म्याः परिवार देवताः)

1. ब्राह्मी ध्यानम् ॥

वराभयां गण्डिकयाक्ष मालां -
हस्तैश्चतुर्भिर्दधतीं चतुर्मुखीम् ॥
पीतांबरामष्ट दृशींस हंसां -
ब्राह्मीं भजे पिङ्ग जटा समेताम् ॥

ब्राह्मी प्रणतिः ॥

हंसयुक्त विमानस्थे ब्रह्माणी रूपधारिणी।
कोशांभः क्षरिके देवि नारायणि नमोऽस्तुते ॥

ब्राह्मी गायत्रीमन्त्रः

हंसध्वजायै विद्महे, कूर्चहस्तायै धीमहि, तन्नो ब्राह्मी प्रचोदयात् ॥

2. माहेश्वरी ध्यानम् ॥

माहेश्वरी मेकमुखीं त्रिणेत्रां-
वराभयाढ्यां मृगटंक युक्ताम् ।
शुक्लां सुवस्त्रां वृषभस्थितां च-
भजे जटा मण्डित मौळि युक्ताम् ॥

माहेश्वरी प्रणतिः ॥

त्रिशूलचन्द्राहि धरे महावृषभ वाहिणी ॥
माहेश्वरी स्वरूपेण नारायणि नमोऽस्तुते ॥

माहेश्वरी गायत्रीमन्त्रः ॥

वृषध्वजायै विद्महे, मृगहस्तायै धीमहि, तन्नो ईशी प्रचोदयात् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

3. कौमारी ध्यानम्

एकाननां द्व्यक्षयुतां सुकृष्णां-
वज्रंच शक्तिं वरदाभयौ च ।
हस्तैर्दधानां च मयूर संस्थां-
कौमार्यभिख्यां सततं स्मरामि ॥

कौमारी प्रणतिः

मयूर कुक्कुट वृते महाशक्ति धरे ऽनघे ॥
कौमारी रूप संस्थाने नारायणि नमोऽस्तुते ॥

कौमारी गायत्रीमन्त्रः

शिखिध्वजायै विद्महे, शक्ति हस्तायै धीमहि, तन्नो कौमारी प्रचोदयात् ॥ (गुहा प्रचोदयात्)

4. वैष्णवी ध्यानम्

चतुर्भुजामेक मुखीं त्रिनेत्रां-
वराभयौ शङ्ख मतुल्यचक्रम् ।
श्यामान्दधानां गरुडासनस्थां-
तां वैष्णवीं शक्तिमहं भजामि ॥

वैष्णवी प्रणतिः

शङ्खचक्रगदाशार्ङ्ग गृहीतपरमायुधे ।
प्रसीद वैष्णवी रूपे नारायणि नमोऽस्तु ते ॥

वैष्णवी गायत्रीमन्त्रः

खग ध्वजायै विद्महे चक्रहस्तायै धीमहि तन्नो लक्ष्मी प्रचोदयात्।

5. वाराही ध्यानम्

क्रोडाननां रक्तरुचिं त्रिणेत्रां –
वरंत्वभीतिं मुसलं हलं च।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

हस्तै र्दधानां मृगराज संस्थां –
वाराह्य भिख्यां हृदि शक्ति मीडे।।

वाराही प्रणतिः

गृहीतोग्र महाचक्रे - दंष्ट्रोद्धृतवसुन्धरे ।
वराहरूपिणि शिवे - नारायणि नमोऽस्तु ते ॥

वाराही गायत्रीमन्त्रः ॥

सिंहध्वजायै विद्महे हलहस्तायै धीमहि तन्नः कोला प्रचोदयात्।

6. इन्द्राणी ध्यानम्

द्विलोचनां मेकमुखीं च पीतां –
वज्रं च शक्तिं वरदा ऽभयं च।
करै र्दधानां गजराज संस्थां –
माहेन्द्रयभिख्यां मनसा स्मरामि।

इन्द्राणी प्रणतिः

किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ।
वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥

इन्द्राणी गायत्रीमन्त्रः

गजध्वजायै विद्महे सृणिहस्तायै धीमहि तन्नो ऐन्द्री प्रचोदयात् ॥

चामुण्डा ध्यानम्

प्रेतासना मेकमुखीं त्रिनेत्रां-
शूलं कपालं कटकं च धारिणीम्।
वरं च कालाम्बुद नीलवर्णां -
व्याघ्राजिनां किङ्किणिमालिकाढ्याम्

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

7. चामुण्डा प्रणतिः

दंष्ट्राकरालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥

चामुण्डा गायत्रीमन्त्रः ॥

पिशाच ध्वजायै विद्महे, शूल हस्तायै धीमहि,
तन्नो चामुण्डा प्रचोदयात् ।। (काली प्रचोदयात्)

8. महालक्ष्मी ध्यानम् ॥

धृतांबुजां श्रीफल हस्तयुग्मां -
पीतां द्विनेत्रान्वित वक्र शोभाम् ।
पार्श्वद्वये हस्तियुतां सुवेषां -
भजामि लक्ष्मीं कमलासनऽस्थाम् ॥

लक्ष्मी प्रणतिः

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे ॥
महारात्रे महामाये नारायणि नमोस्तुते ॥

लक्ष्मी गायत्रीमन्त्रः

तार्क्ष्यध्वजायै विद्महे विष्णुपत्न्यै च धीमहि,
तन्नो लक्ष्मी प्रचोदयात् ॥

9. दुर्गा ध्यानम् ॥

त्रिणेत्र युक्तैक मुखीं सुकृष्णां-
शङ्कार भीत्यूरु करां मनोज्ञाम् ।
किरीटिनीं माहिष मस्तकस्थां-
शिवाख्य दुर्गां हृदि भावयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दुर्गा प्रणतिः ॥

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते ॥
भयेभ्य स्त्राहिनो देवि दुर्गे देवि नमोऽस्तुते ॥

शरणागत दीनार्त परित्राण परायणे ॥
सर्वस्य आर्तिहरे देवि नारायणि नमोऽस्तुते ॥

दुर्गा गायत्रीमन्त्रः

सिंहध्वजायै विद्महे चक्र हस्तायै धीमहि, तन्नो दुर्गा प्रचोदयात् ॥

10. सरस्वती ध्यानम् ॥

द्विनेत्र युक्तैक मुखीं सिताभां-
वराभये गण्डि सरोरुहे च ।
हस्तैर्दधानां मथ धौतवस्त्रां-
सरस्वतीं तां शरणं प्रपद्ये ॥

सरस्वती प्रणतिः

मेधे सरस्वति वरे भूतिबाभ्रवि तामसि ॥
नियते त्वं प्रसीदेशे नारायणि नमोस्तुते ॥

सरस्वती गायत्रीमन्त्रः

हंसध्वजायै विद्महे गण्डि हस्तायै धीमहि, तन्नो वाणी प्रचोदयात् ॥

वाग्देव्यै च विद्महे ब्रह्मपत्न्यै च धीमहि, तन्नो वाणी प्रचोदयात् ॥

1. चक्रायुध गायत्रीमन्त्रः

ओं सुदर्शनाय विद्महे ज्वालाचक्राय धीमहि तन्नो चक्रः प्रचोदयात्।

2. शङ्खायुध गायत्रीमन्त्रः

ओं पाञ्चजन्याय विद्महे पापनाशाय धीमहि तन्नो शङ्खः प्रचोदयात्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

7. चामुण्डा प्रणतिः

दंष्ट्राकरालवदने शिरोमालाविभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥

चामुण्डा गायत्रीमन्त्रः ॥

पिशाच ध्वजायै विद्महे, शूल हस्तायै धीमहि,
तन्नो चामुण्डा प्रचोदयात् ।। (काली प्रचोदयात्)

8. महालक्ष्मी ध्यानम् ॥

धृतांबुजां श्रीफल हस्तयुग्मां -
पीतां द्विनेत्रान्वित वक्र शोभाम् ।
पार्श्वद्वये हस्तियुतां सुवेषां -
भजामि लक्ष्मीं कमलासनऽस्थाम् ॥

लक्ष्मी प्रणतिः

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे ॥
महारात्रे महामाये नारायणि नमोस्तुते ॥

लक्ष्मी गायत्रीमन्त्रः

तार्क्ष्यध्वजायै विद्महे विष्णुपत्न्यै च धीमहि,
तन्नो लक्ष्मी प्रचोदयात् ॥

9. दुर्गा ध्यानम् ॥

त्रिणेत्र युक्तैक मुखीं सुकृष्णां-
शङ्खार भीत्यूरु करां मनोज्ञाम् ।
किरीटिनीं माहिष मस्तकस्थां-
शिवाख्य दुर्गां हृदि भावयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दुर्गा प्रणतिः ॥

सर्वस्वरूपे सर्वेशे सर्वशक्ति समन्विते ॥
भयेभ्य स्त्राहिनो देवि दुर्गे देवि नमोऽस्तुते ॥

शरणागत दीनार्त परित्राण परायणे ॥
सर्वस्य आर्तिहरे देवि नारायणि नमोऽस्तुते ॥

दुर्गा गायत्रीमन्त्रः

सिंहध्वजायै विद्महे चक्र हस्तायै धीमहि, तन्नो दुर्गा प्रचोदयात् ॥

10. सरस्वती ध्यानम् ॥

द्विनेत्र युक्तैक मुखीं सिताभां-
वराभये गण्डि सरोरुहे च ।
हस्तैर्दधानां मथ धौतवस्त्रां-
सरस्वतीं तां शरणं प्रपद्ये ॥

सरस्वती प्रणतिः

मेधे सरस्वति वरे भूतिबाभ्रवि तामसि ॥
नियते त्वं प्रसीदेशे नारायणि नमोस्तुते ॥

सरस्वती गायत्रीमन्त्रः

हंसध्वजायै विद्महे गण्डि हस्तायै धीमहि, तन्नो वाणी प्रचोदयात् ॥

वाग्देव्यै च विद्महे ब्रह्मपत्न्यै च धीमहि, तन्नो वाणी प्रचोदयात् ॥

1. चक्रायुध गायत्रीमन्त्रः

ओं सुदर्शनाय विद्महे ज्वालाचक्राय धीमहि तन्नो चक्रः प्रचोदयात्।

2. शङ्खायुध गायत्रीमन्त्रः

ओं पाञ्चजन्याय विद्महे पापनाशाय धीमहि तन्नो शङ्खः प्रचोदयात्।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

3. गदायुध गायत्रीमन्त्रः

ओं कौमोदक्यै च विद्महे दैत्यहन्त्र्यै च धीमहि तन्नो गदाप्रचोदयात्।

4. भूमिदेवी गायत्री मन्त्रः (हरिणी / मही)

ओं धनुर्धरायै विद्महे सर्वसिद्ध्यै च धीमहि तन्नो मही प्रचोदयात्।
(तन्नो धरा प्रचोदयात्)

5. लक्ष्मी गायत्रीमन्त्रः

ओं महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि तन्नो लक्ष्मी प्रचोदयात्।

6. सिंहवाहनगायत्री

ओं मृगराजाय विद्महे तीक्ष्णदंष्ट्राय धीमहि तन्नो सिंहः प्रचोदयात्।

7. गरुडवाहनगायत्री

ओं वैनतेयाय विद्महे स्वर्णपक्षाय धीमहि तन्नस्तार्क्ष्यः प्रचोदयात्।



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दशदिक् पालक रूपध्यानानि

1. इन्द्रध्यानम् ॥

पीतवर्णं सहस्राक्षं गजारूढं किरीटिनम् ।
सर्वालङ्कार संयुक्तं वज्रशक्ति वराभयम् ॥

2. अग्निध्यानम् ॥

रक्तवत् ज्वलितं केशं मेषवाहनमव्ययम् ।
घृतपात्रं स्रुचं शक्तिं रक्तमाल्य विभूषितम् ॥

3. यमध्यानम् ॥

कृष्णाभं महिषारूढं ऊर्ध्वकेशालकान्वितम् ।
खड्ग खेटक दण्डं च पाशहस्तं यमं भजे ॥

4. निर्ऋतिध्यानम् ॥

निर्ऋतिं नीलवर्णाभं सिंहस्थं चोग्र नेत्रकम् ।
गदा वरद हस्तं च चतुर्हस्तं महाबलम् ॥

5. वरुणध्यानम् ॥

वरुणं पूर्णचद्राभं पाश शूलाब्ज चक्रकम् ।
सर्वं रत्न समायुक्तं मकरासन संस्थितम् ॥

6. वायुध्यानम् ॥

धूम्रवर्णं मृगारूढं सृणिं च व्यजनं ध्वजम् ।
असियुक्तं चित्रवस्त्रं अनिलं प्रणमाम्यहम् ॥

7. कुबेरध्यानम् ॥

पीताभं तुरगारूढं धनुःखड्ग गदाब्जकम् ।
सर्वाभरण संयुक्तं कुबेरं रत्नभूषितम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

8. ईशानध्यानम् ॥

ईशानं स्फटिकाभासं त्रिणेत्रं व्याघ्र वस्त्रकम् ।
मृगं टङ्कं वरं शूलं वृषारूढं जटान्वितम् ॥

9. ब्रह्मणःध्यानम् ॥

पीतवर्णं चतुर्बाहुं सृग्दण्डाक्ष कमण्डलुम् ।
हंसवाहन संयुक्तं ब्रह्माणं चतुराननम् ॥

10. विष्णुध्यानम् ॥

नीलमेघ समानाभं गरुडोपरि संस्थितम् ।
गदावरद हस्तं च शङ्ख चक्र समन्वितम् ॥

(अथवा)

11. अनन्त ध्यानम् (अदिशेषनहानागः)

अनन्तं नीलसङ्काशं सहस्त्रफाणि मण्डितम् ।
सर्वालङ्कार संयुक्तं वराभय करांबुजम् ॥

एवं दशदिक्पालकान् ध्यात्वा – सर्वोपचारै रर्चयेत् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेर पूजा प्रयोगः

(कुबेररूप ध्यानानि)

कुबेरं मनुजासीनं सगर्वं खर्वं विग्रहम् ।
स्वर्णच्छायं गदाहस्तं उत्तराशापतिं स्मरेत् ॥ 1

अथवा

अश्वारूढः कुन्तपाणिः कुबेरः चित्रिणीप्रियः ।
निधीश्वरः स्वर्णवर्णः धनदो रूपवान् प्रभुः ॥ 2

अथवा

कुबेरं पुष्पक गदं निधिभि र्नवभि र्युतम् ।
स्वर्णवर्णं च पिङ्गाक्षं मनसा भावया म्यहम् ॥ 3

अथवा

मनुज वाह्य विमानवरस्थितं-
गरुड रत्न निभं निधिदायकम् ।
शिव सखं मकुटादि विभूषितं-
वर गतं धनदं भजतुन्दिलं ॥ 4

अथवा

लंबोदरं महाकायं कल्पयेत् धनदं ततः ।
निष्टप्त कनकप्रख्यं वरदं दण्डिनं तथा ॥ 5

अथवा

पीताभं तुरगारूढं धनुःखड्ग गदाब्जकम् ।
सर्वाभरण संयुक्तं कुबेरं रत्नभूषितम् ॥ 6

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेर परिवार देवताः ध्यानम्

(द्वारपालादि चत्वारः)

तस्य दक्षिणतः पार्श्वे जृंभलो मणिभद्रकः ।
कल्प्यः शङ्खनिधिं चैव वामपार्श्वेतु कल्पयेत् ॥ 1

नलकूबरमंभोज निधिं च शुभकुण्डलम् ।
जृंभलो हेमवर्णाभो मणिभद्रो मणिप्रभः ॥ 2

नलकूबर नामासौ श्यामवर्णः प्रकीर्तितः ।
शिबिः कुण्डलवान् रक्तः सर्वेऽभीतिवर प्रदः ॥ 3

कुबेरस्य अष्टमङ्गलानि

श्रीवत्सं पूर्णकुंभं च भेरीं दर्पण मेव च ।
मत्स्ययुग्मांकुशौ चैव शङ्ख केसरिणौ तथा ॥
इन्द्रादिषु क्रमेणैव न्यसे दिन्द्रादि मन्त्रकैः ॥

कुबेरशक्ति ध्यानम् ॥

(कौबेरीदेवी / ध्यानम्) (ऋद्धिदेवि / यवनला / चित्रिणी/ चित्रलेखा / यक्षिणी)

कुबेर वामपार्श्वस्थां द्विभुजां च द्विनेत्रकाम् ।
चित्रलेखा मुदाराङ्गीं यक्षेश प्राणवल्लभाम् ॥
तटिद्वर्णां विशालाक्षीं विचित्र वसनोज्ज्वलाम् ।
सुरत्न मकुटां रम्यां दिव्याभरण भूषिताम् ॥
हेमाब्ज धारिणीं दक्षे वामे लंबकरां वराम् ।
यक्ष गन्धर्व नारीभिः सेवितांघ्रि सरोरुहाम् ॥
ध्यात्वावाह्य यजेत् देवीं वित्तेशमहिषीं पराम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेर मन्त्रविशेषाः ॥

1. कुबेरस्य श्रुति मन्त्राः ॥

1. राजाधि राजाय----------+----------महाराजाय नमः ॥

2. वयगुंसोम व्रते तव----------+---------अशीमही ॥

2. कुबेर गायत्री मन्त्राः ॥

1. यक्षेश्वराय विद्महे-वैश्रवणाय धीमहि - तन्नः श्रीदः प्रचोदयात् ॥

2. वित्तेश्वराय विद्महे-गदाहस्ताय धीमहि - तन्नो यक्षः प्रचोदयात् ॥

3. धनाधिपाय विद्महे-यक्षराजाय धीमहि - तन्नः सोमः प्रचोदयात्॥

3. कुबेरस्य तान्त्रीक मन्त्राः ॥ (मन्त्र महोदधौ-पुटे-286)

1. ओंयक्षाय-कुबेराय-वैश्रवणाय-धनधान्याधिपतये-धनधान्यसमृद्धिं-मे देहि दापय स्वाहा ॥

(बाणरामाक्षर मन्त्रः = 35 अक्षर यक्षाय इत्यादि षड्विभागैः षडङ्गन्यासः कार्यः)

2. ओं श्रीं ओं ह्रीं श्रीं ह्रीं क्लीं श्रीं क्लीं वित्तेश्वराय नमः ॥

3. मन्त्राः गद्यरूपाः

1. कुबेर आवाहन गद्यम्॥ (मरीचिसंहितायां)

उत्तरे-सितवर्णं-श्यामांबरधरं-दण्डिनं-पुष्पकवाहनं-कृकलासध्वजं-ककारबीजं-यवनलापतिं-धनिष्ठानक्षत्रजातं-मृदङ्गरवं-कुबेरं-धन्यं-पौलस्त्यं-यक्षराजमावाहयामि ॥ इति मन्त्रेण आवाहयेत् ॥

2. शङ्खनिधि आवाहन गद्यम् ॥
(निधिद्वय आवाहन गद्यम्॥ वैखानसे मरीचिः)

द्वारदक्षिणे-शङ्खाभं-नीलांबरधरं-भूताकारं-शुद्धापतिं-पद्मध्वजं-पद्मवाहनं-हस्ताभ्यां शङ्खं दधानं-(शतभिषक्) वारुणाभजातं-

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

शङ्खादिबीजं-शङ्खरवं-शङ्खनिधिं-वरं-धनदं-मौक्तिकोद्भवमिति ध्यात्वा ओं शं शङ्खनिधये नमः इति आवाहयेत् ॥

3. पद्मनिधि आवाहन गद्यम् ॥

द्वारवामे-रक्ताभं-जपांबरधरं-विशुद्धापतिं-भूताकारं-पद्मध्वजं-पद्मवाहनं-हस्ताभ्यां पद्मं दधानं-प्रोष्टपाज्जातं-सिह्मनादवरं-पद्माद्यक्षरबीजं-पद्मनिधिं-वरं-रक्ताभं-भूतनायक मिति ध्यात्वा ओं पं पद्मनिधये नमः इति आवाहयेत् ॥

4. कुबेर षडङ्गमन्त्राः



1. ओं यक्षाय-हृदयाय नमः
2. ओं कुबेराय-शिरसे स्वाहा
3. ओं वैश्रवणाय-शिखायै वषट्
4. ओं धनधान्याधिपतये-कवचाय हुं
5. ओं धनधान्यसमृद्धिं मे-नेत्रेभ्यो वौषट्
6. ओं देहि दापय स्वाहा-अस्त्राय फट् ।

(इति षडङ्गानि विन्यसेत्)

1. ओं श्रीं ओं हृदयाय नमः ॥
2. ह्रीं श्रीं ह्रीं शिरसे स्वाहा ॥
3. क्लीं श्रीं क्लीं शिखायै वषट् ॥
4. ओं श्रीं ओं कवचाय हुं ॥
5. ह्रीं श्रीं ह्रीं नेत्रेभ्यो वौषट् ॥
6. क्लीं श्रीं क्लीं अस्त्राय फट् ॥

(एवं षडङ्गानि विन्यस्य-मूलं जपेत्॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेर यन्त्र पूजाविधिः ॥

महत्संपत्प्रदं-कुबेरयन्त्रं-पुष्यनक्षत्रयुते-गुरुवासरे-पलाशपत्रे-विलिख्य ॥ रक्तपट्टके-परिनिक्षिप्य-पद्मैः संपूजयेत् ॥

पक्षत्रितय कालं वा-पक्षपञ्चकमेव वा।

उत्तराभिमुखो स्थित्वा-जपं कृत्वा-समर्प्य-लक्ष जपात् प्रार्थयेत्॥ सिद्धिर्भवेत् ॥

27	20	25
22	24	26
23	28	21

अस्य श्री कुबेर मन्त्रस्य, विश्रवा ऋषिः। बृहती छन्दः। शिवमित्र धनेश्वरो देवता।

1. कुबेर मूलमन्त्रः (मन्त्र महोदधौ)

वैश्रवणाय इति शक्तिः। स्वाहा कीलकम्। कुबेरप्रसाद सिद्ध्यर्थे जपे विनियोगः ध्यानम् -

मूलमन्त्रः "ओं यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा" ॥ (अक्षरमन्त्रः)

कुबेरगायत्री मन्त्रः

"यक्षेश्वराय विद्महे-वैश्रवणाय धीमहि-तन्नो श्रीदः प्रचोदयात् ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

2. कुबेर यन्त्र कल्पन प्रकारः ।। (दशाङ्ग्यन्त्रम्)

आदौषट्कोणं। षट्कोण मध्ये ॥

ओं श्रीं ओं ॥ ह्रीं श्रीं ह्रीं ॥ क्लीं श्रीं क्लीं ॥ इति लिखेत्।

(मूलमन्त्रः) ओं वित्तेश्वराय नमः ॥ (अष्टाक्षरमन्त्रः) मध्येलिखेत्।

3. षट्कोणाभ्यन्तरे ॥ षट्सुकोणेषु अन्तः षडङ्ग बीजानि लिखेत्।

श्रां श्रीं श्रूं श्रैं श्रौं श्रः इति षडङ्गबीजानि ॥

4. षट्कोणान्तराले ॥ षट्कोणबाह्ये -

क्लां क्लीं क्लूं क्लैं क्लौं क्लः इति षडङ्गबीजानि च विलिखेत् ॥

अन्तर्वृत्ते ॥ कुबेर मन्त्राः ॥

5. अष्टदलेषु-ह्रीं श्रीं इति बीजद्वयेन नमोन्त नामानि विलिखेत्। तत्र कुबेरपीठ दलशक्तयः अष्टौ ।

1. ओं ह्रीं श्रीं धनदायै नमः ॥
2. ओं ह्रीं श्रीं रत्नमालायै नमः ॥
3. ओं ह्रीं श्रीं काञ्चनमालायै नमः ॥
4. ओं ह्रीं श्रीं ऊर्वश्यै नमः ॥
5. ओं ह्रीं श्रीं मेनकायै नमः ॥
6. ओं ह्रीं श्रीं सुभगायै नमः ॥
7. ओं ह्रीं श्रीं रंभायै नमः ॥
8. ओं ह्रीं श्रीं मनोहरायै नमः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

6. वृत्ते मन्त्रः ॥ श्रुति मन्त्रः- मालामन्त्रो वा लिखेत् ॥

7. षोडशदलेषु षोडश शक्तिनामानि च विलिखेत् ॥

1. ओं चन्द्रिकायै नमः
2. ओं नलिन्यै नमः
3. ओं पद्मिन्यै नमः
4. ओं भूतिन्यै नमः
5. ओं कनकवर्णायै नमः
6. ओं प्रमदायै नमः
7. ओं कामिन्यै नमः
8. ओं कामेश्वर्यै नमः
9. ओं शोभनायै नमः
10. ओं मेखलायै नमः
11. ओं विशालायै नमः
12. ओं विचित्रायै नमः
13. ओं विभ्रमायै नमः
14. ओं कुहिन्यै नमः
15. ओं जनरञ्जन्यै नमः
16. ओं मदनायै नमः

8. बाह्यवृत्ते

एकपञ्चाशत् अकारादि क्षकारान्त वर्णाः विलिख्य- मातृकादेवताभ्यो नमः इति पूजयेत् ॥

9. अन्तर्भूपुर रेखायां - इन्द्रादि अष्टदिक्पालकान् & वज्रादि आयुधानि च पूजयेत् ॥

10. बाह्यभूपुर रेखायां - ऐरावतादि गजयुगळं पूजयेत् ॥ दशाङ्ग यन्त्रेक्रमेण यजेत् ॥ इति कुबेरलक्ष्मीयन्त्रार्चन विधिः ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेरपूजा प्रयोगः

आवाहन प्रार्थना

धनेश्वर गदाहस्त कुबेरशङ्कर प्रिय ।
उत्तराशापते सोम कलशेऽस्मिन् वसेत्प्रभो ॥

इति कुबेरपूजालक्ष्यं कुंभं यन्त्रं कूर्चं वा स्थापयेत् ॥

कुबेर ध्यानम् ॥

कुबेरं पुष्पकगदं निधिभिर्नवभि र्युतम् ।
स्वर्णवर्णं च पिङ्गाक्षं मनसा भावयाम्यहम् ॥ 1

(यद्वा)

धनपूर्णं स्वर्णकुम्भं तथा रत्नकरण्डकम ।
हस्ताभ्यां विप्लुतं खर्वं करंपाद च तुन्दिलम् ।
वटाधस्ताद रत्नपीठोपविष्ट सुस्मिताननम् ।
एवं कृत हुतो मन्त्री लक्ष्म्या जयति वित्तपम् । 2

(यद्वा)

मनुजवाह्य विमान वरस्थितं-गरुडरत्न निभं निधि दायकम् ।
शिवसखं मकुटादि विभूषितं-वरगतं धनदं भज तुन्दिलम् ॥ 3

कुबेर विज्ञापनम् ॥ आवाहनम्

कुबेर धनद स्वामिन् यक्षराज वर प्रभो ।
आवाहयामि सोम त्वां कलशेऽस्मिन् मनोहरे ॥

इति कुबेरं अस्मिन् कलशे आवाहयामि ॥ इति विज्ञाप्य-ततो-प्राणप्रतिष्ठादिकं विधाय ॥ सान्निध्यं प्रार्थयेत् ॥ तद्यथा -

कुबेर प्रार्थना

नरवाहन यक्षेश सर्व पुण्य जनेश्वर ।
आवाहितो मया भक्त्या पूजां मे सफलां कुरु ॥
ओं सं कुं कुबेराय नमः इति मन्त्रेण धनदं आवाहयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेर आवाहनमन्त्रः

साङ्गं - सवाहनं - सायुधस्तोम समेतं - कलत्र - मित्र - पुत्र - परिवार - सहितं - सकलविभव - विमान - नवनिधि - परिवृतं - यक्षादि - स्वगणबृन्द परिवृतं - उत्तराशापतिं - महाकायं - महाप्रभुं - त्रिभुवनेष्टफलदं - वित्तेश्वरं - कुबेरं - आवाहयामि - इति आवाह्य अर्चयेत् ॥

आवाहितोभव, स्थापितोभव, सन्निहितोभव, सन्निरुद्धोभव, अवकुण्ठितो भव, सुप्रीतोभव, इति प्रार्थ्य, आसनाद्युपचाराणि विद्यात् ॥

नरवाहन यक्षेश सर्वलोक सुखप्रद ।
यावत् पूजावसानन्तु तावत्वं सुस्थिरो भव ॥ 4

ओं कुं कुबेराय नमः अभिमुखोभव ॥

अनेकरत्न खचितं नरवर्य सुधारितम् ।
हैमसिह्मासनं देव गृह्यतां गुह्यकेश्वर ॥ 5

ओं कुं कुबेराय नमः विमानयुत सिह्मासनं समर्पयामि ॥

भक्त्या मया समानीतं गन्धपुष्पादि मिश्रितम् ।
पाद्यं गृहाण यक्षेन्द्र दिव्यपुष्प विमानग ॥ 6

ओं कुं कुबेराय नमः पाद्यं समर्पयामि ॥

महानदी समानीतं सुवर्ण कलशस्थितम् ।
अर्घ्यं गृहाण सोमत्वं निधीश्वर वर प्रद ॥ 7

ओं कुं कुबेराय नमः अर्घ्यं समर्पयामि ॥

प्रसन्नं शीतलं तोयं पिङ्गाक्ष धनद प्रभो ।
गृहाणाचमनार्थाय यक्षेश हयवाहन ॥ 8

ओं कुं कुबेराय नमः आचमनीयं समर्पयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

हेमकुंभ समानीतं सर्वे तीर्थाहृतं जलम् ।
स्नानार्थं गृह्यतां यक्ष सर्वपुण्य जनेश्वर ॥ 9

ओं कुं कुबेराय नमः शुद्धोदक स्नानं समर्पयामि ॥
स्नानानन्तरं आचमनीयं समर्पयामि ॥

हेमांबरयुगं सूक्ष्मं नवंचाति मनोहरम् ।
निधीश्वर धनाध्यक्ष गृह्यतां गुह्यकेश्वर ॥ 10

ओं कुं कुबेराय नमः वस्त्रयुगलं समर्पयामि ।
ओं कुं कुबेराय नमः यज्ञोपवीतं समर्पयामि ॥
ओं कुं कुबेराय नमः मकुटाद्याभरणानि समर्पयामि ॥

कुंकुमागरु कर्पूर कस्तूरी रोचनायुतम् ॥
गन्धं ददामि वित्तेश निधिवेत्र करांबुज ॥ 11

ओं कुं कुबेराय नमः दिव्यपरिमल गन्धान् धारयामि ॥
ओं कुं कुबेराय नमः गन्धोपरि अलंकरणार्थं अक्षतान् समर्पयामि ॥

मन्दार पारिजाताब्ज केतकी वकुलोद्भवैः ।
पुष्पमालामिमां बद्धां गृहाण निधिनायक ॥ 12

ओं कुं कुबेराय नमः अलंकरणार्थं पुष्पमालां समर्पयामि ॥

नाना सुगन्ध पुष्पाद्यैः चंपकाब्जादिभिः कृताम् ।
पूजां गृहाण पौलस्त्य चित्रिणी प्राणनायक ॥ 13

ओं कुं कुबेराय नमः विविध कुसुमार्चनां समर्पयामि ॥

1. ओं कुं कुबेराय नमः
2. ओं कुं स्वर्णवर्णाय नमः
3. ओं कुं शिवसखाय नमः
4. ओं कुं गदाहस्ताय नमः
5. ओं कुं यक्षेश्वराय नमः
6. ओं कुं वित्तेश्वराय नमः
7. ओं कुं निधीश्वराय नमः
8. ओं कुं उत्तराशापतये नमः

इति अष्टपुष्पार्चनां समर्पयामि ॥ 108 विशेष नामार्चनं च कुर्यात् ॥
ततो धूपं दद्यात् -

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

दास्यामि वित्तेश गुग्गुलागरू संयुतम् ।
गृहाणत्वं महाप्राज्ञ सदापुष्पक वाहन ॥ 14

ओं कुं कुबेराय नमः सुगन्ध धूपं आघ्रापयामि ।

साज्यवर्तिं युतं दीपं त्रैलोक्यतिमिरापहम् ।
गृहाणत्वं महाप्राज्ञ गन्धर्वकुल सेवित ॥ 15

ओं कुं कुबेराय नमः आज्य दीपं प्रदर्शयामि ॥

नैवेद्यं फलभक्ष्याढ्यं विविधं सुमनोहरम् ।
गृहाण यक्षराजत्वं चित्रलेखा मनोहर ॥ 16

ओं कुं कुबेराय नमः नैवेद्यं निवेदयामि ॥

पूगीफलयुतं दिव्यं नागवल्लीदलैर्युतम् ।
ताम्बूलं गृह्यतां देव कुबेर नरवाहन ॥ 17

ओं कुं कुबेराय नमः ताम्बूलं समर्पयामि ॥

नीराजनं समानीतं कुबेर धननायक ।
गृह्यतामर्पितं भक्त्या विश्ववन्द्य निधीश्वर ॥ 18

ओं कुं कुबेराय नमः नीराजनं समर्पयामि ॥
ओं कुं कुबेराय नमः नीराजनानन्तरं आचमनीयं समर्पयामि ॥

पुष्पाञ्जलिं गृहाणेमं प लस्त्य निधिनायक ।
सर्वदुःख प्रशमन सर्वकामार्थ सिद्धिद ॥ 19

ओं कुं कुबेराय नमः पुष्पाञ्जलिं समर्पयामि ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

धनदाय नमस्तुभ्यं निधि पद्मायते नमः ।
भवन्तु त्वत्प्रसादोन्मे धनधान्यादि संपदः ॥

नमोलंकाधि नाथाय धनाधिपतये नमः ।
नमश्शङ्कर भक्ताय यक्षेशाय नमो नमः ॥ 20

ओं कुं कुबेराय नमः स्तोत्र प्रदक्षिण नमस्कारान् समर्पयामि । अभीष्ट सिद्धिप्रदो भव इति प्रार्थयेत् । कुबेरं स्तोत्र गीत वाद्यादिना तोषयेत् । पूजान्ते कुबेरं विसृजेत्। पराङ्मुखार्घ्यं दद्यात्। ।

(ओं कुं कुबेराय नमः यथा सुखं यथास्थानं प्रतिष्ठापयामि)
इत्यर्घ्यं दत्वा विस्टजेत् ॥ इति पूजासमाप्ता ॥



Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेरगण देवताह्वानम् ॥ (यक्षेश परिवारः)

1. महानारद-प्रह्लाद-नमुचि-नर-वह्निजिह्व-कालप्रदष्ट-शङ्कुकर्ण-शिखोदर-शिशुपाल-दुन्दुभि-तारकावतार-ज्वाला-बलिप्रिय-भोगबिन्धु - विभव-विक्रमप्रिय-सैंहिकेय-मन्दर-सारस्वत-सर्वभद्र-सुखप्रिय-प्रवेशन-मौनदेय-मन्त्रहारि-मदनसैन्य-करविकट-हास्य-हृष्टास्यरूप-कुण्डेश-त्रिदशात्मक-विमर्दाक्ष-पुष्कराद्यभिधान दानवगणाश्च ॥

2. मणिभद्र-पूर्णभद्र-नरेन्द्र-वरेन्दु-कुहाण्ड-विभाण्ड-विरूपाक्ष-वैश्रवण-वाचिक-हयग्रीव-जंबल-शुभगेन्द्रिय-धौतमाली-विबुधवृत्त-धृतराष्ट्र-धनद-सुरचित्ताकर्षण-मेघचित्र-करीर-सङ्गीतमुख्य-सताल-रोगमदन-करणाद्यभिधान सिद्धगणाश्च ॥

3. पालका-वायुग्रीव-जंभभद्र-केतुमाली-धृतराष्ट्र-मुख्यसङ्गीत-सारस्वतानल्प-सुमुख-सुप्रिय-प्रवेशन-वैनतेय-मेघनाद-शाश्वत-पुष्ट-सुपुष्ट-महाबला-द्यभिधान चारगणाश्च ॥

4. योगी-योगतत्वज्ञ-योगविभूषित-दुष्टमर्दन-शिष्टपरिपालन-शिव-रुद्र-महादेव-ब्रह-विष्णु-वायु-धर्म-चन्द्र-सूर्याभिधान योगिगणाश्च ॥

5. वीणावाद्य-किन्नर-किंपुरुष-गीतशूर-सेनाप्रमर्दन-गीताभिधान-किन्नरगणाश्च ॥

6. सुलोचनाभिराम-सौगन्धिक-पुष्पवल्लभ-विनिहितपद्म-पद्मगन्ध-सुरूप-सौम्यरूप-नित्योत्सव-विद्रुमाभिलास्य-वेदपारग-निहित-विविध-विद्याधर-प्रबुद्ध-बुधक्रम-महापाश-प्रभूताभिधान-विद्याधरगणाश्च ॥

7. दैत्या सुर-दानव-पिशिताशन-यक्ष- राक्षस-प्रेताभिधान-समस्त कुबेरगणाश्च ॥

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

8. गह्यकेश्वर दोर्दण्डविराजित दिव्यघनगदाखड्ग चाप – बाणादि शस्त्रगणाश्च।।

एतैस्सह---परमेश्वराज्ञया परिपालित उत्तराशो कुबेरः स्वगणपरिवृतः शीघ्रं समागच्छतु ॥ धनधान्यसमृद्धिं करोतु ॥

श्री कुबेर प्रार्थना मन्त्रः

देविप्रियश्च नाथस्य कोशाध्यक्ष महामते ।
ध्याये ऽहं प्रभुं श्रेष्ठं कुबेरं धनदायकम्।
क्षमस्व मम दौरात्म्यं कृपासिन्धो सुरःप्रियः।
धनदो ऽसि धनं देहि अपराधांश्च नाशय ।
महाराज कुबेर त्वं भूयो भूयो नमाम्यहम्।
दीनोऽपि च दया यस्य जाय तुं वै महाधनः।।
धनदाय नमस्तुभ्यं निधि पद्माधिपाय च।
भवन्तु त्वत्प्रदानं मे धन धान्यादि सम्पदः।
कुबेराय नमस्तुभ्यं नानाभाण्डार संस्थिता।
यत्र लक्ष्मीभवेद् देवि धनं चिह्न नमोस्तुते।।

लक्ष्मी प्रार्थना

सुरा सुरेन्द्रादि किरीट मौक्तिकैः-
यतं सदा यस्तव पाद पङ्कजम् ।
परावरं पातु वरं सुमङ्गलं-
नमामि भक्त्या तव काम्यसिद्धये ॥
अन्नपूर्ण स्वर्णकुम्भं तथा रत्नकरण्डकम्।
हस्ताभ्यां विपुलं खर्वं कर पादं च तुन्दिलम्।
वटाधस्तात् रत्नपीठे उपविष्टं स्मिताननम्।
एवं कृत हुतो मन्त्री लक्ष्म्या जयति वित्तपम् ।।

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

कुबेर अष्टोत्तरशत नामावलिः ॥
(सर्वनामसु आदौ ओं इति अन्ते नमः इति च योज्यम्)

कुबेराय
धनदाय
श्रीमते
यक्षेशाय
गुह्यकेश्वराय
निधीशाय
शङ्करसखाय
महालक्ष्मी निवासभुवे
महापद्म निधीशाय
पूर्णाय (10)
पद्म निधीश्वराय
शङ्खाख्य निधिनाथाय
मकराख्य निधि प्रियाय
सुकच्छप निधीशाय
मुकुन्द निधिनायकाय
कुन्दाख्य निधिनाथाय
नील निध्यधिपाय
महते
वरनिध्यधिपाय
महानिधीश्वराय (20)
पूज्याय
लक्ष्मीसाम्राज्य दायकाय
लक्ष्मीलाभप्रदाय
कोशाधीशाय कुलोचिताय
अश्वारूढाय
विश्ववन्द्याय
विशेषज्ञाय
विशारदाय
नळकूबरदात्रे
मणिग्रीवपित्रे (30)
गूडमन्त्राय
वैश्रवणाय
चित्रलेखा मनःप्रियाय
एकपिङ्गाय
अळकाधीशाय
पलस्त्याय
नरवाहनाय
कैलास शैल निलयाय

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

राज्यदाय
रावणाग्रजाय (40)
चित्रचैत्ररथाय
उद्यानविहारिणे
सुकुतूहलाय
महोत्साहाय
महाप्राज्ञाय
सदापुष्पक वाहनाय
सार्वभौमाय
मङ्ळ नाथाय
सोमाय
सौम्यदिगीश्वराय (50)
पुण्यात्मने
पुरुहूत श्रियै
सर्वपुण्य जनेश्वराय
नित्यकीर्तये
निधिवेत्रे
लङ्काभिराग धननायकाय
यक्षाय
परमशान्तात्मने
यक्षराजे
यक्षिणीवृताय (60)
किन्नरेशाय
किंपुरुषनाथाय
खङ्गायुधाय
वशिने
ईशान दक्षिणपार्श्वस्थाय
वायोर्वाम समाश्रयाय
धर्ममार्गैक निरताय
धर्मसम्मुख संस्थिताय
निध्येश्वराय
धनाध्यक्षाय (70)
अष्टलक्ष्म्याश्रितालयाय
मनुष्यधर्माय
सद्वृत्ताय
कोशलक्ष्मी समाश्रिताय
धनलक्ष्मी नित्यवासाय
धान्यलक्ष्मी निवासभुवे
अश्वलक्ष्मी सदावासाय
गजलक्ष्मी स्थिरालयाय
राज्यलक्ष्मी जन्मगेहाय
धैर्यलक्ष्मी कृपाश्रयाय (80)

Center for Shaiva Studies, Pondicherry Collection

CC0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta

अखण्डैश्वर्य संयुक्ताय
नित्यानन्दाय
सुखाश्रयाय
नित्यतृप्ताय
निधित्रात्रे
निराशाय
निरुपद्रवाय
नित्यकामाय
निराकांक्षाय
निरुपाधिक वासभुवे (90)
शान्ताय
सर्वगुणोपेताय
